# ब्रह्मविद्यारहस्यविवृतिः

## BRAHMAVIDYARAHASYA-VIVRTIH

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

## शुद्धशाङ्करप्रस्थानप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

१. **ईशाकेनकाठकमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च** – सटिप्पणभाष्यसहिताः ।

२. **तैत्तिरीय आनन्दवल्ली भृगुवल्ली च – सभाष्या** – श्रीसच्चिदानन्देन्द्रसरस्वतीकृतभाष्यार्थविमर्शिनीसहिता ।

३. **माण्डूक्यरहस्यविवृतिः** – श्रीसच्चिदानन्देन्द्रसरस्वतीकृता विस्तृतव्याख्या ।

४. **सुगमा** – अध्यासभाष्यस्य नवीनव्याख्या, श्रीसच्चिदानन्देन्द्रसरस्वतीकृता ।

५. **सूत्रभाष्यार्थतत्त्वविवेचनी** – जिज्ञासाधिकरणभाष्यव्याख्या ,,

६. ,, जन्माद्यधिकरणभाष्यव्याख्या ,,

७. **वेदान्तप्रक्रियाप्रत्यभिज्ञा** – शाङ्करभगवत्पादसंमतां वेदान्तासाधारणप्रक्रियां विशदयन्ती, अत्यन्तप्राचीनकालादारभ्य सर्वज्ञात्ममुनिपर्यन्तम् वेदान्तविचारेतिहासधाराप्रदर्शिनी च । श्रीसच्चिदानन्देन्द्रसरस्वतीप्रणीता ।

८. **पञ्चपादिकाप्रस्थानम्** – शाङ्करप्रस्थानात् पञ्चपादिकाप्रस्थानस्य वैलक्षण्यं स्फुटयन् विमर्शात्मको ग्रन्थः । श्रीसच्चिदानन्देन्द्रसरस्वतीकृतः ।

९. **क्लेशापहारिणी** – श्रीसुरेश्वराचार्यप्रणीत नैष्कर्म्यसिद्धेर्नवीनव्याख्यानरूपा । वार्तिकप्रस्थानस्वरूपं सुविविक्तं बुभुत्सूनां कृते नूतनतया प्रकाशितोऽयं स्वतन्त्रनिबन्धः । श्रीसच्चिदानन्देन्द्रसरस्वतीप्रणीतेयं व्याख्या जिज्ञासुभिरवश्यमवलोकनीया ।

१०. **शुद्धशाङ्करप्रक्रियाभास्करः, १-२** – वेदान्तसिद्धान्तनिर्णयः, शाङ्करसंप्रदायनिर्णयश्च कृतोऽत्र ।

११. **शुद्धशाङ्करप्रक्रियाभास्करः, ३-४-५** – शाङ्करवेदान्तमर्यादा, शाङ्करवेदान्तप्रक्रियास्वरूपम् , अध्यारोपापवादप्रक्रियाविशेषाश्च संगृहीताः अत्र ।

१२. **शुद्धशाङ्करप्रक्रियाभास्करः, ६-७** – शाङ्करप्रस्थानस्य प्रस्थानान्तरेभ्यो वैलक्षण्यम् , बौद्धमतसाम्यशङ्कापरिहारश्च वर्णितोऽत्र ।

**प्राप्तिस्थानम् :**

अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

अध्यात्मग्रन्थावलिः

# ब्रह्मविद्यारहस्यविवृतिः

( छान्दोग्याष्टमप्रपाठकव्याख्या )

# BRAHMAVIDYARAHASYA-VIVṚTIH

**( The Secret of Brahma-Doctrine disclosed )**

*A commentary on the eighth chapter of the Chandogya*

BY

SWAMI SATCHIDANANDENDRA SARASWATI

निर्मातारः

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

क्रमाङ्कः १४४

प्रकाशनस्थानम् :

अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

१९६९

**First Printed 1969**

**1000 Copies**

©

**All Rights Reserved**
**by**
**The Adhyatma Prakasha Karyalaya**
**Holenarsipur**

**Registered under the Copy Right Act, 1957**

**Printed in India**
**by**
**Y. Narasappa**
**at**
**The Adhyatma Prakasha Press**
**Holenarsipur**

# Publishers' Note

We are delighted to bring out this new commentary on a portion of the Chandogya by Sri Satchidanandendra Saraswati Swamiji. It is a solid contribution to Vedanta in asmuch as it solves many difficulties with which even scholars have been confronted in interpreting this part of the Upanishad.

We are highly grateful to Swamiji for having entrusted the publication to us as usual. Our warm thanks are due to Sri S. Venkatachalaiah of Sakrepatna and Sri Prasada Rao of Poona whose generous contributions have partly met the printing expenses of the book.

Holenarsipur
10-6-1969

Y. NARASAPPA,
*Chairman, A. P. Karyalaya.*

# INTRODUCTION

### THE TITLE OF THE WORK

This book has been entitled *Brahmavidyā-rahasya-vivṛti* because it aims at revealing the true nature of Brahmavidyā or the right knowledge of Brahman. Brahma is, as most of us know, the Reality underlying all the phenomenal Universe. All the Upanishads, according to Śankara, purport to teach that Brahman alone is the real Self of the Universe, and that each one of the individual selves in it is essentially identical with that Brahman.

### BRAHMAN IN ITS DUAL ASPECT

Before arriving at this ultimate conclusion of Upanishadic teaching, the interpreter of the texts has to surmount two seemingly formidable difficulties. In the first place he has to recognize that Brahman, which is in itself void of all specific features *(Nirviśesha)* and therefore ineffable, is defined in positive terms (such as सत्यम् real, ज्ञानम् consciousness, आनन्दम् bliss) as often as it is described negatively (e. g. निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् partless, actionless, free from plurality,

free from blemish, untainted). And in the second place he has to realize that Brahman is presented in two different aspects, viz, in a context where enquiry into its real nature is in view, and in another context where meditation on its nature is enjoined. In the former case, Brahman is called *Para Brahman*, higher Brahman and even while it is taught through associating factors these are to be regarded only as devices employed for purposes of instruction and not as actually appertaining to it. In the latter case it is *Apara Brahman* the lower Brahman and should be regarded as endowed with qualifying adjuncts and both Brahman and its qualities must be supposed to have been recommended for meditation. S'aṅkara has stated this in so many words when he observes एवम् एकमपि ब्रह्म अपेक्षितोपाधिसंबन्धं निरस्तोपाधिसंबन्धं च उपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यते । "Thus one and the same Brahman is taught in the Upanishads as qualified by adjuncts to be regarded as belonging to it for the purpose of meditation, and as devoid of all associating factors when it is proposed to be known."

S.Bh. 1-1-12, p. 35.

## INADMISSIBLE INTERPRETATIONS OF VEDANTA

Failure to discriminate these governing Principles of interpretation, has misled some other

Bhashsyakaras, notably Ramanuja for instance, into regarding the entire body of the Upanishads as purporting to teach a qualified Brahman throughout and denying that there are any texts that teach Brahman devoid of specific features. And the inability to understand S'aṅkara's terminology correctly in regard to the use of words like *Is'vara* and *Guṇa* has been responsible for the misinterpretation of S'aṅkara on the part of a sub-school which, while recognizing the distinction of the higher Brahman without distinctive qualities (निर्गुण) and the lower Brahman with particular qualities (सगुण), maintained the absurd doctrine that even knowers of the non-dual Brahman become merged only in the qualified Brahman and have to wait for absolute release till all the innumerable souls are finally released (सर्वमुक्ति) !

## THE SCOPE OF THE PRESENT SUB-COMMENTARY

In order to guard against all such aberrations, I have chosen this particular chapter of the *Chandogya* where the *Saguṇa* and the *Nirguṇa* doctrines are couched in similarity of expression with regard to the description of Brahman and the goal to be reached, but two distinct and different methods of approach are detailed in the course of presentation. I have made a

sustained effort both in the body of the work and in the Appendix to show how one and the same Brahman with the same epithets, is addressed to two different aspirants of two distinct levels of the intellect who are expected to meditate or intuit after attentive enquiry and reap the benefit of their effort in a world hereafter or in this very life according to their desert.

The work itself is divided into two main sections. The first is a description of the steps of meditation to be practised before one gets a vivid vision (साक्षात्कार) of the goal and the eschatological fruits to be reached in the Highest Heaven or *Brahma-Loka*. While this is undoubtedly a path of unflinching faith to the very end, yet there are hopeful signs of experience felt in this very life also as will be noticed in the secondary fruits vouch-safed to the devotee. The second section recounts how this Reality can be intuited here and now by a qualified and strenuous enquirer through introspection. The results of the enquiry as revealed through the dialogue between Prajāpati and Indra, also serve as a guarantee of what is taught in the previous section. Reason is thus made the support of faith and places the Upanishadic doctrine on a firm foundation.

I fervently hope that this humble attempt will be of some service to students of S'aṅkara-Vedanta in reconciling the apparently conflicting teachings with regard to Brahma-Vidya.

**ACKNOWLEDGMENT**

My Narayana Smaranams to all those that have helped me to make this book as useful as it may prove to be and to the Adhyatma Prakasha Karyalaya for having accepted the Copy Right of the booklet and for having published it promptly. I bring this introduction to a close by prayerfully remembering the grace of Bhagavan Narayaṇa who inspired me with any good thoughts that may have been recorded in these pages.

Holenarsipur.
May 29, 1969

SATCHIDANANDENDRA SARASWATI

# वाचकेषु विज्ञप्तिः

अथ समर्प्यते भवतां करकमलयोश्छान्दोग्याष्टमप्रपाठकव्याख्या समवलोकनाय । अस्याश्चाभिधानं ब्रह्मविद्यारहस्यविवृतिरिति । उपनिषदपरनाम्नी हि ब्रह्मविद्या अत्र प्रतिपाद्यत इति कृत्वा ग्रन्थोऽप्युपनिषदित्येवोच्यते इति विज्ञाततमेव वेदान्तविदुषाम् । द्वयी चेयं ब्रह्मविद्या सगुणब्रह्मोपासनात्मिका, शुद्धब्रह्मसाक्षात्कारात्मिका चेति । तच्च ब्रह्म सर्वस्यास्य जगतः, तदन्तर्वर्तिविज्ञानात्मनो च परमार्थस्वरूपम् – इति श्रीशङ्करभगवत्पादानुसृतानादिसंप्रदायागतप्रस्थानप्रतिपत्तिरेवेति सुधियामभिमतम् ॥

## परापरब्रह्मादिविभागः

परमार्थतो निर्गुणं प्रत्यस्तमितसर्वविशेषम् एकमेवाद्वितीयं सदपि ब्रह्म, अविद्यावस्थायाम् उपास्योपासकादिलक्षणव्यवहारभाग्भवति, एकमेव च सदपि अविद्याप्रत्युपस्थापितनामरूपोपाधित्वेन ईश्वरपरमेश्वरादिशब्दैर्व्यपदिश्यते च । उपाधिपरिच्छेदापेक्षया च तादृशनामरूपकृतकार्यकरणसङ्घातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रतीष्टे इति ईशित्रीशितव्यविभागव्यवहारो ईश्वरस्य सर्वज्ञत्वसर्वशक्तित्वादिव्यवहारश्चोपपद्यत इति शाङ्करीप्रक्रिया । तत्राविद्यावस्थायामेव निरस्तसमस्तगुणादिविशेषं परं ब्रह्मेति, उपासनार्थं सगुणत्वेन कल्पितं तदेव अपरं ब्रह्मेति च व्यपदेशभेदभाग् भवति । सगुणमपि ब्रह्म विराड्जीवाद्यपेक्षया परं ब्रह्मेत्यपि व्यपदिश्यते इति व्यपेक्षाकृतैवेयं परब्रह्मसंज्ञा अपरब्रह्मसंज्ञा च ; एवं सगुणे इव निर्गुणेऽप्यद्वितीये ब्रह्मणि ईश्वरपरमेश्वरादिशब्दाः व्यपेक्षाबुद्ध्यैव प्रयुज्यन्ते इति विवेकः सुप्रतिपदः सूत्रभाष्याध्वनि कृतपरिश्रमाणाम् ॥

किं च, यद्यपि विशुद्धं ब्रह्म निरस्तसमस्तविशेषत्वात् 'अस्थूलमनणु'– इत्यादिरीत्या द्रव्यगुणक्रियादिधर्मप्रतिषेधमुखैः शब्दैः 'नेति नेति' इत्येवं सामान्येन सर्वविशेषप्रतिषेधेनैव च निर्देशार्हम्, तथापि क्वचिद् 'सत्' 'सत्यम्'

'ज्ञानम्' 'आनन्दः'–इत्यादिभिर्विविधमुखैरपि शब्दैः निर्दिष्टं लक्ष्यते वेदान्तेषु ; तत्रापि प्रकरणादिना निश्चीयते निर्विशेषमेव तथा निर्दिष्टं शब्दप्रवृत्तिनिमित्तमनपेक्ष्यैवेति – इति भाष्ये स्फुटीकृतम् ; अतस्तत्रापि सविशेषनिर्विशेषसङ्करो नाशङ्कनीयो भवति ॥

## व्याख्यानप्रस्थानीयानां भाष्यान्तरकाराणां चापव्याख्या

तदेवं स्थिते सर्वदोषानाविले वेदान्तप्रस्थाने भाष्यप्रयुक्तपरब्रह्म-गुण-धर्म-प्रमुखैः शब्दैर्विमोहिताः केचिद् व्याख्यानप्रस्थानीयाः शुद्धब्रह्म-विज्ञानिनामपि सगुणेश्वरसायुज्यमेव फलं यावत्सर्वेषां जीवानामपवर्गः – इत्येवं श्रुतियुक्त्यनुभवविरुद्धां स्वोपज्ञां प्रक्रियां प्रस्थापयामासुः । भाष्यान्तरकाराश्च निर्गुणब्रह्मविद्यैव नास्ति वेदान्तेषूपदिष्टा इति नवीनमेव वेदान्तप्रस्थानमुपस्थापितवन्तः श्रोतृजनचित्तचालकम् इत्येवं विशुद्धब्रह्मविद्यापथे महाकण्टकबीजवापः संवृत्तः ॥

## प्रकृतव्याख्या

तदेतादृशान् सर्वानपि प्रतिबन्धान् परिहृत्यानाकुलं सगुणनिर्गुणब्रह्मविद्याविवेके निरायासप्रवेशो कथं लभ्येत जिज्ञासूनामित्यालोच्य मया अयमेव छान्दोग्यप्रपाठको व्याख्यानायोपात्तः । यत्कारणमिह हार्दविद्यायां प्रजापतीन्द्रसंवादप्रकाशितपरब्रह्मविद्यायां च ब्रह्म समानैरेव विशेषणशब्दैर्निर्दिष्टम्, तत्प्राप्तिसाधनं च समानैरेवान्वेषणविजिज्ञासादिशब्दैर्व्यपदिष्टम्, विद्याफलं च प्रायशः समानैरेव शब्दैर्वर्णितमित्यतः पण्डितानामपि एकरूपमेव ब्रह्म, ब्रह्मप्राप्तिफलं चेहोक्तमिति व्यामोहो कदाचिज्जायेत । अतोऽत्र परविद्याऽपरविद्याविभागे विविक्ततया प्रदर्शिते निष्प्रत्यूहः स्यात् विद्याद्वयरहस्यविवेकः सर्वत्रेति ॥

## उपसंहारः

अत्र यावान् मत्प्रयत्नः सफल इत्यत्र तु विद्वत्प्रकाण्डा एव प्रमाणम् । संप्रार्थ्यन्ते च विज्ञाः यदत्रोपलब्धान् भाषादोषान् विचारसरणिदोषांश्च

मामावेद्याधमर्णं कुर्युः, येन संस्करणान्तरे तान् सर्वान् सकृतज्ञप्रकटनं परिमार्जयितुं प्रभवेयम् । एतस्मिन् प्रथममुद्रणे सकृदवलोकनपूर्वकं ग्रन्थ-संशुद्ध्यै तत्र तत्र सूचनां प्रदत्तवते ब्र॥ श्री॥ परकुळे सुब्रह्मण्यभट्टः, वेदान्त-शिरोमणिव्याख्याविचक्षणः– इत्येतस्मै, मुद्रणावसरे अक्षरस्खालित्यापसारणे उपकृतवते ब्र॥ श्री॥ लक्ष्मीनरसिंहमूर्तिशास्त्री, अध्यात्मविद्याप्रवीणः– इत्येतस्मै च मम हार्दिकं नारायणस्मरणमिहादिशामि । प्रीयतां च भगवान्नारायणोऽनेन भक्त्युपहृतेनाल्पकायेन ग्रन्थपुष्पेण इति सप्रणामप्रार्थना।

श्रीशङ्करचरणस्मरणावलम्बिनः

**व्याख्याकारस्य**

# विषयानुक्रमणिका

☞ अत्र कंसान्तर्भाविताः पद्यसङ्ख्याः

पत्रपार्श्वाणि

प्रकाशकानां प्राक्कथनम् 3

आंग्ली प्रास्ताविकी विज्ञप्तिः 4–8

गैर्वाणी प्रास्ताविकी विज्ञप्तिः 9–11

## अथ हार्दविद्यारहस्यविवृतिः

### ग्रन्थसंबन्धः

वृत्तानुद्रवणम् (१-२)-वर्तिष्यमाणार्थसङ्क्षेपः, तत्र हृदयपुण्डरीकोपदेशना (३) ब्रह्मोपासनाविधानार्थमपि ग्रन्थारम्भः (४) – ब्रह्मचर्यलक्षणसाधन-विधानार्थमपि ग्रन्थारम्भः (५) – ब्रह्मलोकप्राप्तये गत्युपदेशार्थमपि ग्रन्थारम्भः(६)-मध्यमाधिकारिणां सविशेषब्रह्मोपदेशो मुख्याभिप्रायः(७) १–६

### १. दहराकाशोपासनाविधिः

ब्रह्मपुरशब्दार्थः (८) – शरीरस्य पुरत्वं कथम् ? (९) – 'दहरं पुण्डरीकं वेश्म' इत्युपलब्धिदेशनिर्देशः (१०)-'आकाशः' इति ब्रह्मोच्यते(११)- 'तस्मिन् यदन्तः' इति किं निर्दिश्यते ? (१२) ७–१०

### २. उपास्यविषये शङ्कापरिहारौ

उत्तरवाक्यद्वयस्यार्थः (१३) – आकाशस्य दहरत्वं न विवक्षितम् (१४) – दहराकाशस्यान्तरेव द्यावापृथिव्यादि (१५) ११–१३

### ३. आत्मा पाप्मादिसर्वदोषवर्जितः

शङ्का-ब्रह्मपुरे कथं सर्वं समाहितम् ? (१६) – सत्ये ब्रह्मपुरे सर्वाः कामाः समाहिताः (१७) – उपास्यात्मनः स्वरूपम् (१८) – अनुपासकानां कामाः परिच्छिन्नाः(१९) – अनुपासकानां कामाः क्षयिष्णवः(२०) १३–१९

### ४. मुक्तस्य सर्वेषु लोकेषु कामचारः

ब्रह्मलोकं गतस्य सर्वत्र कामचारः(२१)-कामचारवर्णनोपसंहारः(२२) १९-२२

### ५. ब्रह्मात्मस्थानां कामानामप्राप्तौ हेतुः

बाह्यविषयतृष्णैव आत्मैश्वर्यप्राप्तेः प्रतिबन्धः (२३) – विद्यमानानामेव कामानामप्राप्तौ दृष्टान्तः (२४) २२-२५

### ६. ब्रह्मात्मा हृद्येव विज्ञातव्यः

हृदयशब्दनिर्वचनम् (२५) – हृदयमात्मा – इति विजानतः फलम् (२६) २५-२७

### ७. हार्दब्रह्मविदः स्वरूपेण निष्पत्तिः, ब्रह्मणः सत्यशब्दाभिधेयत्वं च

विदुषः शरीरात् समुत्थानं स्वरूपेणाभिनिष्पत्तिश्च (२७) – ब्रह्मणः सत्यनामकत्वम् (२८)– सत्यानृतनियामकं ब्रह्म (२९) २७-३१

### ८. ब्रह्मणः सेतुत्वेनोपासनविधानम्

ब्रह्मणः सेतुत्वम् (३०) – परमात्मा लोकानां विधारयिता (३१) – परमात्मसेतुं तीर्णस्य सर्वसंसारदोषविमुक्तत्वम् (३२) – सेतुमहिमोक्त्युपसंहारः (३३) ३१-३५

### ९. ब्रह्मसाक्षात्कारे ब्रह्मचर्यं परमं साधनम्

ब्रह्मचर्यविधिः (३४) – ब्रह्मचर्यसंस्तुतिरवश्यकर्तव्यत्वविज्ञापनाय (३५) – उपसंहारवाक्यार्थः (३६) – ब्रह्मलोकस्य कामसतत्त्वचिन्ता (३७) ३५-४१

### १०. हृदयनाडीनां रश्मिसंबन्धः

उत्तरग्रन्थसंबन्धः (३८) नाडीनां विविधवर्णरसपूर्णत्वे आदित्यो हेतुः(३९)– आदित्यरश्मीनां नाडीभिः संबन्धः (४०) ४१-४४

### ११. सुषुप्तिर्नाडीषु भवति

सुषुप्तप्राप्तिक्रमः (४१) ४४-४६

## १२. उत्क्रान्तिकथनार्थं मरणावस्थावर्णनम्

उत्क्रान्तिपर्यन्तं संज्ञानुवृत्तिः (४२) ४७

## १३. उत्क्रान्त्यनन्तरं विदुषो रश्मिभिरूर्ध्वगमनम्

उत्क्रान्तिक्रमः (४३) – विदुषो नाडीविशेषद्वारैवोर्ध्वगतिः (४४) – विदुषाऽनुसर्तव्यो देवयानमार्गः (४५) ४८-५१

## १४. मोक्षनाडीप्रशंसा

मूर्धन्यनाड्येवैका अमृतत्वाय (४६) ५१-५२

# अथ परब्रह्मविद्यारहस्यविवृतिः

## १. प्रजापतिसन्देशः

उत्तरग्रन्थसंबन्धः (४७) – निरुपाधिकब्रह्मोपदेशार्थोऽप्युत्तरो ग्रन्थः(४८)– आख्यायिकार्थः (४९) – सन्देशवाक्यार्थः (५०) ५३–५६

## २. इन्द्रविरोचनयोः प्रजापत्युपसत्तिः

इन्द्रविरोचनयोरभिगमने हेतुः (५१) ५६–५७

## ३. इन्द्रविरोचनयोर्ब्रह्मचर्यवासः, प्रश्नश्च

शिष्ययोः परिप्रश्नः (५२) ५७–५८

## ४. अक्षिपुरुषोपदेशः

प्रजापतेः प्रतिवचनम् (५३) – शिष्ययोः प्रश्नः, तदपाकरणं च (५४) ५८-६०

## ५. उदशरावे प्रतिबिम्बदर्शनं प्रति विचारः, शिष्ययोः प्रतिनिवृत्तिश्च

प्रजापतेराशयः (५५) – साध्वलङ्करणग्रन्थाभिप्रायः(५६)– इन्द्रविरोचनयोः प्रतिगमनम् (५७) ६०–६३

## ६. विरोचनस्य सिद्धान्तः

शिष्ययोर्गतयोः प्रजापतेः पुनःसन्देशः(५८) – विरोचनस्य सिद्धान्तः(५९)– आसुरमतनिन्दा (६०) ६३-६६

## ७. इन्द्रस्य सम्यग्दर्शनार्थं पुनरपि गुर्वभिगमनम्

इन्द्रस्य छायापुरुषरूपे दोषदर्शनम् (६१) – एकस्यैव वाक्यस्य भिन्नार्थ-
दायकत्वं कथम् ? (६२) ६६–६९

## ८. इन्द्रस्य पुनरपि ब्रह्मचर्यवासः

प्रजापतेः प्रतिवचनम् तदभिप्रायश्च (६३) – भूयोभूयः प्रश्नप्रतिवचनोप-
न्यासे श्रुत्याशयः (६४) ६९–७०

## ९. स्वप्नात्मोपन्यासः

स्वप्नोपन्यासे प्रजापतेराशयः (६५) ७१–७२

## १०. इन्द्रस्य पुनर्गुरूपसदनं ब्रह्मचर्यवासश्च

प्रजापतिप्रतिवचनाभिप्रायः (६६) ७२–७३

## ११. सुषुप्तात्मोपदेशः

इन्द्रकृता सुषुप्तात्मनि दोषाशङ्का (६७) ७४–७५

## १२. इन्द्रस्य ब्रह्मचर्यवासः

'एवमेवैष' इत्यादिवाक्याभिप्रायः (६८) – आत्मज्ञानप्रशंसा (६९) ७५–७६

## १३. अशरीरत्वमेव परमपुरुषार्थः

सशरीरस्य प्रियाप्रियात्तत्वम्, अशरीरस्य तत्स्पर्शाभावश्च (७०) – आत्मनः
सशरीरत्वं मिथ्याज्ञानकल्पितम् (७१) – अशरीरस्यैव सशरीरत्वेन
भावने दृष्टान्तः (७२) – जीवस्य शरीरात्समुत्थानं स्वेन रूपेणाभि-
निष्पत्तिश्च (७३)– शरीरात्समुत्थाने स्वरूपेणाभिनिष्पत्तौ च शङ्का (७४)
– शङ्कापरिहारः (७५) – उत्तमपुरुषतत्त्वम् (७६) – जीवन्मुक्तस्य
विभूतिः (७७) – जीवन्मुक्तस्य सशरीरत्वमिव (७८) – विदुषः सर्व-
प्रवृत्त्यसंबन्धः(७९) – प्राणव्यापारान्वाख्याननिर्गलितार्थः (८०) ७६–८९

## १४. कूटस्थचैतन्यरूपता आत्मनः

आत्मनश्चक्षुरादिसंबन्धः कीदृशः ? (८१)–आत्मनो मनःसंबन्धः(८२) ९०–९३

## १५. ब्रह्मात्मविद्यास्तुतिः

आत्मोपासनेन देवानां सर्वलोककामावाप्तिः (८३) ९३–९५

१६. आत्मोपासकस्य जप्यो मन्त्रः

ग्रन्थसंबन्धः (८४) – उपासनेतिकर्तव्यता मन्त्रसूचिता (८५) ९५ ९९

१७. ब्रह्मणो लक्षणम्

ब्रह्मणो नामरूपव्याकर्तृत्वम् (८६) – नामरूपाभ्यां विलक्षणं ब्रह्म (८७) – उपासकस्य प्रार्थनामन्त्रः (८८) ९९–१०२

१८. उपसंहारः

ग्रन्थसंबन्धः (८९) – ज्ञानसाधनानि (९०) १०२–१०५

अथ परिशिष्टचिन्ता

परापरब्रह्मविद्याविभागस्य सतत्त्वं विचारणीयम् (९१)–निर्गुणवस्तुप्रतिपादकवाक्यान्येव न सन्तीति मतम् (९२) – सगुणब्रह्मैकवादिनां वाक्यव्याख्यानम् (९३) १०५–१०९

सगुणेश्वरैकान्त्यवादनिराकरणम्

ब्रह्मणि प्रमाणाप्रवृत्तिः प्रमातृत्वस्याविद्याकृतत्वात् (९४) – प्रमेयानामाविद्यकत्वादपि ब्रह्मणि प्रमाणाप्रवृत्तिः (९५) – ब्रह्मणः श्रुतिप्रमाणकत्वं कथम् ? (९६) – श्रुतियुक्त्यनुभवसिद्धत्वं निर्गुणब्रह्मवादस्य (९७) – शङ्कावादिकृतश्रुतिव्याख्यादूषणम् (९८) – अन्तर्यामिब्राह्मणोक्त एव परमात्मा प्रजापतिनोक्तः (९९) – मुक्तस्य सगुणेश्वरभावापत्तिरिति व्याख्यानप्रस्थानम्, तद्दूषणं च (१००) – मुक्तस्य सगुणेश्वरमात्रप्राप्तिरिति मतस्य भाष्यबाह्यत्वम् (१०१) – हार्दविद्याप्रजापत्युपदिष्टविद्ययोर्विषये साम्यवैषम्ये (१०२) – परापरब्रह्मविद्याविभागः कथमवधारणीयः ? (१०३) – प्रकृतविद्ययोरन्वेषणविजिज्ञासासतत्त्वविवेकः (१०४) – उभयविद्याफलयोर्लोककामावाप्तेः स्वरूपम् (१०५) १०९–१२४

अथ छान्दोग्याष्टमप्रपाठकान्तर्गतहार्दविद्यासारः १२५–१२७

इन्द्रप्रजापतिसंवादग्रन्थसारः १२८–१३१

उपनिषदुपसंहारः १३१–१३२

# अशुद्धशोधनम्, संयोजनं च

| पत्रपार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| १ | अ. २ | इति, | इति |
| ६ | अ. ४ | धौरेयेणां | धौरेयाणां |
| १० | अ. ६ | ...वर्ति कामवत् | ...वर्तिकामवत् |
| ,, | अ. ३ | स्वशब्देऽनुवेद्यत्वेन | स्वशब्देनानुवेद्योऽभिहित |
| १३ | ९ | विद्यन्न | विद्युन्न |
| ३३ | अ. ४ | रूपसंपद्यं | रूपसंपद्य |
| ,, | अ. २ | स्थूलसूक्ष्मान्यतरशरीर | शरीर |
| ३८ | १ | ब्रह्मचर्यवता | ब्रह्मचर्यवतो |
| ,, | २ | ब्रह्मोपासकेनेहैव | ब्रह्मोपासकस्येहैव |
| ,, | ६ | ब्रह्मचर्यशब्दा | शब्दा |
| ,, | अ. ९ | सह | सह त्राणं |
| ,, | अ. ८ | कामा | सत्याः कामा |
| ४३ | ९ | भवन्ति | भान्ति |
| ४५ | ४ | न कश्चन | कश्चन |
| ४८ | ६ | | (त्यक्तव्योऽत्रत्यः श्लोकः) |
| ५३ | अ. ६ | पूर्वकं निरन्तरो | पूर्वकनिरन्तरो |
| ५३ | अ. २ | तस्य च ... इत्युक्तम् । | (त्याज्यमिदं वाक्यम्) |
| ६१ | ७ | (अत्र संयोज्यं शीर्षकम्) | 'प्रजापतेराख्यः' |
| ६४ | ३ | पुनः सन्देहः | पुनःसन्देशः |
| ७७ | १ | (संयोज्यं शीर्षकम्) | 'सशरीरस्य प्रियाप्रियोपहति-मृत्युग्रासयोर्योग्यता' |

| पत्रपार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| ७७ | अ. ४ | स्वप्नदर्शनं (एतदनन्तरं संयोज्यम्)'इन्द्रियाभासाननुपादा | |
| ८१ | ९ | मपहृत | मुपहृत |
| ८३ | अ. ६ | ...त्वे | ...त्वेन |
| ८३ | ८ | (संयोज्यं शीर्षकम्) | 'शङ्कापरिहारः' |
| ८३ | अ. ५ | न्न कथमपि | कथमपि |
| ८४ | अ. २ | व्याकृताव्याकृत | तत्र व्याकृताव्याकृत |
| ९२ | ६ | इति हि | इत्यपि हि |
| ,, | अ. ४ | करणमितीत्याह | करणमित्याह |
| ९५ | अ. ३ | आमोपासकस्य | आत्मोपासकस्य |
| ९८ | ७ | इति शब्दो | इतिशब्दो |
| ,, | अ. ४ | मप्यरहरहः | मप्यहरहः |
| ९९ | १ | इतिवर्णित | इति वर्णित |
| ९९ | ८ | इत्यादिभिः | इत्यादिभ्यः |
| १०२ | १ | विशां | राज्ञां विशां |
| ,, | ९ | द्विर्वेचन | द्विर्वेचनं |
| ,, | १० | मत्यन्त | स्त्रीव्यञ्जनस्यात्यन्त |
| ११६ | १ | प्रत्यगात्मना | प्रत्यगात्मा |
| ,, | अ. ९ | परस्मात्मा | परमात्मा |
| १२३ | २ | सामर्थ्यमपेक्ष्यते | सामर्थ्यमप्यपेक्ष्यते |
| १२६ | ११ | नैवेनं | नैवैनं |

सूचना—सूक्ष्माणां दोषाणामिह न संग्रहः कृतः ॥

॥ ॐ ॥

# हार्दविद्यारहस्यविवृतिः

## ग्रन्थसंबन्धः

### तत्र वृत्तानुक्रमणम्

१. ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यः । ओं नमः श्रीशङ्कराचार्यभगवत्पादेभ्यः । नमो गुरुभ्यः । अथ छान्दोग्योपनिषदन्तर्गतो हार्दविद्यारहस्यसारसंग्रहभूतोऽष्टमः प्रपाठको यथामति विव्रियते साम्प्रदायिकसरणिमनुसृत्य ॥

२. अस्य संबन्धः । एकमेवाद्वितीयं सन्मात्रं ब्रह्म भूमाख्यं जगज्जन्मादिकारणम्, तदेव च सर्वस्याऽऽत्मा – इत्यधिगतं षष्ठसप्तमयोः । तथा हि षष्ठे ' सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ' (६–२–१) इत्युपक्रम्य, 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' (६–२–३) इत्यादिना तत एव भूतसृष्टिमाख्याय, ' सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् ' (६–३–२) इति, तस्यैव सतो जीवात्मना सृष्टभूतानुप्रवेशं नामरूपव्याकरणं च शिष्ट्वा, भूतानामुत्तरोत्तरस्य पूर्वपूर्वमूलकत्वम्, सत एव

परममूलत्वं चोपदिश्य 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'(६–८–४) इति कार्यमात्रस्य जन्मस्थितिलयकारणं सदाख्यं ब्रह्मैवेत्यवधार्य, विविधैर्दृष्टान्तैः सर्वस्यापि कार्यस्य सदात्मकत्वमुपपाद्य, तत्तदाशङ्कापराकरणपूर्वकं प्रतिपर्यायं 'स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (६–८–७, ६–९–४, ६–१०–३, ६–११–३, ६–१२–३, ६–१३–३, ६–१४–३, ६–१५–३, ६–१६–३) इत्युपसमहरदिति सर्वमेवेदं चराचरं जगत् सन्मात्रब्रह्मात्मकम् तदनन्यच्च परमार्थतः, प्रतीतरूपेण तु वाचारम्भणमात्रम् इत्येतदर्थप्रतिपादनेनैवोपक्षीणः षष्ठः प्रपाठकः ॥

सप्तमे खल्वपि नारदो देवर्षिः, अधिगतर्ग्वेदादिसर्वविद्यो भगवन्तं सनत्कुमारम् उपससाद ब्रह्मात्मविद्यां शोकविनाशकरीम् अधिगन्तुमिच्छन् । स च भगवान् सोपानारोहणन्यायेन सूक्ष्मत्वव्यापकत्वप्रत्यगात्मत्वधर्मैरुत्तरोत्तरम् उत्कृष्टस्य ज्ञापनेन निरतिशये भूमाख्यतत्त्वे नारदस्य चित्तमवतारयितुम्, तेनाधीतं यत्किञ्चित् तत्सर्वं नामैवेति प्रत्यज्ञास्त । ततोऽपि नाम्नः सूक्ष्मतराणि वाङ्मनःसङ्कल्पचित्तविज्ञानबलान्नापेजआकाशस्मराऽऽशाप्राणसंज्ञकानि तत्त्वानि उत्तरोत्तरभूयांसि ब्रह्मत्वेनोपदिश्य 'प्राण एवैकं सर्वातिशायि तत्त्वं नातःपरमस्तीति निश्चयेन जिज्ञासाया उपरतं नारदं परमसत्ये भूम्नि मुख्यात्मत्वज्ञापनेन स्वाराज्ये अभिषेचयितुकामः 'एष तु वा अतिवदति यः सत्येनातिवदति' (७–१६–१) इति पुनरपि तज्जिज्ञासामुपजीव्य तदधिगमसाधनानि विज्ञानमननश्रद्धानिष्ठाकृत्याख्यानि प्रथममुपदिश्य तदनु

भूमाख्यमद्वितीयं ब्रह्मात्मानं निरतिशयनित्यानन्दरूपं सर्वगतं सर्वात्मकं सर्वोपाधिसंपर्करहितं सर्वसंसारदुःखातीतं तत्त्वम् अवगमितवान् । इति वृत्तार्थः सङ्क्षेपतः ॥

## अथ वर्तिष्यमाणार्थसङ्क्षेपः, तत्र हृदयपुण्डरीकोपदेशना

३. तदेतावता यद्यपि दिग्देशकालादिपरिच्छेदशङ्कानवकाशमेव परं ब्रह्म – इत्युत्तमाधिकारिभिः सुशकं विज्ञातुम्, तथापि व्यावहारिकदृष्ट्या, 'यद्यद् वस्तुत्वेन दृष्टम्, तत् सर्वं दिग्देशकालादिभेदपरिच्छिन्नमेवोपलभ्यते । सर्वमपि हि विद्यमानत्वेन निश्चीयमानं वस्तु कस्मिंश्चिद् दिग्विशेषे प्राच्यादौ, कस्मिंश्चिद् देशविशेषे भूम्यन्तरिक्षाद्येकदेशभूते, कस्मिंश्चित् कालविशेषे वर्तमानभूतादौ प्रातर्मध्याह्नादिना सुचिन्त्ये एव वर्तमानं दृष्टमिति दिग्देशाद्यपरिच्छिन्नं वस्तुसदिति चिन्तितुमप्यशक्यम्' – इति भवति मतिर्दिग्देशादिपरिच्छिन्नपदार्थपरिचयभावितबुद्धीनां प्राकृतानाम् । तदेतादृशानां मन्दबुद्धीनाम् अनुग्रहार्थं नित्यनिरुपाधिके ब्रह्मणि क्रमक्रमेण चित्तावतारो यथा स्यादिति देहान्तःस्थितहृदयपुण्डरीकदेशे इदानीमेव शक्यं भावनया साक्षात्कर्तुं ब्रह्म – इत्युपदेष्टुकामा श्रुतिरिदमारभते 'अथ यदिदमस्मिन् ब्रह्मपुरे' इत्यादि ॥

## ब्रह्मोपासनाविधानार्थमपि ग्रन्थारम्भः

४. ननु देशरहितं चेद् ब्रह्म समुपदिदिक्षितम्, कथं तदननुरूपं देशपरिच्छिन्नत्वेन तदुपदेशनम् ? कथं च विपरीतवादिनी श्रुतिः प्रमाणं स्यादिति ? अत्रोच्यते । यद्यपि नित्यनिरुपाधिकं निर्गुणं

निराकारमेव च ब्रह्म परमार्थतः, तथापि न सर्वैरपि जिज्ञासुभिस्तथैव सहसा शक्यते आकलयितुम्, विचित्रप्रज्ञाभूमिकास्थत्वात् अधिकारिणाम्। सगुणं साकारमेव तु वा वस्तु विनाऽऽयासं शीघ्रं बुद्धिमारोहति मन्दमध्यमाधिकारिणाम् इति व्यवहारदृष्ट्या। सर्वकारणत्वात् अविद्याकल्पितनामरूपकृतोपाध्यपेक्षया सगुणं साकारमपि भवति ब्रह्म, सत्यकामत्वादिगुणविशिष्टम् – इत्युपदेशो न विरुध्यते। न चैवम् अविद्याकृतरूपवत्त्वोपदेशात्, अप्रामाण्यं श्रुतेः शङ्कनीयं भवति; अविद्यावस्थायामेव तत्तधिकारिचित्तभूमिकानुगुण्येन व्यावहारिकसत्यभूतानेव गुणान् आकारांश्चोपदिशन्त्या अप्रामाण्यशङ्कानवतारात्। उक्तं चाभियुक्तैः – 'आश्रमास्त्रिविधा हीनमध्यमोत्कृष्टदृष्टयः। उपासनोपदिष्टेयं तदर्थमनुकम्पया॥' (गौ. का. ३ १६) इति। निराकारस्यापि परमेश्वरस्य ध्यायिनामुपकारायाकारस्वीकारोपपत्तेः, तादृशाकारस्यापि व्यावहारिकसत्यत्वानपायात्। तथा हि भगवान् भाष्यकार आह – "स्यात् परमेश्वरस्यापि इच्छावशान्मायामयं रूपं साधकानुग्रहार्थम्। .... । अपि च यत्र तु निरस्तसर्वविशेषं पारमेश्वरं रूपम् उपदिश्यते, भवति तत्र शास्त्रम् 'अशब्दमस्पर्शमरूपमव्ययम्' इत्यादि; सर्वकारणत्वात्तु विकारधर्मैरपि कैश्चिद् विशिष्टः परमेश्वरः उपास्यत्वेन निर्दिश्यते॥" (सू. भा. १–१–२०, पा. ४५) इति॥

## ब्रह्मचर्यलक्षणसाधनविधानार्थमपि ग्रन्थारम्भः

५. एवम् उपासनाधिकारसंपत्त्यर्थं ब्रह्मचर्यं विधातव्यम् इत्यतोऽपि ग्रन्थ आरभ्यते। यद्यपि सम्यग्ज्ञानार्थं ब्रह्मजिज्ञासुभिर्विवेक-

वैराग्यशमदमादिसंपन्नैरेव भाव्यम् । विज्ञानानन्तरं च सर्वकामानां ब्रह्मानन्यत्वावगतेर्न विषयविषया तृष्णा अवशिष्यत इति न पृथक् तत्र ब्रह्मचर्योपदेशोऽर्थवान्, तथापि सत्यकामादिगुणविशिष्टब्रह्मोपास्त्या कालान्तरे सर्वकामावाप्तिर्वक्तव्या, तदर्थं च लौकिकानृतविषयाभिसन्धिः परित्याजयितव्येति पृथग् ब्रह्मचर्यसाधनविधानमिहार्थवद् भवतीति ॥

## ब्रह्मलोकप्राप्तये गत्युपदेशार्थमपि ग्रन्थारम्भः

६. **अत एवेह** यथेष्टकामावाप्तये गतिरपि वक्तव्या । यद्यपि '**ब्रह्मविदाप्नोति** परम्' (तै. २-१) इत्यादिमुख्यब्रह्मोपदेशस्थले ब्रह्मणो जिज्ञासुव्यतिरिक्तत्वम् अविद्यामात्रकृतमिति ब्रह्मविद्याधिगमसमसमयैव ब्रह्मप्राप्तिः, सर्वेषां च कामानां ब्रह्मानन्यत्वाद् ब्रह्मप्राप्त्यैव सर्वकामावाप्तिरपि भवतीति न ब्रह्मप्राप्तिव्यतिरेकेण कामावाप्तिप्रकारस्तत्साधनविशेषो वा पृथग् वक्तव्योऽवशिष्यते, तथापीह हृदये साक्षात्कृतसत्यसङ्कल्पब्रह्मणाम् उपासकानां मूर्धन्यनाडीद्वारेण ब्रह्मलोकं गतानामेव ब्रह्मसमानैश्वर्यम्, सङ्कल्पमात्रेण तत्तत्कामावाप्तिश्च भवितेति, गतिप्रकारोपीह पृथग् वक्तव्यः – इत्यतोऽपि परो ग्रन्थ आरभ्यते ॥

## मध्यमाधिकारिणां सविशेषब्रह्मोपदेशश्रुत्यभिप्रायः

७. तदेवम्, पराग्दिशोऽनवलोकयतः, चित्तस्य प्रत्यक्प्रवणतां संपाद्य देशान्तरव्यावृत्तहृदयदेशे एव ब्रह्मणि मनःसमाधानार्थम्, विविधवासनादोषपङ्किलस्य मनसः सत्यकामत्वसत्यसङ्कल्पत्वादिगुणयुक्तब्रह्मध्यानेन तत्साक्षात्करणयोग्यतापादनार्थम्, यावज्जीवं तदुपासनेन

मूर्धन्यनाड्या ब्रह्मलोकप्राप्तिक्रमचिन्तनोपदेशनार्थम्, ततश्चोपासनावीर्येण सङ्कल्पमात्रेणाभिलषितकामावाप्तिरिति फलोपदेशार्थं च परो ग्रन्थ आरभ्यते ॥

यद्यपि दिग्देशकालगतिसङ्कल्पकामादिः सर्वो विशेषोऽप्यविद्याप्रत्युपस्थापित एवेति तेनासंपृक्तमेव परं ब्रह्म, तथापि येषां निर्विशेषं वस्तु परमार्थसदपि असदिवाऽऽभाति, तेऽपि देशकालगुणादिविशिष्टवस्तुभावनाभावितधियः श्रद्दधाना व्यावहारिकसत्यगुणादियुक्तमेव ब्रह्मोपदिश्य सन्मार्गे प्रवर्तयितव्याः ; तेषामपि देशान्तरे कालान्तरे परिशुद्धचित्तानां क्रमेण सम्यग्ज्ञानेऽप्यधिकारो भविता । येषां पुनर्निपुणमतीनां नित्यनिर्विशेषब्रह्मजिज्ञासायां प्रथममेवाविशति चेतः, तेषां पुरुषधौरेयेणां तदेव ब्रह्म यथावस्थितवस्तुसतत्त्वनिरूपणमार्गेणैव प्रतिपादयिष्यामीति मन्यते श्रुतिः । एतच्च तदेवापहतपाप्मत्वादिधर्मकं ब्रह्मात्मतत्त्वं दहरवाक्ये प्रजापतिवाक्ये च समानाक्षरैर्वाक्यैरुपदिशन्त्या श्रुत्या स्वयमेव प्रकाशयिष्यत इति सर्वमनाकुलम् ॥

---

# १. दहराकाशोपासनाविधिः

( उपनिषदि अष्टमे प्रथमः खण्डः )

**अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ॥ १ ॥**

## ब्रह्मपुरशब्दार्थः

८. **अथेति ।** इदानीं ब्रह्मण उपलब्ध्यर्थं हृदयान्तःप्रदेशम् उपदेष्टुमारम्भ इति सूचयितुम् अथशब्दः । उत्तमाधिकारिणां सद्योमुक्त्युपायोपदेशानन्तरं मध्यमाधिकारिणोऽप्यनुग्राह्या यतः, अतस्तेषां कृते इदमुपासनं क्रममुक्तिफलकम् इदानीमुपदिश्यत इत्यभिप्रायः ॥

तत्र ब्रह्म कुत्रोपलब्धव्यम् ?—इति शङ्कायां देशं तावन्निर्दिशति **'यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म'** इति । 'ब्रह्मपुरे' इति शरीरमुच्यते, 'पुरमेकादशद्वारम्'(का. ५–१) इति श्रुत्यन्तरात् । ब्रह्मणश्चेदं पुरम् 'अजस्यावक्रचेतसः' इति तत्रैव वाक्यशेषेण तथोच्यमानत्वात् । यद्यपि जीवोऽपि पुरस्य स्वामी, तत्कर्मार्जितत्वात् शरीरस्य, तथा च तस्यापि च ब्रह्मशब्देन व्यपदेश उपपद्यत एव ; तथापि, एतस्मिन्नेव शरीरे ब्रह्मापि सन्निहितमेव 'अनश्नन्नन्योऽभिचाकशीति' (मुं. ३–१–१), 'ऋतं पिबन्तौ' (का. ३–१) इत्यादिश्रुतिभ्यः ।

'परात्परं पुरिशयं पुरुषमीक्षते' (प्र. ५-५), 'सर्वासु पूर्षु पुरिशयः' (बृ. २-५-१८) इति च ब्रह्मणः पुरुषाख्यस्य साक्षादेव पुरसंबन्धावगमात्। 'ब्रह्म'शब्दस्य तस्मिन्नेव मुख्यत्वाच्च ब्रह्मग्रहणमेव युक्ततरम्। गौणमुख्ययोर्हि मुख्ये संप्रत्ययः शीघ्रतरं भवति। तस्मात्, 'ब्रह्मपुरे' इति ब्रह्मण एव पुरमेतत्—इति न्याय्यम्॥

## शरीरस्य पुरत्वं कथम्?

९. पुरत्वं चास्य शरीरस्यात्र द्वारद्वारपालाधिष्ठात्राद्यनेकपुरोपकरणसंपत्तिदर्शनात्। सन्ति ह्यत्रैकादशद्वाराणि, द्वारपालस्थानीयानीन्द्रियाणि, तदधिष्ठातृदेवताश्चाक्र्यादयः। यथा च पुरं सोपकरणं स्वेनासंहतस्वतन्त्रराजार्थं भवति, एवम् इदमपि शरीरं स्वेनासंहतब्रह्मार्थं भवति। सर्वा हि कार्यकरणसङ्घातप्रवृत्तिः, तत्साक्षीभूतब्रह्मात्मचैतन्यकर्मत्वापत्तिनिमिता, तद्यास्मा तत्स्वरूपभूतानागत्यवसाना चेति युक्तमेव तस्य ब्रह्मपुरत्वम्॥

## 'दहरं पुण्डरीकं वेश्म' इत्युपलब्धिदेशनिर्देशः

१०. तस्मिन्नेतस्मिन् ब्रह्मपुरे '**यदिदं दहरं पुण्डरीकं वेश्म**' इति, प्रत्यक्स्रोतस्तया प्रवर्तिताय पुरुषाय ब्रह्मोपलब्ध्यर्थं देशविशेषं ज्ञापयन्ती श्रुतिराह '**दहरं पुण्डरीकं वेश्म**' इति। यद्यपि सर्वमेवेदं शरीरं ब्रह्मण एव पुरम्, तथापि यथा पुरस्वामी राजा पुरमध्ये स्वे वेश्मनि स्थित एवात्मानं दर्शयते दर्शनकाङ्क्षिभ्यः, एवं ब्रह्मापि 'दहरे पुण्डरीके' एव शक्योपलम्भनं ध्यायिनाम् इति भवति

हृदयपुण्डरीकस्य ब्रह्मवेश्मत्वम् । शरीरापेक्षया यद्यपि हृदयपुण्डरीकस्य दहरत्वं स्वतःप्राप्तमिति न तत् पृथक् प्रतिपादयितव्यम्, तथापि तदन्तःस्थितदहराकाशो ब्रह्मेत्युपदिदिक्षु शास्त्रं 'दहरं पुण्डरीकं वेश्म' इत्यन्वाख्याति । आकाशस्य हि ब्रह्मणः सर्वगतत्वात्, स्वतो दहरत्वाभावेऽपि वेश्मोपाधिवशात् तस्य दहरत्वमुपपन्नम् इत्येतद् द्योतयितुं 'दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः' इत्युच्यते इत्यदोषः । हृदयान्तरेव आकाशवत् सुसूक्ष्मं ब्रह्म तदेकाग्रचित्तैरुपास्यम् इत्यभिप्रायः ॥

## 'आकाशः' इति ब्रह्मोच्यते

११. 'आकाशः' इत्युपास्यब्रह्मणो निर्देशः । 'तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' इति ह्युपास्यत्वमाकाशस्यावधार्यते । ननु कथमाकाशशब्दत्वं ब्रह्मणः ? भूताकाशे हि रूढ आकाशशब्दः । नैष दोषः । अन्वेष्टव्यत्वोपदेशादेव भूताकाशस्य व्यावर्त्यमानत्वात् । 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' (१–९–१) इति, सर्वभूतकारणत्वेन ब्रह्मणोऽप्याकाशशब्देन निर्देशदर्शनात् । उदर्के च 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म' (८–१४–१) इतीहापि नामरूपनिर्वहणसमर्थस्य ब्रह्मण एवाकाशशब्देनाख्यास्यमानत्वाच्च । यद्यपि जीवोऽपि हृदयपुण्डरीकेऽन्तर्विद्यत एव, द्रष्टृश्रोत्रादिरूपेण तत्रान्तर्विभाव्यमानत्वात्; तथापि तस्य बुद्ध्युपाधिपरिच्छिन्नत्वात्, सर्वगताकाशवाचकेन शब्देनाभिधेयत्वं नावकल्पते । 'अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (६–३–२)

इति षष्ठे एवोक्तत्वाच्च, येन रूपेण तस्याऽऽकाशशब्दार्हत्वमवकल्पते, तस्यैवाशरीरस्य, सूक्ष्मस्य, सर्वगतस्य ब्रह्मणोऽत्राकाशशब्दशब्दितत्वमिति युक्तं कल्पयितुम् ॥

## 'तस्मिन् यदन्तः' इति किं निर्दिश्यते ?

१२. नन्वेतत् सर्वमवकल्पेत यद्याकाशस्यैवेहान्वेष्टव्यत्वं विधीयेत । न तु तदस्ति । 'तस्मिन् यदन्तस्तदन्वेष्टव्यम्' इति हि आकाशे यदन्तस्तदेवेहान्वेष्यतया निर्दिश्यते । आकाशस्यैवान्वेष्टव्यत्वविवक्षणे कथमिदं तस्य परविशेषणत्वेनोपादानम् उपपद्येतेति ?

अत्रोच्यते । 'तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' इत्यत्रापि आकाशस्य तदन्तःस्थितस्य चान्वेष्टव्यत्वं विवक्षितमित्यवश्यमभ्युपगन्तव्यम् । इतरथा आकाशस्वरूपवर्णनमुत्तरत्रोपलभ्यमानम्, 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः' (८–१–३) इत्येतन्न सङ्गच्छेत । उपास्यस्य हि स्वरूपं निर्देष्टव्यम् । न च, एतदप्याकाशान्तर्वर्तिवस्तुस्वरूपनिर्देशार्थमेवेति शङ्क्यम् । आकाशान्तर्वर्ति कामवत्, आत्मनोऽपि हि विज्ञेयत्वं कण्ठरवेण वक्ष्यति, आत्मकामोभयानुवेदनेनैव च फलम्, 'अथ य इहाऽऽत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति' (८–१–६) इति । तत्राकाशशब्दमुत्सृज्याऽऽत्मैव स्वशब्देऽनुवेद्यत्वेनाभिहित इत्यतोऽवगम्यते उपक्रमेऽप्याकाशोऽन्वेष्टव्यत्वेन निर्दिष्टः, स च परमात्मैव– इति च ॥ १ ॥

# २. उपास्यविषये शङ्कापरिहारौ

तं चेद् ब्रूयुर्यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति स ब्रूयात् ॥ २ ॥

यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमिति ॥ ३ ॥

## उत्तरवाक्यद्वयस्यार्थः

१३. 'तं चेद् ब्रूयुः' इति, शङ्कामिषेण यथोक्ताकाशस्वरूपविशेषविषयं प्रश्नमुत्थाप्य तदुत्तरत्वेनोपास्यस्वरूपप्रपञ्चार्थम् ॥

'तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' इत्युक्तवन्तं तम् आचार्यं चेद् ब्रूयुरन्तेवासिनः, चोद्यमिव कुर्वन्तश्चेत् पृच्छेयुः—यदिदमस्मिन् ब्रह्मपुरे शरीरे देशकालवस्तुपरिच्छिन्ने दहरं पुण्डरीकं वेश्म वर्तते तस्मिन्नन्तराकाशः । पुण्डरीकमेव तावदल्पम्, ततोऽप्यल्पीयान् आकाशः । किं तदत्र विद्यते ; तस्मिन्नल्पतरे अन्तः किं वा स्यात् यदन्वेष्टव्यम्, विजिज्ञासितव्यं चेत्युच्यते भवद्भिः ? न किञ्चित्तत्र तादृशमन्वेष्टव्यं वस्तु संभावयामो वयम् ; अतः कृपया तद्विशदीकरणेनानुगृह्णन्त्वाचार्यचरणा इति चेत् परिपृच्छेयुः — इति श्रुतेर्वचनम् ॥

तदेवं पृष्ट आचार्यो ब्रूयात् । कृतार्थाः खलु कर्तव्याः शिष्या अधिकारिणः — इति भावः ॥

## आकाशस्य दहरत्वं न विवक्षितम्

१४. अथाऽऽचार्यवचनम् 'यावान्वा अयमाकाशः' इत्यादि । नात्र दहरत्वं पुण्डरीकापेक्षया अल्पतरपरिमाणवत्त्वं वा अपेक्ष्योक्तं मया ; किं तर्हि, आकाशवदशरीरत्वात्, स्वच्छत्वात्, सूक्ष्मत्वात्, सर्वगतत्वाच्च, आकाशाख्यं ब्रह्म दहरे एव हृदयपुण्डरीके उपासनेन साक्षात्कर्तव्यम् इत्यभिप्रायेण 'दहरोऽस्मिन्नन्तराकाशः' इत्यवोचम् । अन्तःकरणोपाधिनिमित्तं यद्यपि दहरत्वमपि संभवत्येव भूताकाशस्येव घटकरकाद्युपहितस्य ; तथापि यथा घटाकाशः स्वरूपेण सर्वगत एव न वस्तुतो घटादिपरिच्छिन्नः, एवम् अयमपि चिदाकाशो हृदयलक्षणोपाध्यपेक्षया परिच्छिन्न इव, स्वतस्तु यावान् वै अयं प्रसिद्ध आकाशः तावान्, कृत्स्नस्यापि भूताकाशस्यैतद्व्याप्यत्वात् । ब्रह्मणोऽनुरूपस्योपमानस्याभावादेव तु 'यावान्वा अयमाकाशः' इत्युक्तम् । 'आकाशवत्सर्वगतश्च नित्यः' (?) इति श्रुत्यन्तरे इव । उक्तं हि स्फुटतरं श्रुत्यैव 'येनाऽऽवृतं खं च दिवं महीं च' (तै. ना. १) इति । न केवलमेतावान् प्रकृताकाशः, किं त्वव्याकृताकाशादपि महीयानयम् 'यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाश एव तदोतं च प्रोतं च' (बृ. ३–८–७) इति वर्णितात् सर्वव्यापकादव्याकृताकाशादपि व्यापकतरत्वेन 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' (बृ. ३–८–११) इति विज्ञायमानत्वात् ॥

## दहराकाशस्यान्तरेव द्यावापृथिव्यादि

१५. एतदेवाह वाक्यशेषेण **'उभे अस्मिन् द्यावापृथिवी'** इत्यादिना । अस्यायमर्थः । यापीयं शङ्का – किमत्र विद्यते यदन्वेष्टव्यम् इति, तत्रापि शृणुत – यथोक्तरीत्या हृदयान्तर्गतमाकाशाख्यं ब्रह्म सर्वस्मादपि महत्तरं यस्मात्, तस्मात्, अस्मिन् ब्रह्माकाशे **द्यावापृथिवी अन्तरेव समाहिते** । 'यदन्तरा द्यावापृथिवी' (बृ. ३–८–७) इति वर्णितस्याव्याकृताकाशस्यापि एतदन्तर्निहितत्वात्; 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतम्' (मुं. २–२–५) इति श्रुत्यन्तराच्च । '**उभावग्निश्च वायुश्च** सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि सर्वमेतस्मिन्नेव समाहितम्' । उक्तहेतोरेव । '**यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितम्** ॥' यच्चेहास्ति । इह लोके प्रमाणवेद्यतया, अर्थक्रियाकारितया वा यद्यदस्तीत्युच्यते, यच्च कालपरिच्छेद्यतया नष्टं सत् भविष्यत्काले अलभ्यमानं नास्तीति व्यवह्रियते, तत्सर्वमस्मिन् समाहितम्, ब्रह्माकाशे वर्तत एव नित्यदा । सर्वकारणत्वात् ब्रह्मणः; कार्यं हि न जातुचिदपि स्वकारणमत्येतुं शक्नोतीति । तस्मात्, **एतस्यान्वेषणेन** सर्वकामावाप्तिर्भवेदित्यतः सर्वमन्यत् परित्यज्य एतदेवान्वेष्टव्यम् – इत्यभिप्रायः ॥

# ३. आत्मा पाप्मादिसर्वदोषवर्जितः

**तं चेद्ब्रूयुरस्मिꣳश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामा यदैतज्जरा वाऽऽप्नोति प्रध्वꣳसते वा किं ततोऽतिशिष्यत इति ॥ ४ ॥**

स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिता एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पो यथा ह्येवेह प्रजा अन्वाविशन्ति यथानुशासनं यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति ॥ ५ ॥

शङ्का – ब्रह्मपुरे कथं सर्वं समाहितम् ?

१६. अत्र शङ्केरन्नन्तेवासिनः – स्याद् ब्रह्मणि समाहितत्वं सर्वस्यापि; सर्वकारणत्वात्, सर्वगतत्वाच्च ब्रह्मणः। तत्तु, ब्रह्म कथङ्कारम् अल्पपरिमाणे ब्रह्मपुरे अन्तःस्थितं स्यात् ? राज्ञस्तु सशरीरत्वात्, पुरेऽन्तः कस्मिंश्चिद् वेश्मनि स्थितिरुपपद्यत इत्यदृष्टान्तः सः। तत्र कथमिदं सम्भावयिष्यामो यद् ब्रह्मपुरेऽन्तःपुण्डरीकवेश्मनि ब्रह्म तिष्ठति, तस्मिन् सर्वे कामाः समाहिता इति च ? – इति। तदिदमनुवदति श्रुतिः 'तं चेद् ब्रूयुर्यदिदमस्मिन् ब्रह्मपुरे' इत्यादिना। न केवलमिदं पुरस्याल्पीयस्त्वादसंभावितं भाति, किं तु दृष्टविरोधाच्च। कथम् ? यदैतज्जरा वाऽऽप्नोति प्रध्वंसते वा किं ततोऽतिशिष्यत इति ? एतद्धि पुरं शत्रुस्थानीया जरा वयोहानिलक्षणा दुर्बलीकरणेनावश्यम् आक्रामेत्, कालेन। तद्यदा जरा एतत्पुरम् आप्नुयात्, तदा नान्तरीयकमेतद् यदेतदन्तस्थमपि वस्तु शैथिल्यमापद्येतेति; अथवा शस्त्रपातात् अन्यस्माद्वा निमित्तात् प्रध्वंसेतापीदं शरीरमितीदं नासंभावितम्।

न ह्यविकार्यमनुच्छेद्यं वा इदं शरीरम् । तदा किमवशिष्यते ? न किमप्यवशिष्यमाणं संभावयामः । न हि कुण्डे विनष्टे तदाश्रितं क्षीरं न विनश्यति, न च क्षीरनाशेऽपि तदाश्रितं दधि, तदाश्रितः स्नेहो वा अतिशिष्येत । एवं शरीरे विशीर्णे तदाश्रितं हृदयम्, तदन्तरवस्थिताः कामा वा नैवातिशिष्येरन् – इति भावः । यद्यपि कामाः स्वशब्देन नोक्ता आचार्येण हृदयाश्रिताः सन्तीति, तथापि द्यावापृथिव्यादि-सर्वमस्मिन् अन्तरेव समाहितम् इत्युक्तमेव, 'तस्मिन् यदन्तस्तदुपासितव्यम्' इति हृदयाकाशान्तरवस्थितमुपास्यत्वेनोक्तम् ; उत्तरत्राप्येतदेव विशिष्य वक्ष्यति 'अस्मिन् कामाः समाहिताः' (१-५) इति । अतो नानुक्तोपादानं शिष्यैः 'सर्वे च कामाः' इति – इति ध्येयम् ॥

## सत्ये ब्रह्मपुरे सर्वाः कामाः समाहिताः

१७. एवं चेदन्तेवासिनः शङ्कामुपस्थापयेयुः, तदा स आचार्यस्तां परिहरिष्यन् ब्रूयात् –इति श्रुतेर्वचनम् । किं ब्रूयादिति ? तत्राऽऽह – '**नास्य जरयैतज्जीर्यति न वधेनास्य हन्यते**' । यद्यप्युपासनार्थं स्थाननिर्दिदिक्षया 'अस्मिन् ब्रह्मपुरे' इति शरीरं विशेषितम्, तथापि न वस्तुवृत्तेनेदमेव ब्रह्मपुरम्, किं तर्हि, एतदन्तर्वर्ती यो ब्रह्माकाशः तदेतत् '**सत्यं ब्रह्मपुरम्**' । तस्मिन्नेतस्मिन् ब्रह्माख्ये पुरे सर्वव्यवहारास्पदे सर्वे '**कामाः समाहिताः**' । एनमजानन्तो भवन्तो बहिरेव तान् कामान् प्रार्थयन्ते । एतदेव च ब्रह्मपुरं सत्यं भवताम् आत्मा । अत एतत्प्राप्त्युपायमेवानुतिष्ठत बाह्यविषयां तृष्णां त्यक्त्वा – इत्यभिप्रायः ॥

## उपास्यात्मनः स्वरूपम्

१८. अथेदानीं शृणुतास्य परमार्थात्मनः स्वरूपम् । 'एष आत्मा अपहतपाप्मा', नित्यनिरस्तसर्वधर्माधर्मः । तथा 'विजरो विमृत्युः' । न ह्येष शरीरगतया जरया जीर्यते, न च तन्मरणेन म्रियते – इत्युक्तं प्राक् ; स्वभावतोऽपि जरामरणसंपर्को नास्त्यस्येत्यभिप्रायेण 'विजरो विमृत्युः' – इत्युच्यत इदानीम् इति विशेषः । यद्यपि धर्माधर्मनिमित्तं जरामरणमस्य नास्तीत्येतत् 'अपहतपाप्मा' इत्यनेनैव विशेषणेन सिद्धम्, धर्माधर्मकार्यमेव हि शरीरं लोके जरामरणसंसृष्टमिति, तथापि अस्यान्यनिमित्तं स्वाभाविकं वा किमपि विकारजातं नास्त्येवेतीदानीं स्वरूपनिर्देशावसरे उच्यते - 'विशोको विजिघत्सोऽपिपासः' इति । मनोधर्मो हि शोक इष्टवियोगादिलक्षणः । सोऽस्य नास्ति इति प्रदर्शनार्थमुच्यते 'विशोक' इति । मोहादिसकलमनोदोषासंस्पृष्टोऽसौ–इत्यभिप्रायः । एवम्, जिघत्सा अशनाया, पिपासा पातुमिच्छा वा न विद्यते कथमप्यस्य । अप्राणो ह्यसौ । 'अप्राणो ह्यमनाः शुभ्रः' (मुं. २–१–२) इति ह्याथर्वणे । इत्थं च सर्वसूक्ष्मशरीरगतदोषवर्जितोऽसौ, अशरीरत्वात् – इत्युक्तं भवति । एतेन चाशनायादिसर्वविकल्पानामास्पदत्वेन सर्वविकल्पवर्जित इत्युक्तम् । सर्वेषां च संसारधर्माणां विकल्पमात्रत्वात्, वाचारम्भणमात्रत्वेनानृतत्वोपपत्तेः, परमार्थसत्यभूतस्यात्मरूपेणैव तेषां सत्यत्वात् इत्येतद्विवक्षया 'एष आत्मा' इति प्रप्रथममेवोक्तम् । तथा हि षष्ठे अवधारितम् – 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' (६–८–७, ....) इत्यसकृत्प्रपञ्चेनेति ॥

अपि च सत्यकामः सत्यसङ्कल्पश्चायम् । अस्य कामाः सत्याः, अव्यभिचार्यात्मस्वरूपत्वात् । तथा सत्या एवास्य सङ्कल्पाः, यद्यत् सङ्कल्पयति तत्तदवश्यं समुत्तिष्ठति; 'तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत' (६-२-३) इत्यादिश्रवणात् । 'सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत ।' (तै. २-६) इत्यादिश्रुत्यन्तराच्च सत्यकामत्वं सत्यसङ्कल्पत्वं चास्य । संसारिणां हि वितथाः कामाः सङ्कल्पाश्च ; 'उत्पद्यन्ते विलीयन्ते दरिद्राणां मनोरथाः' इति हि प्रसिद्धम् । ब्रह्मणि तु सदा अवितथाः सङ्कल्पाः, नियतफलत्वात् ; सत्याश्च कामाः ब्रह्मानन्यत्वात् । यद्यपि परिशुद्धे स्वभावतो निर्गुणे निष्कले निष्क्रिये निरञ्जने न केऽपि सङ्कल्पाः शक्यशङ्काः, नापि कामा अवाप्तव्याः, अद्वितीयत्वात्तस्य, तथाप्युपास्योपासकभेदावस्थायाम् अविद्याप्रत्युपस्थापितनामरूपोपाधिविशिष्टत्वेनैवोपास्यं ब्रह्मेति विधीयते श्रुत्या । तत्र च सत्यकामत्वसत्यसङ्कल्पत्वगुणविशिष्टमेव ब्रह्म विशुद्धोपाधिकम् उपास्यं भवतीति न विरोधः । यथागुणोपासनमेव तु फलम्, सत्यकामत्वसत्यसङ्कल्पत्वाद्यैश्वर्यप्राप्तिः, क्रममुक्तिश्च भविष्यति । 'तं यथा यथोपासते तत्तदेव भवति' (शत. ब्रा. १०-५-२-२०) इति श्रुतेरिति ज्ञेयम् ॥

## अनुपासकानां कामाः परिच्छिन्नाः

१९. यथोक्तगुणक एवाऽऽत्मा अन्वेष्टव्यो विज्ञातव्यश्च शास्त्राचार्योपदेशानुसारेण मुमुक्षुभिः । न चेदेवं विज्ञायते को दोषः

स्यादिति ? तत्र सदृष्टान्तं दोष आविष्क्रियते **'यथा ह्येवेह प्रजाः अन्वाविशन्ति यथानुशासनम्'** इत्यादिना। यथा अन्यराजानः प्रजाः, अन्वाविशन्ति **यथानुशासनम्**, यथा यथा अनुशासनं तथा तथा अन्वाविशन्ति नाधिकम्। **तदेव विवृण्वन्नाह– 'यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति'** इति। यथा ते स्वचित्तभूमिकानुरोधेन जनपदादिक्षेत्रभागान्तं तं तम् अल्पेनैव परितुष्टा यं यं काममभिकामयन्ते, तावन्तमेवान्तं यथा राजानुशासनम् उपजीवन्ति, न तु स्वाराज्यं लभन्ते यथा सर्वस्वामी राजा; एवमेव तत्तत् पुण्यं कृत्वा परमेश्वरानुगृहीतं तत्तदेव परिच्छिन्नं फलं लभन्ते, न तु गुणाष्टकविशिष्टब्रह्मात्मताप्राप्तौ प्रत्याशा जातुचिन्मन्दभाग्यानां तेषाम् – इत्येष दोषोऽब्रह्मोपासकानाम् ॥ ५ ॥

**तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते तद्य इहाऽऽत्मानमननुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेष्वकामचारो भवत्यथ य इहाऽऽत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति ॥ ६ ॥**

## अनुपासकानां कामाः क्षयिष्णवः

२०. अथापरोऽपि दोषः कीर्त्यते यथोक्तगुणविशिष्टब्रह्मात्मासाक्षात्कारवतां कामेषु। यथा अन्यराज्ञां प्रजानां यथाराजानुशासनं संप्राप्तजनपदक्षेत्रभागादीनां राजसेवादिसंप्राप्तपरिच्छिन्नभृतीनां वा

कर्मजितो लोकः तत्कर्मसंपादितः कामः, न केवलं देशपरिच्छिन्नो वस्तुपरिच्छिन्नश्च, किं तु कालपरिच्छिन्नोऽपि, यतस्तत्तत्कर्मानुगुणेन कालेन पुण्यजितोऽपि क्षीयत एव। न कृपिसेवादिकर्मजितानां यज्ञदानादिपुण्यजितानां वा कामानां विशेषोऽस्ति, परिच्छिन्ना एव क्षयिष्णवश्च उभयेऽपि। तत् तस्मात्, 'य इहाऽऽत्मानमननुविद्य व्रजन्त्येतांश्च सत्यान् कामान्, यथोक्तगुणात्मानं तदन्तःस्थितांश्च सत्यान् कामान् शास्त्राचार्योपदेशमनु अविदित्वा उपासनेनासाक्षात्कृत्य व्रजन्ति देहादपसर्पन्ति, तेषां सर्वेषु लोकेष्वकामचारो भवति, परिच्छिन्नमेव च क्षयिष्णु च तेषां पुण्यफलम्। न हि ते सर्वत्र सर्वदा स्वातन्त्र्येण सर्वान् कामान् प्राप्तुम् उपभोक्तुं वा-क्षमन्ते इत्यर्थः॥

अथ पक्षान्तरे ये तु इह यथोक्तगुणकमात्मानं तस्मिंस्थितान् कामांश्च अनुविद्य व्रजन्ति, तेषां सर्वेषु लोकेषु कामचारो भवति। अतः, यथोक्त आत्मा स्वायत्तसत्यकामसहितोऽन्वेष्टव्यः, विजिज्ञासितव्यश्चानन्ताक्षय्यफलार्थिभिः – इत्यभिप्रायः॥ ६॥

( इति प्रथमः खण्डः )

## ४. मुक्तस्य सर्वेषु लोकेषु कामचारः

**स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन संपन्नो महीयते॥ १॥**

**अथ यदि मातृलोककामो भवति सङ्कल्पादेवास्य मातरः समुत्तिष्ठन्ति तेन मातृलोकेन संपन्नो महीयते॥ २॥**

अथ यदि भ्रातृलोककामो भवति सङ्कल्पादेवास्य भ्रातरः
समुत्तिष्ठन्ति तेन भ्रातृलोकेन संपन्नो महीयते ॥ ३ ॥
अथ यदि स्वसृलोककामो भवति सङ्कल्पादेवास्य स्वसारः
समुत्तिष्ठन्ति तेन स्वसृलोकेन संपन्नो महीयते ॥ ४ ॥
अथ यदि सखिलोककामो भवति सङ्कल्पादेवास्य सखायः
समुत्तिष्ठन्ति तेन सखिलोकेन संपन्नो महीयते ॥ ५ ॥
अथ यदि गन्धमाल्यलोककामो भवति सङ्कल्पादेवास्य गन्ध-
माल्ये समुत्तिष्ठतस्तेन गन्धमाल्यलोकेन संपन्नो महीयते ॥
अथ यद्यन्नपानलोककामो भवति सङ्कल्पादेवास्यान्नपाने
समुत्तिष्ठतस्तेनान्नपानलोकेन संपन्नो महीयते ॥ ७ ॥
अथ यदि गीतवादित्रलोककामो भवति सङ्कल्पादेवास्य गीत-
वादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन संपन्नो महीयते ॥
अथ यदि स्त्रीलोककामो भवति सङ्कल्पादेवास्य स्त्रियः
समुत्तिष्ठन्ति तेन स्त्रीलोकेन संपन्नो महीयते ॥ ९ ॥

## ब्रह्मलोकं गतस्य सर्वत्र कामचारः

२१. कथं मुक्तस्य सर्वेष्वपि लोकेषु कामचारः ? – इत्यत आह **'स यदि'** इत्यादिभिर्नवभिर्वाक्यैः ॥

योऽयम् आत्मानम् अपहतपाप्मत्वादिगुणकं यस्मिन् सर्वे कामाः समाहितास्तमात्मानं ध्यानेन साक्षात्कृतवान् सः, यदि पितृलोक-

कामो भवति पितृरूपेषु लोकेषु कामो यस्य स तादृशो भवति चेत्, तदा तस्य सङ्कल्पादेव पितरः समुत्तिष्ठन्ति ॥

अत्र 'सङ्कल्पादेव' इत्यवधारणात् अनपेक्ष्यैव निमित्तान्तरं गमनादिकं समुत्तिष्ठन्तीति व्याख्येयम् । यथा लोके देवदत्तः प्रातरुत्थाय 'ग्रामविशेषं गमिष्यामि' इति सङ्कल्प्य तदर्थम् अश्वं शकटादिकं वा यानं साधनीकृत्य, पद्भ्यामेव वा साधनभूताभ्यां तत्र गच्छति, प्राप्नोति च ग्रामम्, एवम् इहापि स्यादिति न कल्प्यम्, श्रुतिप्रामाण्याद् विनापि निमित्तान्तरं पित्रादिलोकलक्षणं प्राप्नोतीत्येव युज्यते। यदि नाम निमित्तान्तरमवश्यमाश्रयणीयम्, तदा तदप्यस्य सङ्कल्पादेव समुत्तिष्ठतीति कल्पनीयम् । न चैवं लोकानां मनोरथादिवद् दृष्टनष्टत्वापत्तिः । श्रुत्युक्तप्रकारेण सङ्कल्पबलादेव यावत्प्रयोजनं तेषां स्थायित्वस्याप्युपपत्तेः । यथा लौकिकानाम्, उपभोग्यकामाः क्षयिष्णुस्वभावाः, अपर्याप्तवीर्यसङ्कल्पजत्वात्, निमित्तभूतयानजनसहायाद्यपेक्षप्रयत्नप्राप्याः, न तथेह भवितुमर्हन्ति; सत्यकामत्वसत्यसङ्कल्पत्वादिगुणविशिष्टब्रह्मसाक्षात्कारेण तत्साधर्म्यं गतस्य मुक्तस्य निरन्तराय सर्वकामावाप्तिसंभवात् इति मन्तव्यम् । तस्मात्, परमैश्वर्यं प्राप्तस्य मुक्तस्य यथासङ्कल्पं शरीरादिनिमित्तमपेक्ष्य, अनपेक्ष्यैव वा, ईश्वरस्येव सङ्कल्पमात्रात् पित्रादिलोकप्राप्तिरिति सिद्धम् ॥

तेन पितृलोकेन भोग्येन संपन्नो महीयते महिमानमाप्नोति । एवं यथाकामं सङ्कल्पादेव मात्रादिलोकसंपत्त्यापि महीयते – इति समानं व्याख्यानम् अन्येषामपि वाक्यानाम् । अत्र प्राप्याः पित्रादयोऽतीताः

सुखहेतव एव ; न ह्यैश्वर्यं प्राप्तेन विशुद्धमनसा, दुःखहेतुभूताः पित्रादयः काम्यन्ते इति युज्यते ॥

**यं यमन्तमभिकामो भवति यं कामं कामयते**
**सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन संपन्नो महीयते ॥ १० ॥**

### कामचारवर्णनोपसंहारः

२२. प्रदर्शनार्थमेव कतिपये लोका उदाहृताः । सर्वेष्वपि लोकेषु एवमेवास्य कामचारो भवतीति तु विवक्षितम् । तथा हि प्रतिज्ञातम् एतांश्च सत्यान् कामाननुविद्य व्रजन्ति तेषां सर्वेषु लोकेषु कामचारो भवतीति । तदेवोपसंहरन्नाह – **'यं यमन्तम्'** इत्यादिना । किं बहुना, यं यं लोकं कामयते, स स लोकः सङ्कल्पादेवास्य समुत्तिष्ठति तेन च संपन्नोऽसौ महीयते – इति विद्याफलमैश्वर्यमनुकीर्तितमत्र ; यत एवम्, तस्मात् अन्वेष्टव्यो विजिज्ञासितव्यश्चायमात्मा – इति विहितोपासनायामादरं जनयितुं श्रोतॄणाम् ॥

( इति द्वितीयः खण्डः )

## ५. ब्रह्मात्मस्थानां कामानामप्राप्तौ हेतुः

**त इमे सत्याः कामाः अनृतापिधानास्तेषां सत्यानां सतामनृतमपिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते ॥ १ ॥**

अथ ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दतेऽत्र ह्यस्यैते सत्याः कामा अनृतापिधानास्तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः ॥ २ ॥

## बाह्यविषयतृष्णैव आत्मैश्वर्यप्राप्तेः प्रतिबन्धः

२३. एवं तावत् विद्याफलसङ्कीर्तनेन श्रोतृनात्माभिमुखीकृत्य यथाविहितोपासने प्रतिबन्धकं निर्दिदिक्षुराह – '**त इमे सत्याः कामा अनृतापिधानाः**' इति ॥

अन्विष्य विजिज्ञास्यतया विहिते सत्यब्रह्मपुरे स्थिताः, इमे मुक्तस्य सर्वलोकेषु कामचारवर्णनव्याजेन वितत्य दर्शिताः कामाः, यद्यपीहैव ब्रह्मणि स्थिताः, तथापि अनृतापिधानाः । अनृतं बाह्य-विषयेषु स्त्र्यन्नभोजनाच्छादनादिषु तृष्णा । तन्निमित्ता च प्रवृत्तिः । सैषा हि तृष्णा मिथ्याज्ञाननिमित्तत्वादनृतम्, मृगतृष्णिकोदकपिपासेव व्यर्थप्रवृत्तिजननी । आह हि भगवान् 'अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः । अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः' (गी. ३-३६) इत्यर्जुनेन पृष्टः, 'काम एषः क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥' (गी. ३–३७), 'आवृतं ज्ञान-मेतेन ज्ञानिनो नित्यवैरिणा । कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥' (गी. ३–३९) इति ॥

तेषामेषां कामानां **सत्यानामपि** सताम्, दहरविद्यासिद्धानामिव तदितरेषामपि जीवानां स्वात्मन्येवेदानीमेव स्थितानाम् अनृत-**मपिधानम्** । अपिधानमिवापिधानम् ; न हि सर्वव्यापिनोऽद्वितीयस्य ब्रह्मचैतन्यस्य परमार्थत एव किञ्चिदपिधानं तिरोधायकमस्तीत्यवकल्पते। कथं तर्हि, अनृतस्याप्यपिधानत्वम् ? यो यो हि यस्मात् अस्य जीवस्येष्टः, पिता पुत्रो भ्राता वा इतः प्रैति म्रियमाणोऽदर्शनं गच्छति तं तम् इहैव स्वात्मनि हार्दे ब्रह्मणि विद्यमानमपि इह दर्शनाय न लभते न द्रष्टुं शक्नोति । अन्यत्र बहिरर्थे आसक्तमनस्त्वात् । 'पराञ्चि खानि व्यतृण-त्स्वयंभूस्तस्मात्पराक्पश्यति नान्तरात्मन् ॥' (का. २-१-१), इति हि **काठके** । न पुनस्तथ्यत एव ब्रह्म, तत्स्थाः कामाः अनृतेनापिहिता इत्यर्थः ॥ १ ॥

## विद्यमानानामेव कामानामप्राप्तौ दृष्टान्तः

२४. तद् यावद् बहिर्मुखस्य पुरुषस्य अनृतेन तृष्णातत्कृत-स्वेच्छाचाररूपेण आवृताः सत्याः कामाः, तावत् स्वात्मस्थानपि तान् दर्शनाय स न लभते । अथ पुनर्यदा व्यावृत्तसर्वबहिष्करणः सन् स्वात्मानमेवेमं ब्रह्माकाशं विजिज्ञासते, तदा विद्योत्कर्षात् साक्षात्कृते ब्रह्मणि दर्शनपथम् आयान्ति ये चास्य जीवा, जीवन्तः पितापुत्रादयः। ये च प्रेता मृताः, यच्चान्यदिच्छन्न लभते इह प्रयतमानोऽपि तत्प्राप्तये, स्वसृसखिगन्धमाल्यान्नपानगीतवादित्रस्त्रीगृहवित्तपश्वादिलक्षणं वस्तु, तत् सर्वं अत्रैव स्वात्मभूते ब्रह्मणि गत्वा यथोक्तेन विधिना विन्दते लभते । कुतः ? अत्र हि हार्दब्रह्माकाशे एते सत्याः कामा नित्यदा

वर्तन्ते अनृतापिधानाः । अतोऽनृताभिसन्धिदोषेणैव येऽपिहिता इव, त एते हार्दब्रह्मसाक्षात्कारमात्रेण प्राप्स्यन्ते इत्यर्थः ॥

कथमिदं विज्ञायते स्वात्मन्येव सर्वे कामा वर्तन्ते, तत्प्राप्त्यैव च प्राप्यन्त इति ? तत्र दृष्टान्तः, यथा हिरण्यनिधिं स्वगृहे एव भूमेरधस्तात् कैश्चित् पूर्वजैर्निहितम्, अक्षेत्रज्ञाः निधिशास्त्रानभिज्ञाः निधेरुपर्युपरि सञ्चरन्तोऽपि न विन्देयुः, एवमेव इमाः प्रजाः, ब्रह्माकाशविज्ञानरहिताः प्रजाः जीवाः हार्दाकाशाख्यं ब्रह्मलोकं ब्रह्मरूपं लोकम् अहरहर्गच्छन्त्योऽपि सुषुप्तावस्थायां न विन्दन्ति लब्धमपि ब्रह्मलोकभावं न विदन्ति 'एषोऽस्मि ब्रह्मभावं गतोऽद्य' इति । यद्यपि न कस्यचिदपि विशेषज्ञानप्रादुर्भावोऽस्ति सुषुप्तावस्थायाम्, तदानीं सद्ब्रह्मणा एकीभूतत्वात्, तथापि हार्दब्रह्मविद्वानेव तु सुषुप्तेः पूर्वम् 'अनुपदमेव ब्रह्माकाशभावं गन्तास्मीत्यभिसन्धिमान् भवति साधकावस्थायाम्, सुषुप्तादुत्थितश्च 'ब्रह्मण एवेहागतोऽस्मि' इति परामृशति इति विशेषः । तदितरे तु न तथा, अनृतेन हि यस्माद् यथोक्ततृष्णावासनावासिताः प्रत्यूढाः बहिरपकृष्टास्ते । अतः कष्टमिदं वर्तते, यत् स्वायत्तोऽपि ब्रह्मभावो न लभ्यते अविद्वद्भिः – इत्यभिप्रायः ॥ २ ॥

# ६. ब्रह्मात्मा हृद्येव विज्ञातव्यः

**स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयमिति**
**तस्माद् हृदयमहरहर्वा एवंवित् स्वर्गं लोकमेति ॥ ३ ॥**

## हृदयशब्दनिर्वचनम्

२५. यथोक्तविशेषणं ब्रह्म स्वात्मन्येव स्थितम्, तदप्राप्तिस्तु अज्ञानकृतं विद्यारहितानाम् इत्युक्तम्। संप्रति हार्दविद्यायां निरतस्य विदुषः प्रत्यहं ब्रह्मप्राप्तिरित्यवश्यंभाविफलत्वं विद्यायाः – इति ज्ञापयन् हृदयप्रदेशप्रशंसामारभते। '**स वै एष आत्मा हृदि।**' वै इत्यनेन विध्युक्तं ब्रह्म स्मारयति। य आत्मा अपहतपाप्मत्वादिगुणकः प्रकृतः, स एष हृद्येवोपलब्धव्यः, यस्मात् हृद्येवायमात्मा वर्तत इति हृदयशब्द-निर्वचनेनापि गम्यते। कथम्? तस्यैतस्य हृदयस्य एतदेव निरुक्तं निर्वचनम् 'हृद्ययम् आत्मा वर्तत' इति; तस्मादेव हृदयम् इति नामप्रसिद्ध्यापि अत्रैवाऽऽत्मा वर्तत इत्यवगन्तव्यम् इत्यभिप्रायः। यथा स्वपितिनाम-निर्वचनेन स्वमात्मानम् अपिति अप्येतीति वस्तुस्थितिर्ज्ञापिता श्रुत्या (६–८–१), एवं हृदयशब्दनिर्वचनेनापि हृद्येवायमात्मा वर्तत इति गम्यते। तस्मात्, तत्रैवायं साक्षात्कर्तव्य इति ज्ञापयति श्रुतिः॥

## हृद्ययमात्मा – इति विजानतः फलम्

२६. एवं विजानतो विदुषः फलमाह विद्यास्तुत्या तदनुष्ठाने प्ररोचनार्थम्। 'अहरहर्वै', प्रसिद्धमेतद् ब्रह्मविदां यद् हृद्येवायमात्मा इति जानतः अहरहः प्रत्यहं स्वर्गं लोकम् हार्दं ब्रह्म निरतिशयानन्द-रूपत्वात् स्वर्गशब्दवाच्यम् एति सुषुप्ते इति। अत एव हि सुषुप्तं पुरुषं 'ब्रह्मतां प्राप्तः' इति वदन्ति तज्ज्ञाः। यद्यपि अविद्वानपि सुषुप्ते हार्दमेव ब्रह्मैति 'सता सोम्य तदा संपन्नो भवति'(६-८-१) इति श्रुतेः;

तथापि न जानन्ति प्राकृताः जनाः ब्रह्मसंपत्तिस्तदा जायते नः -- इति । अत एव च श्रुतिरपि वक्ति – 'सति संपद्य न विदुः सति संपद्यामह इति' (छां. ६–९–१)। सुप्तोत्थिताश्च ते न विजानन्ति 'हार्दब्रह्म-संपत्तिरभूदस्माकं सुषुप्ते' – इति। तदपि श्रुतिरनुकीर्तयति 'सत आगम्य न विदुः सत आगच्छामह' इति। 'त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद् भवन्ति तदा भवन्ति' (६–१०–२) इति। हार्दब्रह्मवित्तु सुषुप्ते जागरिते वा 'अपहतपाप्मादिगुणकं ब्रह्मैवाहम्' इति विजानाति। अत एवंविदेव प्रत्यहं सुषुप्तिं गच्छन् स्वर्गं लोकं यास्यामीति, सुषुप्ता-दुत्थितश्च ब्रह्मण इदानीमिहागतोऽस्मीति च जानाति ; साक्षात्कार-पूर्वकम् इतः प्रेतोऽपि ब्रह्मसाम्यमेवैति – इति विशेषमपेक्ष्याह श्रुतिः 'एवंवित् स्वर्गलोकमेति' इति ॥

## ७. हार्दब्रह्मविदः स्वरूपेण निष्पत्तिः, ब्रह्मणः सत्यशब्दाभिधेयत्वं च

**अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति ॥ ४ ॥**

## विदुषः शरीरात् समुत्थानं स्वरूपेणाभिनिष्पत्तिश्च

२७. **'अथ य एष संप्रसादः'** इति प्रकृतो हार्दविद्यानिष्णात उच्यते । संप्रसादः सम्यक् प्रसीदन् इत्यर्थः । जाग्रत्स्वप्नयोरज्ञानाद् देहेन्द्रियसङ्घातवानिव, इन्द्रियार्थभोगतद्वासनाजनितसुखदुःखकालुष्यं भजत इव चेक्ष्यते जीवः; सुषुप्ते तु विधूय सर्वोपाधिसंपर्कं स्वेनैवात्यच्छेन परमात्मस्वरूपेणावस्थितो भवतीत्यतः संप्रसादशब्दभाग् भवति सः । 'सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति' (६–८–१) इति वचनात् । अतः संप्रसादशब्दोऽयं यद्यपि सर्वजीवसाधारणः, तथापि, अतीतानन्तरवाक्ये 'अहरहर्वा एवंवित्स्वर्गं लोकमेति' इति विशिष्टवचनात्, अत्र च 'य एष संप्रसादः' इति संनिहितवद्विशेषणात्, य एवापहतपाप्मत्वादिगुणकमात्मानं हृदि निरन्तरं ध्यायति, स एव मुख्यवृत्त्या 'य एष संप्रसादः' इति परामृश्यते ॥

तदेवं य एष संप्रसादः एवंवित् शरीरात् समुत्थाय **परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते** । यद्यपि शरीरपरिच्छिन्न इवाऽऽसीत् प्राक्, तथापीदानीं विद्याभ्यासबलात् शरीरात्मभावनां परित्यज्य यथोक्तात्मभावनायां तिष्ठतीति स एव सुषुप्ते परं ज्योतिः कूटस्थचैतन्यमाकाशशब्दितं ब्रह्मोपसंपद्य स्वेन रूपेण पारमार्थिकात्मरूपेणाभिनिष्पद्यते इति श्रुत्या व्यवह्रियते । स यज्ज्योतिरुपसंपद्यते, येन च स्वरूपेणाभिनिष्पद्यते, **'एष आत्मेति होवाच'**; इत्याचार्यो ब्रूयात् – इत्यर्थः । **एतदमृतम्** । सशरीरत्वं हि मर्त्यत्वे

निमित्तम्, न त्वात्मतत्त्वम्, शरीराभिमानं विहाय येन स्वरूपेण निष्पद्यते विद्वान्। 'जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते' (६-११-३) इति हि विज्ञायते। एतदेवाभयम् अविद्याप्रत्युपस्थापितशरीरात्मभावं गतस्यैव ह्यनृतेन प्रत्यूढस्य स्वान्यनिमित्तं भयं भवद् भवेत, न त्वपहत-पाप्मना स्वेन रूपेणाभिनिष्पन्नस्य। यस्मादेतदेवं रूपं ब्रह्म, निरतिशय-बृहत्त्वात्, देशकालवस्तुपरिच्छेदरहितमद्वितीयमेतद् रूपम्। तदेवम् 'एष आत्मा, एतदमृतम्, एतदभयम्, एतद् ब्रह्म' इति चाभ्यासेन परंज्योतिरुपसंपद्य येन स्वरूपेणाभिनिष्पद्यते विद्वान्, एतदेवाभिप्रेत्य मया उक्तम् 'एष आत्माऽपहतपाप्मा' (१-५) इत्यादि; एतदेव चाकाशाख्यमात्मतत्त्वमन्विष्य विजिज्ञास्यतया मयोपदिष्टम्। तस्मात् एतदन्वेषणे विज्ञाने च प्रयतध्वम् – इत्याचार्याशयोऽवगम्यते॥

## ब्रह्मणः सत्यनामकत्वम्

२८. 'तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति'। तस्यैतस्यैव यथोपवर्णितस्य 'सत्यम्' इति नाम। एतद्व्यतिरिक्तस्य तु कर्मजितस्य, पुण्यजितस्य वा अनृतत्वमेव। उक्तं हि पूर्वमेव 'तत्सत्यं स आत्मा' (६-९-४) इति। इह पुनरपि ब्रह्मणो नाम सत्यमिति कथनं तु तन्नाम्ना ब्रह्मोपासितव्यम् इति विधानार्थम् इति विशेषः॥ ४॥

**तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति तद्यत्सत्तदमृतमथ यत्ति तन्मर्त्यं अथ यद्यं तेनोभे**

**यच्छति यदनेनोभे यच्छति तस्माद्यमहरहर्वा एवंवित्स्वर्गं लोकमेति ॥ ५ ॥**

## सत्यानृतनियामकं ब्रह्म

२९. यथैव हृदयशब्दनिर्वचनेन हृद्येव ब्रह्म साक्षात्कर्तव्यम् बाह्यविषयासक्तिमुत्सृज्य – इति विधीयते, एवमेव सत्यनामाक्षरार्थकथनेन 'ब्रह्मैव सत्यम्, अनृतमन्यत्' इति मत्वा सत्यगुणत्वविशिष्टत्वेन तदेवोपास्यम् इति वक्ष्यन्नाह– '**तानि ह वा एतानि त्रीण्यक्षराणि**' इति। कानि तानि ब्रह्मनामाक्षराणि ? '**सतीयम्**' इत्येतानि। सकारः, तकारः, यकारः – इति च इत्यर्थः। 'ती' इति तकारोपरिकृतः, ईकारानुबन्ध उच्चारणार्थः। 'यत् ति' इति ह्रस्वेनैवोत्तरत्र प्रतिनिर्देशदर्शनात्। तत् तत्र तेषु त्रिष्वक्षरेषु **यत् सत्**, तदमृतम्; सकारोऽमृतस्वरूपं वस्तु निर्दिशति इत्यर्थः। **यत् ति**, यस्तकारः – इत्यर्थः। 'तन्मर्त्यम्' तकारो ब्रह्मण्यध्यस्तं विकारजातं गमयति; विकारजातं हि परिच्छिन्नमिति मर्त्यम्। 'यदल्पं तन्मर्त्यम्' (७–२४–१) इत्युक्तत्वात् इति भावः। अथवा यत् ति तन्मर्त्यम् इति प्रतीतिमात्रशरीरं मृगतृष्णिकोदकादि कथयति। अमृतमिति व्यावहारिकसत्यस्योक्तत्वात्। '**अथ यद् यम्**' तेनोभे यच्छति नियमयति, वशीकरोति; अमृतं च मर्त्यं चेत्युभे अपि यदनेनाक्षरेण वशीकरोत्युपासकः, तस्मादिदमक्षरम्, 'यम्' इत्यन्वर्थम् इति चिन्तनीयम्। तदेवं ब्रह्मनामाक्षरार्थचिन्तनेन इदमवगम्यते यत् सद्रूपम् अमृतम्, असद्रूपं मर्त्यं चेत्युभे अप्येते यकारार्थभूतेन परमार्थसत्यरूपेण

नियमयति ब्रह्मेति । 'सत्यं चानृतं च सत्यमभवत्' (तै. २-६) इति श्रुत्यन्तरात् । तदेवं सत्यनामकं हार्दं ब्रह्म सदसन्नियामकम्- इति यो वेद स एवंवित् अहरहः स्वर्गं लोकमेति गृघुते इति प्राग्व्याख्येयम् ॥ ५ ॥

( इति तृतीयः खण्डः )

# ८. ब्रह्मणः सेतुत्वेनोपासनविधानम्

**अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः ॥ १ ॥**

**तस्माद्वा एतं सेतुं तीर्त्वान्धः सन्ननन्धो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तस्माद्वा सेतुं तीर्त्वाऽपि नक्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येवैष ब्रह्मलोकः ॥ २ ॥**

## ब्रह्मणः सेतुत्वम्

३०. अथेदानीम् य एवापहतपाप्मत्वादिगुणकः परमात्मा, यः सर्वेषां हृदि वर्तते, यश्च सत्यानृतनियामकत्वात् सत्यशब्दवाच्यः,

यं चैवंगुणविशिष्टत्वेन निरन्तरं ध्यायन् अहरहः स्वर्गलोकापराभिधानं ब्रह्म सुषुप्ते एतीत्युक्तम्, तमेव सेतुत्वेनापि स्तौति, एवमप्यसौ ध्येयः, यद्बलादेव प्रत्यहं ब्रह्मलोकापरनामानं सुषुप्ते गच्छति, यद्ध्यानप्रकर्षादेवास्य योगिनः प्रेत्य सर्वेषु लोकेषु कामचारो भवतीति ॥

## परमात्मा लोकानां विधारयिता

३१. अथ य आत्मा स सेतुर्विधृतिः – योऽयमात्मा अपहतपाप्मत्वादिगुणकः, सत्यकामः, सोऽयं सेतुर्विधृतिः ; यथा उदकसन्तानस्य विधारयिता लोके सेतुक्षेत्रसंपदाम् असंभेदाय, एवम् अयमात्मा एषाम् अध्यात्मादिभेदभिन्नानां सर्वेषां लोकानां, वर्णाश्रमादीनां च असंभेदाय असङ्कराय सेतुरिवाचरति – इत्यर्थः । प्रसिद्धं चास्य क्रियाकारकफलभेदनियमनेन सेतुत्वं विधारकत्वं च श्रुत्यन्तरेष्वपि 'एष सेतुर्विधरण एषां लोकानामसंभेदाय' (बृ. ४–४–२२), 'अमृतस्यैष सेतुः' (मुं. २–२–५), 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ. ३–८–९) इत्यादिषु । न चैवं विधारणे तस्याऽऽयासः कश्चित्, सेतुवत् परिच्छिन्नत्वं वा शक्यशङ्कम् । आत्मत्वात् । सर्वस्याप्यात्मा ह्यसौ, अतः सर्वविक्रियारहित एवासौ सर्वं विधारयति । आत्मत्वं चास्य सर्वलोकानां पुरुषनिःश्वासवल्लीलान्यायेनैव सर्वविधनामरूपप्रपञ्चस्योत्पत्तिश्रुतेरवगम्यते । 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यै-

वैतानि निःश्वसितानि ' (बृ. ४-५-११) इति हि सर्ववर्णाश्रमधर्म-हेतोर्वेदस्य, सर्वकर्मफलभूतेहलोकपरलोकयोश्च तत एवोत्पत्तिर्विज्ञायते । स्मृतिश्चात्र भवति 'तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्' (गी. ४-१३) इति । न च सेतुश्रुतेः, 'सेतुं तीर्त्वा' इति समनन्तरवाक्ये तरणकर्मत्वव्यपदेशात् परिच्छिन्नत्वमस्य । 'एकमेवाद्वितीयम्'(६-२-१) इत्यद्वितीयत्वश्रुतेः । 'तीर्त्वा' इत्यत्र तरतेः प्राप्त्यर्थत्वस्यापि संभवाच्च ; 'व्याकरणं तीर्णः' इत्यादिप्रयोगदर्शनात् । तस्मात् सेतुरिति विधारकत्वमात्रमुच्यते 'एषां लोकानामसंभेदाय' इति वाक्यशेषादिति सर्वमनवद्यम् ॥

## परमात्मसेतुं तीर्णस्य सर्वसंसारदोषविमुक्तत्वम्

३२. अथास्य सेतोर्महिमानमाह – 'नैतं सेतुमहोरात्रे तरत' इत्यादिना । यमहरहः स्वर्गलोकमेति विद्वानित्युक्तम्, तमेवं सेतुं परमात्मानं सेतुरूपकेण व्यपदिष्टम् अहोरात्रे न तरतः, न प्राप्नुतः । प्रसिद्धं चेदं सुषुप्तौ नैव कालस्य संप्राप्तिरस्ति यथा स्वप्नजागरयोरिति । स्वप्नजागरणयोरेव चाज्ञानान्यथाज्ञानलक्षणयोरहोरात्रयोरस्तित्वम्, अत्र तु विशेषज्ञानस्यैवानवकाशः – इति ॥

अत्र संप्रसादशब्दोदितो विद्वान् शरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते यस्मात्, तस्मादेव अहोरात्रवदेवैतं सेतुम् 'न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं' वा तरति । जरादीनां स्थूलसूक्ष्मान्यतरशरीरधर्मत्वात्, अत्र च शरीरात्समुत्थाय स्वेन रूपेणाभिनिष्पन्नत्वात् आत्मनः । तस्य च स्वरूपस्य सर्वकारण-

त्वाच्च । न हि घटादिधर्माः, मृदादीनि स्वकारणानि आप्तुं प्रभवेयुः । तथा जरादयोऽपि संप्रसादस्य स्वरूपं सेतुं नैव संस्प्रष्टुं प्रभवन्तीत्यर्थः ॥

**‘ सर्वे पाप्मानोऽतो निवर्तन्ते ’** । सर्वे धर्माधर्मकृता दोषाः अतः सेतोर्निवर्तन्ते, एतम् अप्राप्यैव, यथोक्तन्यायात् । यद्यपि अपहतपाप्मत्वादिगुणाः स्वभावत एषः, परोपाधिकृता एव तु सुकृतदुष्कृतान्ता जाग्रत्स्वप्नयोरेतत्संपृक्ता इव भान्ति, तथापि सुषुप्ते विधूतसर्वोपाधेरात्मनः सकाशात् निवर्तन्ते, न प्रतिभासमात्रेणाप्यात्मानं ते लभन्ते । स्वतस्तु दूरैव कथा तत्संसर्गस्यात्र । तदाह — **अपहतपाप्मा ह्येष ब्रह्मलोकः** । ब्रह्मरूपोऽयं लोकः, इह सेतुशब्देन व्यपदिष्टः, अपहतपाप्मेति प्रसिद्धं ब्रह्मविदाम् इत्यर्थः । एतेन ‘ एतदमृतमभयमेतद् ब्रह्म ’ (८–३–४) इति यदुक्तम्, तत् स्फुटीकृतं भवति ॥ १ ॥

## सेतुमहिमोक्त्युपसंहारः

२३. उक्तस्यैव प्रपञ्चोऽयम् । यस्मादेवंमहिमा अयं सेतुः, जरामृत्य्वादयश्च कार्यकरणसङ्घातधर्मा आगन्तुकाः, जागरिते स्वप्ने वा शरीरसंबन्धात् पररूपापन्नस्येव भवतोऽस्य भवन्तीव, वस्तुतस्तु ब्रह्मात्मभावं गतस्य नैव भवन्ति, तस्माद्वै एतं सेतुं संप्रसादावस्थायां शरीरात्समुत्थाय स्वरूपं प्राप्तस्य आन्ध्यादयोऽपि करणवैकल्यकृताः नैव भवन्ति, धर्म्यपाये धर्मापायध्रौव्यात् । तदाह **‘तस्माद्वा एतं सेतुं तीर्त्वा’** इत्यादिना । जागरिते अन्धस्सन्, एतं सेतुं तीर्त्वा ब्रह्मतां गतः, अनन्धो भवति । एवं शस्त्रादिना विद्धो दुःखित इव च सन्नविद्धो भवति । प्रदर्शनार्थमेतत् । बधिरः सन् अबधिरो भवति, मूकः सन् अमूको

भवति – इत्याद्यपि द्रष्टव्यम् । सर्वेन्द्रियावैकल्यनिमित्तदोषविवर्जितो भवत्यत्रेत्यर्थः । एवम् उपतापी ज्वराद्यार्तोऽनुपतापी भवति । सर्व-कार्यकरणदोषगन्धविदूरो भवति, अकार्यकरणस्वाभाव्यप्राप्तेः – इति वाक्यार्थः ॥

'नैतं सेतुमहोरात्रे तरतः' इत्युक्तं प्राक् । तत्कुतः ? इत्याशङ्क्याऽऽह – '**तस्माद् वा एतं सेतुं तीर्त्वाऽपि नक्तमह-रेवाभिनिष्पद्यते**' – इति । अहोरात्रे यत्र पर्यायेण भवतो जाग्रतः पुरुषस्य तत्राहरालोकस्थितस्यापि नक्तमन्धकाराक्रमणशङ्का अवश्य-मुद्भवेत् । न त्वेतत्सेतुं प्राप्तस्यैवम् । किं तर्हि, अपि **नक्तमहरेवाभि-निष्पद्यते**ऽत्र । विदुषः स्वरूपं प्राप्तस्य स्वरूपमेव हि विज्ञस्यात्म-चैतन्यज्योतीरूपत्वमेकरूपं नित्यदा । तदाह – **सकृद्विभातो ह्येवैष ब्रह्मलोकः** – इति । एष ब्रह्मस्वरूपो लोकः सकृद्विभातः सदैव भानेव स्वरूपचैतन्यप्रकाशेन हि यस्मात्, तस्मान्न कदाप्यस्य तम आक्रमणाशङ्का भवेदित्यर्थः । यत एवम् इहस्थितस्यापि हार्दब्रह्मविदः, अतः शरीरपातोत्तरं ब्रह्मसाधर्म्यं गतस्य सुतरां निरन्तरायमैश्वर्यं समन्ततः सर्वदा ज्ञानालोके विहरतः – इति भावः ॥ २ ॥

## ९. ब्रह्मसाक्षात्कारे ब्रह्मचर्यं परमं साधनम्

**तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवति ॥ ३ ॥**

## ब्रह्मचर्यविधिः

३४. तदेवं बहुभिः प्रकारैर्ब्रह्मलोकं संस्तुत्य श्रोतॄंस्तदभि मुखीकृत्य, तस्येदृशस्य संप्राप्तौ केऽधिक्रियन्त इत्याकाङ्क्षायामाह - 'तद्य एवैतम्' इत्यादि। तत् तत्रैवं स्थिते, 'तेषामेवैष ब्रह्मलोकः' केषाम् ? 'य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति' इति। ब्रह्मचर्य विधानार्थमेतद् वचनम्, 'य एव' इत्यवधारणात्। य एव बाह्य स्त्रीगन्धमाल्यादितृष्णापरित्यागपूर्वकम् एतं यथाविशेषितं ब्रह्मलो यथोक्तेन प्रकारेण शास्त्राचार्योपदेशमनु विन्दन्ति, उपासनेन साक्षात्कृत्य तेषामेवैष ब्रह्मलोकः ; न पुनः श्रवणमात्रेण कृतार्थं मन्यमानानाम् अपरित्यक्तविषयतृष्णानाम् इत्यर्थः ॥

नन्विहापि कामावाप्तिरेव फलम् श्रुतं 'अथ यदि गन्धमाल्य लोककामो भवति', 'अथ यद्यन्नपानलोककामो भवति', 'अथ यदि गीतवादित्रलोककामो भवति', 'अथ यदि स्त्रीलोककामो भवति' सङ्कल्पादेवास्य तत्तत्कामाः समुत्तिष्ठन्ति (२–६, ७, ८, ९) इति न। एते हि सत्याः कामाः, ये ब्रह्मण्येव तदनन्यभूता वर्तन्ते, न पुनर्बाह्यविषयवदनृताः, यान् विनष्टान् न पुनरिह दर्शनाय लभते यत्तृष्णया च बहिरपकृष्टा अविदुष्यः प्रजा अहरहर्गच्छन्त्योऽपि ए ब्रह्मलोकं न विन्दन्ति। न तथा अमीषां येऽहरहर्ब्रह्मलोकं गच्छन्ति तत्स्थांश्च सर्वान् कामान्। अत एव ह्याह – 'तेषां सर्वेषु लोके कामचारो भवति' इति। अतो वैषम्यम् ॥

तदेवं परममेतत् साधनं ब्रह्मलोकप्राप्तौ, तत्रस्थसत्यकामावाप्तौ चेत्यतोऽप्रमत्तैर्ब्रह्मचर्यपूर्वकमेव प्रयतितव्यं तत्प्राप्तये इत्यभिप्रायः ॥ ३ ।

( इति चतुर्थः खण्डः )

अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तद् ब्रह्मचर्येण ह्येव यो ज्ञाता तं विन्दतेऽथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तद् ब्रह्मचर्येण ह्येवेष्ट्वाऽऽत्मानमनुविन्दते ॥ १ ॥

अथ यत्सत्त्रायणमित्याचक्षते ब्रह्मचर्यमेव तद् ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दतेऽथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तद् ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुते ॥ २ ॥

अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दतेऽथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरंमदीयं सरस्तदश्वत्थः सोमसवनस्तदपराजिता पूर्ब्रह्मणः प्रभुविमितं हिरण्मयम् ॥ ३ ॥

## ब्रह्मचर्यसंस्तुतिरवश्यकर्तव्यत्वविज्ञापनाय

३५. अथेदानीं विहितस्य ब्रह्मचर्यस्य विद्यासहकारिकारिणोऽवश्यकर्तव्यतां द्योतयितुं तं यज्ञादिभिः संस्तौति ॥

‘ अथ यद् यज्ञ इत्याचक्षते ’ पुरुषार्थसाधनत्वेन शिष्टाः, स्मरन्ति च व्यासादयः ‘ यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् । नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ’ (गी. ४–३१) इत्यादिवचनैः, ‘ ब्रह्मचर्यमेव तत् । ’ न ह्यब्रह्मचारी यज्ञफलमश्नुते

कश्चित् । तच्च यज्ञफलं पारम्पर्येण ब्रह्मप्राप्तिः, ब्रह्मचर्यवता हार्दब्रह्मोपासकेनेहैवाहरहर्भवति, मृतस्य च ब्रह्मलोकप्राप्तिर्ध्रुवा इत्यतः, यज्ञो ब्रह्मचर्यमेवेत्युच्यते ॥

ब्रह्मचर्येण च यो ज्ञाता ब्रह्मणः साक्षात्कर्ता उपासकः, स ब्रह्मलोकमनुविन्दते इति ब्रह्मचर्यफले यज्ञफलमप्यन्तर्भवति । ज्ञापयति ह्येतत् ब्रह्मचर्यशब्दाक्षरानुवृत्तिः – इत्यभिप्रायः । एषणादिष्टमपि ब्रह्मचर्यमेवेति ज्ञापयन्नाह ' ब्रह्मचर्येण ह्येवेष्ट्वा ' इति ॥ १ ॥

' अथ यत् सत्रायणमित्याचक्षते ' । बहुयजमानकं वैदिकं कर्म 'सत्रायणम्' । तदपि ब्रह्मचर्यमेव । सत्रायणेन हि आत्मानं रक्षन्ति यजमानाः, यज्ञकाले ब्रह्मचर्यमनुतिष्ठन्तः । तदपि सत्रायणफलम् ब्रह्मचर्ये एवान्तर्भवति । कथम् ? आत्मनः परमार्थस्वरूपस्य तत्स्थकामैः सह रक्षणं भवति ब्रह्मचर्येण ; तेन हि अनृताः कामा निरस्यन्ते । तथा च अनृतापिधानाः कामा विव्रियन्ते । अतः सत्रायणमपि ब्रह्मचर्यमेव ॥

अथ यन्मौनमित्याचक्षते । तदपि ब्रह्मचर्यमेव । कथम् ? ब्रह्मचर्येण हि युक्तः सन् मौनी भवति ; तथा तेनैव ब्रह्मचर्येण युक्तः सन् – आत्मानमनुविद्य मनुते, तदवबोधं प्राप्नोति, ब्रह्मलोकं च गच्छतीति ॥ २ ॥

' अथ यदनाशकायनमित्याचक्षते ' । यदनशनपरायणत्वं तदपि ब्रह्मचर्यमेव । न ह्यब्रह्मचारी अनशनव्रतं परिपालयितुं शक्नोति ।

अक्षरानुगतिरप्यत्र भवति । यम् अपहतपाप्मत्वादिगुणकम् आत्मानं प्राप्नोति ब्रह्मचर्येण, एष ह्यस्य न नश्यति ॥

'अथ यदरण्यायनमित्याचक्षते, ब्रह्मचर्यमेव तत्' । अरण्यायनम् अरण्याश्रयणं वासार्थम् । तदपि ब्रह्मचर्यमेव । ब्रह्मचर्यवतामेव हि तच्छक्यसाधनम् । अक्षरानुगतिश्चात्र भवति । अरश्च ण्यश्च – इत्यरण्यशब्दवाच्यौ अर्णवौ ; तयोर्ब्रह्मचर्यवतो हार्दविद्यानिष्णातस्य अयनात् अरण्यायनं फलमिति । स च तृतीयस्यामितो दिवि, इतो लोकात् अन्तरिक्षमतीत्य तृतीयस्यां दिवि वर्तेते तावर्णवौ ॥

तत् तत्रैव च ब्रह्मलोके ऐरम्मदीयं सरः । इरा अन्नं तन्मयः, ऐरो मण्डः ; तेन पूर्णम् ऐरंमदीयम्, तदुपयोगिनां मदकरं हर्षोत्पादकं सरः । तत्रैव अश्वत्थो वृक्षः सोमसवनः, सोमम् अमृतं सूते स्रावयतीति सोमसवनोऽसौ वृक्षः । तथा तत्रैव च अपराजितः, ब्रह्मचर्यादिसाधनरहितैः, अजितः, पूः, पुरी ब्रह्मणः । तत्र 'प्रभुविमितं हिरण्मयम्' प्रभुणा ब्रह्मणा विनिर्मितं स्वर्णमयं वेश्म । तमीदृशं ब्रह्मलोकं ब्रह्मचर्येणैवानुविन्दते विद्यासहकारिसाधनेन । अतोऽरण्यायनमपि तदेवेत्यभिप्रायः ॥

तदेवं यज्ञफलम्, इष्टफलम्, सत्रायणफलं च – इति बहुलायासेन गृहस्थैर्यत्फलं लभ्यते ; मौनम् अनाशकायनम्, अरण्यायनं चेत्येतत् यत् तपःप्रधानैर्वानप्रस्थैर्लभ्यते, तत्सर्वमेतस्मिन् ब्रह्मचर्यफलेऽन्तर्भवति, ततोऽभ्यधिकं च फलमनन्यसाधनलभ्यम् 'यावानर्थ उदपाने सर्वतः संप्लुतोदके तावान्' इति न्यायेन । तस्मात्, ब्रह्मचर्यरूपपरमसाधनयुतैर्हार्दं ब्रह्मोपासनीयम् – इति वाक्यार्थः ॥ ३ ॥

## ब्रह्मचर्यस्तुत्युपसंहारः

**तद्य एवैतावरं च ण्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ॥ ४ ॥**

## उपसंहारवाक्यार्थः

३६. यथोक्तस्योपसंहार एवैषः। सर्वथा बाह्यानृततृष्णावर्जितैर्ब्रह्मचर्यनिरतैरेवैष ब्रह्मलोको लभ्यः। तेषामेव च यथाव्याख्यातः सर्वेषु लोकेषु कामचारो भवति इति च ॥

## ब्रह्मलोकस्य कामसतत्त्वचिन्ता

३७. अत्रेदं चिन्तनीयम् – किमिमे ब्राह्मलौकिका अरश्च ण्यश्चेत्याख्यातौ अर्णवौ, ऐरंमदीयं सरः, सोमसवनोऽश्वत्थः, अपराजिता पूः, तत्रस्थं हिरण्मयं वेश्म च – इत्यनुक्रान्ता इहलोकस्था एव तत्रापि भवन्ति, उत अलौकिका एवेति? तत्र न तावल्लौकिका एवार्णववृक्षादयो विवक्षिता इति शक्यं कल्पयितुम्। न हि ते हृद्याकाशे समाहिता भवन्ति; न च सङ्कल्पमात्रेण भौमा अर्णवादयस्तत्र समुत्तिष्ठेयुरिति शक्यं कल्पयितुम्। ननु इहत्या एव वासनासङ्कल्पमात्रेण किमिति न समुत्तिष्ठेयुः? दृष्टं हि स्वप्ने जागरितवासनामयो मूर्तिमन्तः स्त्र्याद्याः कामाः उपलभ्यन्त इति? न। तेषामनृतत्वेन वासनामयानामप्यनृतत्वोपपत्तेः। अनृततृष्णात्यागरूपेणैव ब्रह्मचर्येण, ब्रह्मण्येव स्थितानां ब्राह्मलौकिकानां कामानां सङ्कल्पमात्रेण समुत्थानश्रवणात्, न ते

अनृतस्वाप्नकामतुल्या इत्युत्प्रेक्षितुं युक्तम् । अथ ब्रह्मणः समुत्थितानां तेषां न युक्तं ब्रह्मण इव परमार्थसत्यत्वम् – इत्येतावतांशेन तेऽप्यनृता इत्याशयः ; अत्यल्पमिदमुच्यते, यतः सद्ब्रह्मैवैकं सत्यं परमार्थतः, सर्वमपि ततो व्यतिरिक्तम् अनृतमेव, 'वाचारम्भणं विकारो नामधेयम्' (६ · १ · ४ ....) इति श्रुतेः । इह तु ब्रह्मलोकोऽस्माल्लोकात् प्रेत्य प्राप्यः, तत्रैव प्राप्यम् ऐश्वर्यम्, उपभोग्याश्च कामा इति सर्वम् आपेक्षिकं सत्यम् । ' आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते ' (वि. पु. २-८-९७) इति पुराणस्मृतेः । सगुणविद्याविपाकावस्थानत्वात् स्वर्गादिवदवस्थान्तरगत्वेनैव एतदैश्वर्यमुपवर्ण्यते । अतो जगत्सृष्ट्यादिव्यापारवर्जमीश्वरसाम्यमेवैतत् फलं नित्यसिद्धेश्वरान्वेषणादिफलम्, तदायत्तमेव च मुक्तानामैश्वर्यं नामेति **शारीरके** (वे. सू. ४–४–१७) निर्णीतम् । तस्मात्, आपेक्षिकमेव सत्यत्वम् अर्णवसोमसवनवृक्षादीनाम् ; परमार्थब्रह्मस्वरूपेण तु सर्वेऽपि कामाः–अप्रविहाय लौकिकान् वासनामयांश्च – सत्या एवेत्यनवद्यम् ॥ ४ ॥

( इति पञ्चमः खण्डः )

# १०. हृदयनाडीनां रश्मिसंबन्धः

**अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः ॥ १ ॥**

**तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः ॥ २ ॥**

## उत्तरग्रन्थसंबन्धः

३८. एवं तावद् यदिदमस्मिन् ब्रह्मपुरे शरीरे दहरं पुण्डरीकं वेश्म, तस्मिन् यो दहरः आकाशाख्यः पर आत्मा अस्मिन् सर्वे सत्याः कामाः समाहिताः । तं परमात्मानम् अपहतपाप्मत्वाद्यष्टगुणकं हृदयवर्तिनं जगतो लोकात्मकस्य वर्णाश्रमादिलक्षणस्य चासंभेदाय विधारकत्वात् सेतुभूतम्, सर्वसंसारधर्मासंस्पृष्टं यज्ञादिसर्वपुरुषार्थसाधनेभ्योऽप्यतिशयवता परमसाधनेन बाह्यार्थविषयकतृष्णापरित्यागलक्षणेन ब्रह्मचर्येण सहकारिसाधनेनान्विष्य यः साक्षात्कृतवान्, स सुषुप्तेऽहरहः स्वर्गलोकाख्यं ब्रह्मैति । तमेव च परमात्मानम् इतः प्रेत्य गतस्य ब्रह्मलोके यथेप्सिताः कामाः सङ्कल्पमात्रेण समुत्तिष्ठन्ति, तेन तेन च कामेन संपन्नो विद्वान् महीयते इत्युक्तम् ॥

अथेदानीं यथोक्तोपासकस्य ब्रह्मलोकगमनार्थं मूर्धन्यया नाड्या गतिर्वक्तव्या – इत्युत्तरो ग्रन्थ आरभ्यते ॥

## नाडीनां विविधवर्णरसपूर्णत्वे आदित्यो हेतुः

३९. अथ या एता हृदयपुण्डरीकवेश्मनः परमात्मोपासनस्थानत्वेन निर्दिष्टात् सर्वतो विनिःसृता नाड्यः, रश्मय इवादित्य-

मण्डलात्, ताः पिङ्गलस्य रसस्य अणिम्नस्तिष्ठन्ति, सूक्ष्मेण रसेन पूर्णास्तिष्ठन्ति इत्यर्थः। एवं शुक्लस्य नीलस्य पीतस्य लोहितस्य रसस्य पूर्णास्तिष्ठन्ति ता नाड्यः ॥

अथ किं निमित्तोऽयं नाडीनां वर्णभेद इति ? अत आह – 'असौ वा आदित्यः' – इत्यादिना। आदित्यस्य तेजसा पित्ताख्येन पाकाभिनिर्वृत्तेन कफेनाल्पेन संपर्कात् पिङ्गलं भवति तेजः; तदेव वातभूयस्त्वान्नीलम्, कफभूयस्त्वाच्छुक्लम्, कफेन समतायां पीतम्; शोणितबाहुल्येन लोहितम् – इतीयं वर्णभेदप्रतीतिरिति वदन्ति। तत्तद्वर्णविशेषयुक्ताद् रसात्, तत्तद्वर्णा इव नाड्यो भवन्ति। येनकेनचिद्वा निमित्ताद् भवन्तु रसानां वर्णविशेषाः, आदित्यरश्मिसंबन्धादेव तु तेषां विविधा वर्णाः–इति श्रुत्यभिप्रायः। यत आह– असौ वा आदित्यः पिङ्गलः। एष शुक्लः, एष नीलः, एष पीतः, एष लोहितः काले काले। तत्तद्वर्णयुतरश्मिप्रभाविता नाडीरसास्तत्तद्वर्णा भवन्ति। विशेषकारणं तु वैद्यकाद् विज्ञेयम्। न तत्र निर्भरो वाक्यस्य ॥ १ ॥

## आदित्यरश्मीनां नाडीभिः संबन्धः

४०. अगणितयोजनान्तरे स्थितस्यादित्यस्य कथमध्यात्मं शरीरान्तःस्थिताभिर्नाडीभिः संबन्ध इति ? एतत्प्रत्याययन्ती तत्र दृष्टान्तमादत्ते श्रुतिः 'तद्यथा' इति। यथा लोके महान् पन्था आतत उभौ ग्रामौ इमं चामुं च संनिहितं विप्रकृष्टं चेत्युभावपि ग्रामौ गच्छति

संबध्नाति, एवमेवैता विप्रसृता आदित्यस्य रश्मयः, उभौ लोकौ इमं भूलोकं च अमुम् आदित्यलोकं च गच्छन्ति संबध्नन्ति ; अमुष्मादादित्यमण्डलाद् हि प्रतायन्ते, भूलोकस्थपुरुषपर्यन्तं सन्तता भवन्ति इत्यर्थः । ता रश्मयः आसु पुरुषगतासु नाडीषु सृप्ता भवन्ति । अत एवेमा नाड्यः पिङ्गलादिवर्णरसपूर्णा भवन्तीति भावः । ता यथैव सूर्यात् प्रतायमाना नाडीषु सृप्ताः, एवमेवाभ्यो नाडीभ्यः प्रतायन्ते । ततः प्रवृत्ताः सन्तानरूपेण अमुष्मिन् आदित्ये सृप्ता भवन्ति । तदेवं हृदयस्थनाडीनाम् आदित्यस्य च रश्मिसंबन्धोऽनुवर्तत इत्यभिप्रायः ॥ २ ॥

## ११. सुषुप्तिर्नाडीषु भवति

**तद्यत्रैतत् सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा संपन्नो भवति ॥ ३ ॥**

### सुषुप्तप्राप्तिक्रमः

४१. यथोक्तरश्म्यनुसारेण ब्रह्मलोकं प्रति गमनं परस्माद् वक्ष्यामि, इदानीं तावत् 'अहरहः स्वर्गं लोकमेति' इति यदुक्तं पुरस्तात् तत्प्रकारमेव विवरिष्यामि येन ब्रह्मलोकगतिप्रकारोऽपि सुबोधो भवेत् । – इत्याशयेनाह '**तद्यत्रैतत् सुप्तः**' इत्यादि ॥

तत् तत्र एवंस्थिते यत्र यदा अयं ब्रह्मोपासकः सुप्तः समस्तः, स्वापं गत उपरतसर्वकरणवृत्तिर्भवति । स्वप्नोऽपि स्वाप एवेत्यत-स्तद्व्यावृत्त्यर्थं 'समस्तः' इति विशेषणम् । अत एव विषयेन्द्रियसंपर्क-जनितकालुष्याद् विमुक्तः, अत्यच्छस्वरूपं गतः सन् यत्र न कश्चन 'स्वप्नं न विजानाति' इत्यर्थः । स्वप्ने हि विषयाभावेऽपि तत्संपर्क इव भवत्यात्मनः । 'उतेव स्त्रीभिः सह मोदमान' (बृ. ४–३–१३) इति हि श्रुत्यन्तरम् । तत्रोपसंहृतकरणोऽपि बुद्धिसहित इव भवतीति न सम्यक्प्रसन्नः । 'सधीः स्वप्नो भूत्वा' (बृ. मा. ४–१–७) इति श्रुत्यन्तरात् । इह पुनर्बुद्धेरपि प्रत्यस्तमितत्वात् मानसोऽपि विषय-संपर्को नावशिष्यत इत्यतः 'संप्रसन्नो' न स्वप्नं विजानाति । **'आसु तदा नाडीषु सृप्तो भवति'** । यथोक्तासु रश्मिसंबद्धासु सृप्तो भवतीति नाडीषु सृत्वा तद्द्वारा पूर्वोक्तप्रकारेण स्वर्गं लोकं स्वर्गलोकाख्यं सत्यकामादिगुणकं ब्रह्म गच्छतीत्यर्थः ॥

कथमेतदवगम्यते परमात्मानमपि गच्छतीति ? ननु 'आसु नाडीषु तदा सृप्तो भवति' इति केवलं नाडीसर्पणमेव ह्यत्र विज्ञायते । सत्यम् । तथापि पूर्वोक्तब्रह्मलोकप्राप्तिरपि नाडीसृत्या समुच्चीयत एव । पूर्वमेव श्रुत्युक्तायास्तस्याः परिहारकारणाभावात् । वाक्यशेषाच्च । वाक्यशेषे हि **'तं न कश्चन पाप्मा स्पृशति'** इत्याह । न च ब्रह्मसंपत्तेरन्यत्र स्वप्नादर्शनं पाप्मास्पर्शनं वा संभवति । उक्तं च प्रागपि 'सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः' (४–१) इति । न च देहसंबद्धनाडीसर्पणमात्रेण पाप्मासंस्पर्श इत्युपपद्यते ;

देहसंबन्धेनैव हि धर्माधर्मलक्षणपाप्मसंबन्धः सुखदुःखहेतुर्दुर्निवारणः। इह तु सेतुभूतं ब्रह्म प्राप्तवन्तं संप्रसादं 'न सुकृतं तरति न दुष्कृतम्' (४–१) इति युक्तं न कश्चन पाप्मा स्पृशति इति वक्तुम्। 'नाडीषु सृप्तो भवति' इत्येतावन्मात्रकथनं तु नाडीसंबद्धरश्मिद्वारेण ब्रह्मलोकमार्गानुसरणस्य प्रतिपाद्यत्वेन प्रक्रान्तत्वात् इति न दोषः ॥

कथं नाडीसर्पणेन पाप्मास्पर्शः ? — इत्यत्राह 'तेजसा हि तदा संपन्नो भवति' इति। तेजसा सौरेण नाडीगतेन पित्ताख्येन, अभिव्याप्तकरणः स न बाह्यान् विषयानीक्षते; अत एव न पाप्मसंसर्गावकाशोऽत्रेति भावः। अथवा 'तेजसा' इति ब्रह्मणा तदा संपन्नो भवति इति वाक्यं व्याख्येयम् 'सता सोम्य तदा संपन्नो भवति' (६–८–१) इति हि षष्ठे विज्ञातम्। तेजःशब्दो ब्रह्मण्यपि प्रयुक्तः श्रुत्यन्तरे 'ब्रह्मैव तेज एव' (बृ. ४–४–७) इति। ब्रह्मणा हि तदा संपन्नो भवति नाडीद्वारेण, अतस्तं न कश्चन पाप्मा स्पृशति — इति वाक्यार्थः। इदमेव तु युक्ततरं व्याख्यानम्। यतो नाडीषु शयानस्य सर्वथा संप्रसन्नत्वे द्वितीयदर्शनलक्षणस्वप्नाभावे च न किंचित् कारणं शक्यमुत्प्रेक्षितुम्; देहसंबन्धस्यानपायात् तत्र। ब्रह्मसंपन्नस्य तु जीवत्वापादनोपाधेरुपशान्तत्वात्, नैव किंचिद् विजानाति न च पाप्मना संसृज्यते तत्र, एकत्वादेव—इति युक्तम्। तस्मात्, 'नाडीषु सृप्तो भवति न तं पाप्मा स्पृशति' इति कीर्तनं नाडीस्तुत्यर्थम्; ब्रह्मण्येव तु संपन्नो न स्वप्नं विजानाति, न च पाप्मना संस्पृश्यत इति युक्तमित्यलमतिप्रपञ्चेन ॥ ३ ॥

# १२. उत्क्रान्तिकथनार्थं मरणावस्थावर्णनम्

**अथ यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्जानासि मां जानासि मामिति स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति ॥ ४ ॥**

## उत्क्रान्तिपर्यन्तं संज्ञानुवृत्तिः

४२. अथ यत्र यदा एतद् एवं लोकप्रसिद्धप्रकारेण अबलिमानं दौर्बल्यं रोगजरादिनिमित्तं कृशीभावं नीतो भवति प्रापितो भवति जीवः, तदा तमभित आसीनाः, सर्वत उपविष्टा बन्धवः आहुः '**जानासि मां जानासि माम् ?**' इति। वीप्सार्था द्विरुक्तिः, पुत्रः, भार्या, पिता, माता – इत्यादयः सर्वेऽपि पर्यायेण पृच्छन्ति 'किं जानासि माम् ?' इति, अपि जीवतीति ज्ञानार्थम्। '**स यावदस्माच्छरीरादनुत्क्रान्तः**', सप्राणः शरीरे वर्तते संज्ञावान् भवति, तावज्जानाति। 'अयं मम पुत्रः, भार्या, पिता, माता' वेति यथावत् प्रत्यभिज्ञातुं शक्नोतीत्यर्थः। उत्क्रान्तस्तु न विजानाति यथैव सुषुप्तः। यतस्तदा प्राणानां चक्षुरादीनां सर्वेषामपि विज्ञानमादायैव सुषुप्तो भवत्युत्क्रान्तो वा 'तेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' (बृ. २-१-१७), 'स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवति' (बृ. ४-४-१) इति च श्रुत्यन्तरात् ॥ ४ ॥

## १३. उत्क्रान्त्यनन्तरं विदुषो रश्मिभिरूर्ध्वगमनम्

अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते स ओमिति वा होद्वा मीयते स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम् ॥ ५ ॥

तदेष श्लोकः । शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ ६ ॥

### उत्क्रान्तिक्रमः

४३. अथ विदुषो देहादुत्क्रान्तिम् आदित्यद्वारा ब्रह्मलोकप्राप्तिं च वक्तुमारभते – **अथ यत्रेत्यादिना** ॥

यथावर्णिता मरणावस्था समानैव विदुषोऽविदुषश्च ; समाना चोत्क्रान्तिः शरीरात्, यथा स्वापाद्यवस्थाः । विद्वांस्तु भावनाप्रकर्षेण यथैव जाग्रति, तथैव सुषुप्तेऽपि ब्रह्मप्राप्तो भवति, 'अहरहः स्वर्गं लोकमेति' इति वचनात् ; तथा देहादुत्क्रान्तः सन् ज्ञानप्रकाशितं मोक्षनाडीद्वारम् आश्रयते, यथा वक्ष्यत्युदर्के ; न त्वविद्वानिव देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य कर्मयुक्तो देहान्तरग्रहणाय संसरति – इति विशेषः । निर्णीतं चेदं शारीरके 'समाना चासृत्युपक्रमात् ....' (वे.सू. ४-२-७) इत्यत्र । अत इहोत्क्रान्तिक्रमोऽननु-

कीर्तितोऽप्यन्यतो ग्राह्यः । तथा हि षष्ठे प्रायणविषया श्रुतिः– 'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्' (६–८–६) इति । निर्णीतं च शारीरकभाष्ये सर्वत्राप्यत्र वागादीनां प्रत्येकमुत्तरस्मिन्नुत्तरस्मिन् वृत्तिमात्रोपशमः, न तु वृत्तिमतोऽपीति । तद्यथा 'वाग्वृत्तिः पूर्वमुपसंह्रियते मनोवृत्तावपरिलुप्यमानायाम् ; वाच इव चक्षुरादीनामपि सवृत्तिके मनस्यवस्थिते वृत्तिलोपदर्शनात् सर्वाण्यपीन्द्रियाणि मनस्युपसंह्रियन्ते, तदपि मनो वृत्तिद्वारेणैव प्राणे प्रलीयते । स च प्राणो विज्ञानात्मन्यवतिष्ठते, तत्प्रधाना प्राणवृत्तिर्भवति ; स चात्मा तेजःसहचरितेषु भूतेष्ववतिष्ठते – इति भाष्ये प्रदर्शितम् । सोऽयं क्रमो विद्वदविदुषोः समान इत्यवोचाम ॥ ४ ॥

## विदुषो नाडीविशेषद्वारैवोर्ध्वगतिः

४४. अथेदानीम् उत्क्रान्तौ विदुषो विशेषमनुक्रमिष्यन्नाह – **'अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते'** इत्यादि । वक्ष्यमाणया मोक्षनाड्या निष्क्रामन् अहनि रात्रौ वा मृतः, एतैरेव यथावर्णितैरादित्यसंबद्धै रश्मिभिः, ऊर्ध्वमाक्रमते–इत्यर्थः ॥

**'स ओमिति वा होद्वा मीयते'** । स उपासकः, ओमित्येव परमात्मानं ध्यायन् ऊर्ध्वमेव मीयते प्राणवियोगेन गच्छतीत्यर्थः । न त्वविद्वानिव कर्मप्रेरितो देहान्तरं नीयते । 'ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् । यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥' (गी. ८–१३) इति भगवद्वचनात् ॥

## विदुषाऽनुसर्तव्यो देवयानमार्गः

४५. 'स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छति।' इति त्वरावचनं मार्गान्तरापेक्षया। यस्मादर्चिरादिदेवयानमनुसृत्यैव गन्तव्यं सगुणोपासकैरपीति निर्धारितम् 'अर्चिरादिना तत्प्रथितेः' (वे. सू. ४-३-१) इत्यत्र। यद्यपि श्रुतिषु गतिरन्यथाऽन्यथा वर्ण्यते तथाप्यर्चिरादिसृतौ भूयांसि मार्गपर्वाणि अल्पीयांसि त्वन्यत्र; भूयसां चानुगुण्येनाल्पीयसां नयनं न्याय्यमित्यपि निर्णीतं तत्रैव **शारीरके**। तस्मात्, 'एतैरेव रश्मिभिः' इत्यवधारणं मार्गान्तरापेक्षया इति व्याख्याय, अर्चिरादिगतिरप्यत्रोपसंहर्तव्या। सा चार्चिरादिगतिः, 'तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथः' (४-१५-५, ५-१०-१, २) इति श्रूयमाणा। अत्र कौषीतकिनां (कौ. १-३) पाठमनुरुध्य तत्रोक्तो वायुः, संवत्सरादित्ययोरन्तराले उपसंहर्तव्यः, इति छान्दोग्यश्रुत्यपेक्षया अवगम्यते। छान्दोग्यवाजसनेयकयोरेकत्र देवलोको न विद्यते परत्र संवत्सरः; तस्मात्, माससंबद्धः संवत्सरः पूर्वम्, तदनन्तरं देवलोकः, देवलोकादादित्यः—इति क्रमोऽनुसर्तव्यः; कौषीतकिपठितो वरुणलोकस्तु विद्युतः परम्—इत्येवम् मार्गपर्वोपसंहारानुक्रमो निर्णीतः **शारीरकभाष्ये** (सू. भा. ४-३-२, ३)। स एष निर्णयोऽत्रानुसन्धेयः। अर्चिरादयश्चेमे आतिवाहिका देवताविशेषा एवेत्यपि शारीरकदर्शितनयेन (वे. सू. ४-३-४) ग्राह्यम् इति दिक्॥

अथेदानीं प्रकृतामेव श्रुतिव्याख्यामनुवर्तामहे । स विद्वान् **यावत् क्षिप्येन्मनस्तावदादित्यं गच्छति** यथोक्तार्चिरादिना देवयानेन पथा । . क्षिप्रमेव गच्छति न कोऽपि कालविलम्बहेतुरस्य गमनं विहन्ति । **'एतद् वै खलु लोकद्वारम्'** प्रसिद्धमेतद् यदादित्यमण्डलं ब्रह्मलोकगमनं प्रति द्वारं ब्रह्मप्रपदनं विदुषाम् । **'निरोधोऽविदुषाम्'**, आदित्यतेजसा हि निरुद्धाः सन्तस्ते मार्गान्तरेण गत्वा शरीरत्वाय संसरन्तीत्यर्थः । 'एष निरोधः' (प्र. १–१०) इति आथर्वणेऽपि ॥ ५ ॥

## १४. मोक्षनाडीप्रशंसा

**तदेष श्लोकः –**

**शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिः-**
**सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे**
**भवन्त्युत्क्रमणे भवन्ति ॥ ६ ॥**

### मूर्धन्यनाड्यैवैका अमृतत्वाय

४६. तत् तदेतस्मिन् यथोक्तेऽर्थे एष श्लोको मन्त्रो भवति । शतं चैका च हृदयस्य नाड्यः । शतमिति अनेके इत्यर्थः ; एका च शताधिका । तासां नाडीनाम् एका सुषुम्नाख्या नाडी मूर्धानमभिनिःसृता, ततो विनिर्गता । तया ऊर्ध्वमायन् गच्छन् अमृतत्वमेति ।

विष्वङ् नानागतयोऽन्याः ; ताश्चोत्क्रमणे भवन्ति । यथाकर्म यथाश्रुतं संसारगमनद्वारभूता इतरा नाड्यः ; एका त्वेवासौ अमृतत्वाय । एतदपि चिन्तितं **शारीरके** 'तदोकोऽग्रज्वलनम्' (वे. सू. ४-२-१७) इत्यादि सूत्रे । तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः'(बृ.४-४.७) इति श्रुत्यन्तरे हृदयाग्रज्वलनपूर्विका चक्षुरादिस्थानापादाना चोत्क्रान्तिः श्रूयमाणा विभज्य व्याख्येया । समानेऽपि हि विद्वदविदुषोर्हृदयाग्रप्रद्योतने तत्प्रकाशितद्वारत्वे च विद्वानेव मूर्धस्थानान्निष्क्रामति, इतराभिस्त्वितरे ; तेषां विद्यासामर्थ्याभावात् । केवलोत्क्रमणे भवन्तीतरा नाड्यो द्वारभूताः, मूर्धन्यनड्यैवैका अमृतत्वप्राप्तौ द्वारम्– इति हार्दविद्यां प्रकृत्य विशेषसमाम्नानात् – इति तत्र निर्णीतम् । तस्मात्, नाडीद्वारा ब्रह्मलोकगमनार्थं विवेकिना हार्दोपासनानुष्ठाने यत्नवता भवितव्यम् इत्यर्थः ॥

उत्क्रमणे भवन्ति इति द्विरभ्यासः प्रकृतविद्याप्रकरणसमाप्त्यर्थः ॥ ६ ॥

( इति षष्ठः खण्डः )

**इति श्रीहार्दविद्यारहस्यविवृतिः समाप्ता**

# परब्रह्मविद्यारहस्यविवृतिः

❋ ❋ ❋

## १. प्रजापतिसन्देशः

य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥ १ ॥

### उत्तरग्रन्थसंबन्धः

४७. नमः प्रजापतये ब्रह्मविद्याचार्याय ! हार्दं ब्रह्मापहतपाप्मत्वादिगुणकं तत्स्थकामांश्च ब्रह्मचर्यसाधनपूर्वकं निरन्तरोपासनाजन्य साक्षात्कारबलेन यो मूर्धन्यनाड्या ऊर्ध्वमुत्क्रम्य, इहलोकपरलोकयोः संबन्धयित्रीभिरादित्यरश्मिभिर्व्याप्तं मार्गं देवयानाख्यमनुसृत्य ब्रह्मलोकं गच्छति तस्य ब्रह्मण ऐश्वर्यं प्राप्तस्य सर्वेषु लोकेषु पितापुत्रस्रग्गन्धमाल्यस्त्र्यादिषु कामचारो भवतीत्युक्तम् । तस्य च नाडीद्वारेणोत्क्रान्तस्य कालान्तरे अमृतत्वं भविता इत्युक्तम् । तत्रानेनैव प्रकारेण

मोक्षप्राप्तिफलमधिगम्यते नान्यथा इत्याशङ्कां व्याविवर्तयिषया उत्तरो ग्रन्थ आरभ्यते ॥

किञ्च, 'अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाच' (३–४) इत्युक्तम् । एतत् किं हार्दविद्यानुष्ठातुरेव भावनाप्रकर्षमात्रबलाद् भवति शरीरात्समुत्थानम्, उत सम्यग्ज्ञानेनापि शक्यते आसादयितुम् ? किं चैवमशरीरतां स्वात्मनोऽनुभवतः कथं कीदृशी पररूपहानिः स्वरूपेणाभिनिष्पत्तिश्च ? येन च स्वरूपेणाभिनिष्पद्यते स एव परमार्थत 'आत्मा एतदमृतमभयमेतद् ब्रह्म' इति च कथं विज्ञातुं शक्यते ? – इत्येतत् सर्वं विशदयितुमपि परो ग्रन्थ आरभ्यते ॥

## निरुपाधिकब्रह्मोपदेशार्थोऽप्युत्तरो ग्रन्थः

४८. अपि च परिशुद्धब्रह्मस्वरूपोपदेशार्थमप्युत्तरो ग्रन्थ आरब्धव्यः । तथा हि–द्विरूपं ब्रह्मावगम्यते वेदान्तेषु; नामरूपविकारभेदोपाधिविशिष्टम्, तद्विपरीतं च सर्वोपाधिविवर्जितमपीति । तत्र सोपाधिकं ब्रह्म 'अपरम्', निरुपाधिकं तु 'परम्' – इति व्यवहारः, 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः' (प्र. ५–२) इति श्रुतेः । तत्रापरं ब्रह्म सोपाधिकं सविशेषं चोपासनायोपदिष्टम् अतीते ग्रन्थे ; 'अस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः'(८-१-१) इति परिच्छिन्ने एव देशविशेषे सर्वगतस्यापि ब्रह्मण अन्वेष्यत्वोपदेशात्, उत्क्रान्तिगत्यैश्वर्यादिप्राप्तिसंकीर्तनाच्च विदुषः । तद्विलक्षणं च परं निरुपाधिकं निर्विशेषं च परिशुद्धं ब्रह्मस्वरूपं निर्देष्टव्यम्,

सद्योमुक्तिलक्षणं चामृतत्वं फलं दर्शयितव्यम् उत्तमाधिकारिणां कृते – इत्यतोऽप्युत्तरो ग्रन्थ आरभ्यते ॥

## आख्यायिकार्थः

४९. इन्द्रविरोचनयोः प्रजापत्युपसत्तिः, ब्रह्मचर्यवासः, तदनन्तरमेव चोपदेशः – इत्येवमादिकीर्तनरूपा आख्यायिका तु गुरूपगमनेनैव ग्रहीतव्या विद्या, योग्यशिष्यायैव परीक्ष्य देया चाचार्येण – इत्याद्याचारप्रदर्शनार्था ; विद्यास्तुत्यर्था च इत्थंमहाभागेयं विद्या यदिमां देवासुरराजावपि सन्तौ इन्द्रविरोचनौ महता ब्रह्मचर्येण गुरुमुखादधिगतवन्तौ इति ॥

## सन्देशवाक्यार्थः

५०. य एवात्मा हृदयपुण्डरीकस्थाने उपासनया उपलब्धव्य इत्युपदिष्टः, स एव स्थानाद्यनपेक्षयापि प्रक्रियया अन्वेष्टव्यः स एव चायं विजिज्ञासितव्यः–इत्युच्यते । स च शास्त्राचार्योपदेशग्रहणपूर्वकमन्विष्य विजिज्ञासितव्यः, विशिष्य ज्ञातुमेष्टव्यः, स्वसंवेद्यतामापादयितव्य इत्यर्थः । यस्तमनुविद्य विजानाति स एवमन्विष्य विज्ञातवान् सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् । ‘अनुविद्य व्रजन्ति’ इति यथापूर्वमुक्तम्, न तथेह गमनादिकं कामानां च पर्यायेण सङ्कल्प्य प्राप्तिर्वा अपेक्ष्यते, किं तु इहैव विज्ञानमात्रेण सर्वान् कामान् युगपदेवाश्नुते इत्यर्थः । ‘सोऽश्नुते सर्वान् कामान् सह’ (तै. २-१) इति श्रुत्यन्तरात् ॥

यथा च पूर्वत्र 'तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' (१–१) इति अन्वेषणं विज्ञानं च विहितम्, उपासनानुसारेण च फलमित्युक्तम्, न तथेह विधिरदृष्टं फलं वा विवक्ष्यते, ब्रह्मात्मज्ञानस्य वस्तुतन्त्रत्वेन विधेरनवकाशात्; किं तु बाह्यविषयेषु स्वभावतः प्राप्तां प्रवृत्तिं निरुध्य आत्मैवान्वेष्टव्यः, स एव च विजिज्ञास्यः, वक्ष्यमाणप्रकारेण – इति नियम्यते। प्रत्यङ्मुखीभूयान्विष्यतो हि विज्ञानं तत्फलं च नान्तरीयकमिति ॥

## २. इन्द्रविरोचनयोः प्रजापत्युपसत्तिः

**तद्धोभये देवासुरा अनुबुबुधिरे ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानितीन्द्रो हैव देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः ॥ २ ॥**

### इन्द्रविरोचनयोरभिगमने हेतुः

५१. तदेतद् प्रजापतिवाक्यम् उभये देवाश्चासुराश्च अनुबुबुधिरे कर्णाकर्णिकया प्राप्तमनुबुद्धवन्तः। ते ह स्वगोष्ठीसमये ऊचुः – हन्त यद्यनुमतिर्भवताम्, तमात्मानं यमन्विष्य सर्वांश्च लोकान् आप्नोति सर्वांश्च कामान्, तमन्विच्छामः – इति।

तेषां देवानामिन्द्रो हैव स्वयं प्रवव्राज, विरोचनोऽसुराणाम् – इत्येतद् विद्यास्तुत्यर्थमित्यवोचाम । तौ ह असंविदानावेव असंविदित इतरेण इतरः अहमेव प्रथमतरं गुरुतरामिमां विद्यां ग्रहीष्यामीति स्पर्धया – प्रजापतिमभिजग्मतुः – इत्यर्थः ॥ २ ॥

## ३. इन्द्रविरोचनयोर्ब्रह्मचर्यवासः, प्रश्नश्च

**तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुस्तौ ह प्रजापतिरुवाच किमिच्छन्ताववास्तमिति तौ होचतुर्य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमनुविद्य विजानातीति भगवतो वचो वेदयन्ते तमिच्छन्ताववास्तमिति ॥ ३ ॥**

### शिष्ययोः परिप्रश्नः

५२. अथेन्द्रविरोचनयोः परिप्रश्नं प्रस्तौति '**तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुः**' – इत्यादिना । 'समित्पाणी' इति पूर्वं सविनयाभिगमनमुक्तम् ; इदानीं ब्रह्मचर्यवासानन्तरं प्रजापतिनाऽभ्यनुज्ञातावेव परिप्रश्नं चक्राते इत्याचारक्रमः प्रोक्तः । जनश्रुत्या प्रेरितौ तं भवदुक्तम् – अपहतपाप्मत्वादिगुणकम् आत्मानं वेदितुमिच्छन्तौ

ब्रह्मचर्यमवास्त्व । अत्र भवानेव प्रमाणम् इत्यभिप्रायः । 'अवास्तम्' इति पुरुषव्यत्ययश्छान्दसः । ब्रह्मचर्यवासः परस्परेर्ष्यादित्यागश्च श्रुत्यानुकीर्तितो विद्यागौरवज्ञापकः ॥ ३ ॥

# ४· अक्षिपुरुषोपदेशः

**तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेत्यथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येष उ एवैषु सर्वेष्वन्तेषु परिख्यायत इति होवाच ॥ ४ ॥**

## प्रजापतेः प्रतिवचनम्

५३. आचार्यस्यापि धर्म एषो यन्न्यायप्राप्तशिष्यतारणमुपदेशेन – इति द्योतयन्ती श्रुतिराह । **तौ ह** इन्द्रविरोचनौ किल दीर्घब्रह्मचर्येण शुद्धौ प्रश्रयान्वितौ वीक्ष्य **प्रजापतिरुवाच । य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मा** – इति । 'अक्षिणि' इति प्रदर्शनार्थम् । सर्वेष्वपीन्द्रियेषु विषयभूतेषु य एष प्रत्यङ्मुखैर्दृश्यते ध्यायिभिः पुरुषः, सर्वासु पूर्षु शेते इति पुरिशयः, 'दृष्टेर्द्रष्टा, श्रुतेः श्रोता, मतेर्मन्ता, विज्ञातेर्विज्ञाता' – इति प्रसिद्धः, एष आत्मा अपहतपाप्मत्वादिगुणकः यमवोचं पुराऽहम्, यद्विज्ञानात् सर्वे लोकाः सर्वे च कामा आप्ता भवन्ति । एष हि सर्वे लोकाः सर्वे च कामाः – इत्यभिप्रायः ॥

एतदेवात्मतत्त्वम् **अमृतम्**, अमरणधर्मि, 'यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्' (७–२४–१) इति ह्युक्तम् । **एतदभयम्** एतदेव ह्यद्वितीयात्मत्वादभयम् । 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषोऽमन्वानस्य' (तै. २–७) इत्येकस्मिन्नेवात्मनि स्वात्मत्वेन प्रतिष्ठां गतस्याभयम्, अज्ञानेन स्वल्पमपि स्वात्मनो भेदं पश्यतस्तु भयं च भवति–इति श्रुत्यन्तरे आत्मनोऽभयरूपत्वख्यापनात्; 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद' (बृ. ४–४–२५) इति श्रुत्यन्तराच्च । य एवैतादृशः पुरुषः, एतदेवात्मतत्त्वं **ब्रह्म** । तस्यैव नित्यशुद्धबुद्धमुक्तस्वभावस्य ब्रह्मशब्दार्थत्वात् – इत्युवाचेति संबन्धः ॥

## शिष्ययोः प्रश्नः, तदपाकरणं च

५४. इत्युक्तवन्तं तं प्रप्रच्छतुरिन्द्रविरोचनौ – '**अथ योऽयं भगवोऽप्सु परिख्यायते, यश्चायमादर्शे कतम एष**' इति । 'अक्षिणि' इति पुरुषस्याधिकरणमुक्तम् । तत्र छायारूप एव पुरुष उक्तः – इति मन्वानौ, तौ ऊचतुः । 'योऽयं भगवोऽप्सु परिख्यायते' इत्यादि । न खल्वक्षिण्येव केवलं पुरुषो दृश्यते, किं तर्हि अप्सु, आदर्शे खड्गादौ चेत्येवं स्वच्छाधिकरणेषु सर्वत्रापि । अतः 'कतम एष आत्मा' 'एष्वन्यतम एव, अथवा सर्वेष्वप्येतादृशेषु स्थलेषु एक एव पुरुषः' इति यथाश्रुतप्रश्नस्यार्थः । तत्राशयस्तु किं भवदुक्तापहत-

पाप्मत्वादिगुणकत्वं छायात्मन्येव प्रत्येतव्यम्, उतान्य एवायमात्मा भवदभिप्रेतः ? – इति ॥

अथैवं पृष्टः प्रजापतिः '**एष उ एवैषु सर्वेष्वन्तेषु परिख्यायत इति होवाच**'। 'तमेव भान्तमनु भाति सर्वम्' (मुं. २–२–१०) इति श्रुत्यन्तरात् । न ह्येतस्मात् पुरुषाद् वस्त्वन्तरमस्ति तदव्याप्तं तदनात्मकं वा–इति भावः 'पुरुष एवेदं विश्वम्' (मुं. २–१–१०), 'अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्' (गी. २–१७) इति हि श्रुतिस्मृती ॥

( इति सप्तमः खण्डः )

# ५. उदशरावे प्रतिबिम्बदर्शनं प्रति विचारः, शिष्ययोः प्रतिनिवृत्तिश्च

**उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथ-स्तन्मे प्रब्रूतमिति तौ होदशरावेऽवेक्षाञ्चक्राते तौ ह प्रजापतिरुवाच– किं पश्यथ इति, तौ होचतुः सर्वमेवेद-मावां भगव आत्मानं पश्याव आ लोमभ्य आ नखेभ्यः प्रतिरूपमिति ॥**

**तौ ह प्रजापतिरुवाच साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथामिति तौ ह साध्वलङ्कृतौ सुवसनौ**

**परिष्कृतौ भूत्वोदशरावेऽवेक्षाञ्चक्राते तौ ह प्रजापति-रुवाच किं पश्यथ इति ॥ २ ॥**

**तौ होचतुर्यथैवेदमावां भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतावित्येष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति तौ ह शान्तहृदयौ प्रवव्रजतुः ॥ ३ ॥**

५५. एवमुक्तावपि बुद्धिकालुष्यस्य कार्त्स्न्येनानपायात् छायापुरुषासक्तचित्ततया तौ प्रजापतिहृदयस्थं भावं नागृह्णीताम् । अतस्तयोर्विपरीतग्रहणमपनेतुकामः प्रजापतिरुवाच **'उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतम्'** – इति वाक्यशेषस्याक्षरार्थः स्पष्टः ॥

अत्र प्रजापतेर्हृदये इदमासीत्, यद् यथा अमू आत्मनश्छायां शरावे पृथगेवास्थितां पश्यन्तौ, नूनं आत्मतत्त्वं तद्विलक्षणं विज्ञास्यतः इति । **तौ होदशरावेऽवेक्षाञ्चक्राते । तौ ह प्रजापतिरुवाच किं पश्यथ ?** – इति । तौ तु नोचतुश्छायां व्यतिरिक्तां शरावे पश्यावः, कोऽयमात्मा विवक्षितो भवतः – इति, यतस्तयोर्नैष शङ्का अभवदिद-मावयोरविदितमिति । अत एव तौ होचतुः **'सर्वमेवेदमावां भगव आत्मानं पश्याव आ लोमभ्य आ नखेभ्यः प्रतिरूपम्'** इति । प्रतिरूपमात्रासक्तौ हि तौ बभूवतुः ॥ २ ॥

## साध्वलङ्करणग्रन्थाभिप्रायः

५६. अत एव 'तौ ह प्रजापतिरुवाच साध्वलङ्कृतौ – इत्यादि । प्रश्नप्रतिवचनग्रन्थभागस्याक्षरार्थः सुगमः ॥

अत्र साध्वलङ्करणाद्यादेशे इदमाकूतं प्रजापतेः – यथैव पूर्वं देहस्य प्रतिबिम्बं शरावे दृष्टम्, तथैव साध्वलङ्कृतयोः सुवसनयोः सुपरिष्कृतयोरपि देहस्य यथातथ्येन प्रतिबिम्बं दृष्टम् । इयांस्तु विशेषः – पूर्वम् अलङ्कारादीनां छाया नासीत् । इदानीं त्वागन्तुकानां तेषां प्रतिरूपं दृष्टम् । देहैकदेशानां केशलोमनखादीनां तु यथापूर्वं न छाया दृष्टा द्वितीयपर्याये परिष्करणेन तेषां देहादपायात् । एवं च देहस्यापि लोमादीनामिवैवागमापायित्वात् नैवात्मता, तद्द्रष्टुस्तु सर्वास्वप्यवस्थास्वनुवृत्तस्यात्मत्वं ध्रुवम् । एवमेवेन्द्रियप्राणमनसां तद्धर्माणां शीतोष्णसुखदुःखादीनां च नैवात्मत्वं तद्धर्मत्वं वा, आगमापायित्वादेवेति विज्ञायते । तथा च भागवती स्मृतिः – 'देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा । तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥' (गी. २–१३, १४), 'अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः । अनाशिनोऽप्रमेयस्य ....' (गी. २–१८) इति च ॥

तदेवमशेषानात्मनिराकरणेन सर्वत्राव्यभिचरितस्वरूपस्य द्रष्टुरेवात्मत्वम्, अपहतपाप्मत्वादिधर्मत्वं चेति साध्वलङ्करणादिदृष्टान्तेन निदर्शितेऽपि इन्द्रविरोचनयोरात्मप्रतिपत्तिर्नाभूत् । प्रजापतिस्तु

स्वाभिप्रेतमेव द्रष्टारं मनसि निधायाऽऽह 'एष आत्मेति होवाचै-तदमृतमभयमेतद् ब्रह्म' इति ॥

## इन्द्रविरोचनयोः प्रतिगमनम्

५७. एतेन प्रजापतिवाक्येन परितृप्तौ इन्द्रविरोचनौ यथाऽऽगतं प्रतिनिवृत्तौ, 'सर्वत्रापि यः कोऽप्यात्मा अस्तीति दृढभावितबुद्धी। तदाह श्रुतिः 'तौ ह शान्तहृदयौ प्रवव्रजतुः' इति ॥

'एष आत्मा' इति प्रजापतिनोक्तः कतम इत्यत्र तु तयोर्भिन्न-भिन्नैव मतिरासीत्। अयमेवाऽऽत्मा तेनोक्तः–इति दृढाग्रहस्तु कारणं तयोः तात्कालिकशान्तहृदयत्वे – इत्यनुपदमेव स्फुटीभविष्यति ॥ ३ ॥

# ६. विरोचनस्य सिद्धान्तः

तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्यात्मानमननु-विद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वाऽसुरा वा ते पराभविष्यन्तीति स ह शान्तहृदय एव विरोचनोऽसुराञ्जगाम तेभ्यो हैतामुपनिषदं प्रोवाचात्मै-वेह महय्य आत्मा परिचर्य आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोतीमं चामुं चेति ॥ ४ ॥

तस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुरासुरो बतेत्यसुराणां ह्येषोपनिषत्प्रेतस्य शरीरं भिक्षया वसने-

**नालङ्कारेणेति संस्कुर्वन्त्येतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते ॥ ५ ॥**

## शिष्ययोर्गतयोः प्रजापतेः पुनः सन्देहः

५८. तौ ह इन्द्रविरोचनौ व्रजन्तौ 'अन्वीक्ष्य प्रजापतिरुवाच'। दूरं गतयोस्तयोरिदमुवाच। इदमपि वचनम् 'य आत्मा अपहतपाप्मा' इत्यादिवचनवत् तयोः कर्णपथमेष्यति कथञ्चित् इति मत्वा। 'अनुपलभ्यात्मानमननुविद्य व्रजतः; यतर एतदुपनिषदो भविष्यन्ति देवा वा असुरा वा ते पराभविष्यन्ति'। यथोक्तलक्षणम् आत्मानं दृष्टेर्द्रष्टारम् अनुपलभ्य श्रवणमननाभ्याम्, अननुविद्य स्वसंवेद्यतामनापाद्य च व्रजत एतौ, एतदपेक्षया विपरीतलक्षणमेवात्मानं गृहीत्वा ये एतदुपनिषदः ईदृशात्मविद्याः विपरीतज्ञाने एव निश्चिता भविष्यन्ति, ते पराभविष्यन्ति श्रेयोमार्गाद् भ्रष्टा भविष्यन्ति – इत्यर्थः। एतेन गुरुकुलं गत्वा सकृदापातश्रवणादेव कृतार्थं मन्यमानानाम् सर्वशङ्कापरिहारेण सुनिश्चितार्थत्वरहितानाम् इयं ब्रह्मविद्या न केवलं न श्रेयसे भवेत्, किं तर्हि विपरीतार्थप्रतिपत्त्या अनर्थायैव भवेत् इत्युक्तं भवति। 'शृण्वन्तोऽपि बहवो यं न विद्युः' (का. १–२–७), 'जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः' (मुं. १–२–८) इति हि विज्ञायते ॥

## विरोचनस्य सिद्धान्तः

५९. अथ तयोरकृतार्थयोरेव सन्तुष्टहृदयेन प्रतिनिवृत्तयोः कतरः किं कृतवान् इत्येतदाख्यातुं श्रुतिराह – 'स ह शान्तहृदय एव

विरोचनोऽसुराञ्जगाम ' इति । गत्वा च किं कृतवान् ? तत्राह – ' तेभ्यो हैतामुपनिषदं प्रोवाच ' । एताम् आत्मना निश्चिताम् उपनिषदं प्रोवाच । 'उपनिषदम्' इति उपनिषत्त्वेन विपरीतबुद्ध्या सुनिश्चिता अविद्यैव परामृश्यते । का नु सा उपनिषत् ? तत्राह – ' आत्मैव महय्यः आत्मा परिचर्यः आत्मानमेव महयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोतीमं चामुं च ' इति । 'आत्मा' इति आत्मबुद्ध्या गृहीतो देह उच्यते । देह एव पित्रा प्रजापतिना उपदिष्ट आत्मा, तस्मिन् देहात्मनि सर्वाण्यात्मविशेषणानि कथञ्चित् समन्वितानि द्रष्टव्यानि, तस्य च सर्वमहत्त्वेन पूज्यमानस्य सर्वलोकसाधनत्वं सर्वकामावाप्तिहेतुत्वं च विज्ञेयम् – इति विरोचनस्याभिप्रायः । यद्यपि प्रजापतिना अपहतपाप्मा विजरो विमृत्युः–इत्यादिविशेषणविशिष्टत्वेन वर्णित आत्मा, यद्यपि स सर्वांश्च कामानाप्नोति इत्यात्मविद्वान् संस्तुतः, तथापि न स्त एव धर्माधर्मौ, अस्मिन्नेव देहे परिचरिते सर्वेष्टापत्तिः –इत्येव विवक्षितमाचार्यस्य ; अन्यथा कथमुदशरावे आत्मानं साध्वलङ्करणादिविभूषितं तमात्मानं दर्शयेत् सः ? – इति मन्यते असुरराट् ; आसुरसंपत्संस्कारवशात् । तथा हि भगवानाह – ' प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ' (गी. १६–७), ' असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्'(गी. १६–८), 'काममाश्रित्य दुष्पूरम्'(गी. १६–१०) इत्यादिभिर्वचनैः कामोपभोगपरमत्वमसुराणाम् ॥ ४ ॥

## आसुरमतनिन्दा

६०. 'तस्माद्प्यद्येह' – इत्यादिना विरोचनसंप्रदायोऽद्याप्यनु-

वर्तते असुरेषु मन्दभाग्येषु, अत एव च ते सर्वपुरुषार्थवञ्चिताः — इत्यनुकम्पां दर्शयति श्रुतिः ; कथं नु नाम विवेकिन एतामुपनिषदं परिवर्जयेयुः, श्रेयोमार्गं चाऽनुसरेयुरिति । वाक्यार्थः सुगमः । दानश्रद्धायागादिश्रेयःसाधनमनुष्ठातव्यम्, शरीराभिमानः सर्वथा परित्यक्तव्यः श्रेयस्कामैरिति काक्वा उपदिष्टं भवति ॥

( इत्यष्टमः खण्डः )

## ७. इन्द्रस्य सम्यग्दर्शनार्थं पुनरपि गुर्वभिगमनम्

अथ हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श यथैव खल्वयमस्मिञ्छरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥ १ ॥

स समित्पाणिः पुनरेयाय तं ह प्रजापतिरुवाच मघवन् यच्छान्तहृदयः प्राव्राजीः सार्धं विरोचनेन किमिच्छन् पुनरागम इति स होवाच यथैव खल्वयं भगवोऽस्मिञ्छरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामो परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥ २ ॥

## इन्द्रस्य छायापुरुषरूपे दोषदर्शनम्

६१. 'अथ हेन्द्रः'। यथा असुरराट् प्रतिनिवृत्त एव स्वगृहीतोपनिषदाभासेन परितुष्टः, तथा इन्द्रः स्वं धाम न जगाम; अप्राप्यैव देवान्, मध्येमार्गं यथागृहीतं छायापुरुषं प्रत्यनुचिन्तयन् 'एतद्भयं ददर्श'। उदशरावे दृष्टा छाया न तावत् प्रजापति-विवक्षित आत्मा भवितुमर्हति। कुतः? यथैव खल्वयमस्मिन् शरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति, सुवसने सुवसनः, परिष्कृते परिष्कृतः; न केवलमेवम्, किं तर्हि एवमेवायमस्मिन्नन्धेऽन्धो भवति। स्रामे स्रामो भवति स्वयमपि। स्रामः काणः, अथवा चक्षुर्नासिका वा यस्य सदा स्रवति, स स्रामः। एवं शरीरे परिवृक्णे छिन्नहस्ते, अयमपि तथा अवभासते। अस्यैव शरीरस्य नाशमनु एषोऽपि नश्यति। तदेवं देहाकारानुकारी, सर्वदेहविकारानुकारेण विकारी चेति सर्वविधदोषयुक्तोऽयम्। अतो नाहमत्र भोग्यं पश्यामि। प्रजापतिर्हि पिता अपहतपाप्मत्वादिगुणकमात्मानं तद्विज्ञानेन सर्वलोककामावाप्तिं चावोचत्; अतो नैवायं तेनोक्त आत्मा भवितु-मर्हति, नाहमत्र छायात्मदर्शने कञ्चिदपि भोग्यं पुरुषार्थं पश्यामि॥

## एकस्यैव वाक्यस्य भिन्नार्थदायकत्वं कथम्?

६२. 'स समित्पाणिः पुनरेयाय' इत्यादिग्रन्थो निगद-व्याख्यातः॥

अत्रेदं चिन्तनीयम् – समानेऽपि 'य एषोऽक्षिणि पुरुषो दृश्यते' इति प्रजापत्युपदिष्टवाक्येन कथं विरोचनेन देह एवाऽऽत्म-त्वेन गृहीतः, इन्द्रेण तु छायापुरुष एवेति? अत्र कारणमिदं स्यात्,

यद्विरोचनस्याऽऽसुरस्वाभाव्यात् स्वमनसि तद्भावभावनया स्थितैव शरीरात्मबुद्धिर्दृढीकृता आचार्यवाक्यश्रवणेन। तत्र युक्तिरपि स्वमत्यनुरूपैवाभात् तस्य। कथम्? 'अक्षिणि पुरुषो दृश्यत' इति वचनं तावन्न छायामुद्दिश्य कीर्तितं भवितुमर्हति; अक्षिणि, जले, खड्गे चेत्येवं तत्सदृशेषु सर्वेष्वन्तेषु परिख्यायते' इति हि पित्रा समुपदिष्टम्। न च छायापुरुषे पाप्मादिप्रसङ्गोऽस्ति, येन तन्निषेधः स्यात् तत्रेति कल्पयेम। तस्मात्, 'आदर्शे मुखं पश्यामि' इति वाक्येन यथा वक्तुः स्वमुखमेव विवक्ष्यते न प्रतिबिम्बम्, एवमेव सर्वेष्वन्तेषु दृश्यमानो देह एव विवक्षितो भवितुमर्हति। तथा हि दृष्टं लोके यद्देहार्थमेव पुरुषः करोति कार्यमकार्यं वा इति प्राप्तमेव तत्र पाप्मादि लोकदृष्ट्या। तच्च नास्त्येव वस्तुतस्तत्र, यतः पौरुषेणायं देहो जरादिदोषदूरः कर्तुं शक्यत एव। तस्मात्, अयमेव देहः सर्वे लोकाः, सर्वे च कामाः। स्वप्रयत्नेन महीकृतेऽस्मिन् परिचरिते च, नावशिष्यन्ते केचिदपरे लोकाः कामा वा आप्तव्या इत्येवं मन्यते पिता – इति चिरभावितदेहात्मभावबुद्धिर्विरोचनः सुनिश्चितोऽभूत्। इन्द्रः पुनः कामक्रोधलोभबलदर्पादिदोषाणाम् अल्पीयस्त्वात् दैवसंपद्युक्तः सन् ददर्श–यदर्थं दारापत्यपुत्रवित्तादि प्रियं भवति, तथादृशमपि देहं तद्गतं चायासं तृणाय मत्वा यागदानाद्यनुष्ठानेन स्वर्गं लोकं प्रेप्सन्ते मनुष्या इत्यतो देहात्मबुद्धिर्निकृष्टा इति सुविदितम्; तन्नूनं नोपदिदिक्षति पिता। तस्मात् अक्षिणि, उदशरावादिजले, तत्सदृशेष्वन्येष्वपि स्वच्छस्थानेषु यः परिख्यायते छायापुरुषः, तस्मिन्नेव कश्चिद् विशेषं पश्यति, येन

'अक्षिणि दृश्यते', 'सर्वेष्वन्तेषु परिख्यायते' इति चोपदिशति – इति यथाश्रुते एव श्रद्धया आत्मास्तित्वं जग्राह। सन्तुष्टहृदयश्च तदेव पितृवाक्यं पुनः पुनः स्मरन्, तदर्थं च विचिन्तयन्, मध्येमार्गमेवं चिन्तयामास – नैवैषा छाया आत्मत्वेनोपदिदिक्षिता भवितुमर्हति। यदा हि देह एव तावदनात्मा धर्माधर्मकार्यत्वात्, जरामरणादिदोष-ग्रस्तत्वाच्च, तदा कैव कथा तच्छायायाः देहायत्तस्वरूपस्थितिव्यापा-राया अत्यन्तचलाया आत्मत्वे? अतो नूनं यथा देहात् तथा छायापुरुषादपि व्यतिरिक्त एव यः कश्चिदपहतपाप्मत्वादिगुणयुक्त आत्मा पित्रा विवक्षितः। ततो मया पुनरपि गन्तव्यम् आचार्यसकाशे, अन्वेष्टव्यो विजिज्ञासितव्यश्च परमार्थात्मा यमुपदेष्टुं प्रयत्नोऽयं तस्य। नाहमत्र छायात्मदर्शने किञ्चिद् भोग्यं पश्यामि – इति। तदेवं चित्त-गुणदोषतारतम्यादुपदिष्टात्मतत्त्वग्रहणे तारतम्यम्, उपदिष्टार्थतत्त्व-निर्धारणार्थं श्रद्धातात्पर्यादौ च तारतम्यमित्यनवद्यम् ॥ २ ॥

## ८. इन्द्रस्य पुनरपि ब्रह्मचर्यवासः

**एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनु-व्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणीति स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै स होवाच ॥ ३ ॥**

### प्रजापतेः प्रतिवचनम् तदभिप्रायश्च

६३. इत्युक्तः प्रजापतिर्ह किलोवाच। हे मघवन्, एष

छायात्मा एवमेव, 'शरीरे साध्वलङ्कृते साध्वलङ्कृतः, सुवसने सुवसनः' इत्यादि यथावोचस्त्वम्, एवमेवैषः ; न त्वेष मयाभिप्रेत आत्मा । **एतं त्वेव ते भूयोऽनुव्याख्यास्यामि,** व्याख्यातमप्यनुव्याख्यास्यामि तत्स्वरूपं यथा विशदतरं स्यात्, यथा चैष आत्मा अमृताभयस्वरूपं ब्रह्मैवेति तव हृदयमागच्छेत् तथा । यस्मान्मया व्याख्यातमप्येनं नाग्रहीः, ततो गम्यते केनचिदन्तःकरणदोषेण प्रतिबद्धग्रहणसामर्थ्यस्त्वम् इति । अतो **वसापराणि** द्वात्रिंशतं वर्षाणि – इति ॥

एतेनेदमुक्तं भवति यद् ब्रह्मचर्यमेव परमसाधनम् आत्मविज्ञाने; ब्रह्मचर्येण मनःकालुष्ये व्यपनीते, सर्वस्याप्यात्मभूतं ब्रह्म प्रयत्नमन्तरेणैव प्रकाशत इति । उक्तं च प्राक् 'तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति, तेषामेवैष ब्रह्मलोकः' (८–४–३) इति ॥

## भूयोभूयः प्रश्नप्रतिवचनोपन्यासे श्रुत्याशयः

६४. अत्रेन्द्रस्य पुनः पुनः प्रजापत्युक्तार्थविषये स्वगतचिन्ताम्, प्रतिपन्नांशे शङ्कोत्थानम्, तत्परिहाराय पुनरप्याचार्यसमीपं गत्वा परिप्रश्नोपन्यासम्, गुरुशिष्यसंवादमुखेन तत्त्वनिर्धारणे तात्पर्यं च श्रावयन्ती श्रुतिः, श्रवणवन्मननस्यापि मन्दमध्यमाधिकारिणोरावश्यकतां निरपवादात्मविज्ञानेनेहैव परमपुरुषार्थप्राप्तिं च निदिदर्शयिषतीति गम्यते । 'नाहमत्र भोग्यं पश्यामि' इतीन्द्रस्यासकृदपरितृप्तिसूचनात्, 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' इति प्रजापतेरप्युपायान्तरेण ग्राहयितुं प्रवृत्तिदर्शनाच्च ॥ ३ ॥

( इति नवमः खण्डः )

# ९. स्वप्नात्मोपन्यासः

य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचै-तदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श तद्यद्यपीदं शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति ॥ १ ॥

न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति-त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीति ॥ २ ॥

### स्वप्नोपन्यासे प्रजापतेराशयः

६५. 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' इति प्रतिज्ञाय 'य एष स्वप्ने महीयमानश्चरति' इत्युपदेष्टुरयमभिप्रायः । 'य एषोऽक्षिणि' इति मया सर्वकार्यकरणसाक्ष्येव द्रष्टा उपदिष्टः ; देहादिव्याविवर्तयिषया च साध्वलङ्करणादिना शरावोदके स्वात्मदर्शनं कारितम् । 'स चात्मा सर्वेष्वन्तेषु परिख्यायते' इति सर्वसाक्षित्वमभिप्रेत्योक्तः, न तु जागरितप्रपञ्चमात्रोपाधिकः स इत्यभिप्रायेण । त्वं तु अक्षिजलादिषु दृश्यमानं छायापुरुषमेव भ्रान्त्या गृहीतवान् ; अतः 'एतं त्वेव द्रष्टारं ते भूयोऽप्यनुव्याख्यास्यामि यथा ते अनात्मन्यात्ममतिर्न भवेत् । य एव अक्षिणि द्रष्टा स एवैष स्वप्ने महीयमानश्चरति' इति

जागरितोपाधिं प्रविहायैव स्वप्नोपाधिना तस्यैवोपदेशो जाग्रत्स्वप्नयोरुभयोरपि द्रष्टारमेकं मद्विवक्षितमध्यवस्येदिन्द्र इति मन्यते पिता ॥

परं तु तत्रापि स्वप्नावस्थाभुजं जीवमेव प्रत्यगृह्णादिन्द्रः । स्वप्नपुरुषे जाग्रच्छरीरगता आन्ध्यादयो दोषा न सन्तीति निश्चितः शान्तहृदयः प्रतिगतो मार्गे तमेव स्वप्नपुरुषं प्रति पर्यालोच्य, तत्राप्येतद्भयं ददर्श । शरीरदोषैरदूषितोऽप्येष दोषान्तरग्रस्त एव । यतो 'घ्नन्ति त्वेवैनम्' केचिद् । घ्नन्तीव जाग्रद्दृष्ट्या, स्वाप्नकालिकप्रतीत्या तु घ्नन्त्येव । एवं 'विच्छादयन्तीव', 'विद्रावयन्तीव', 'अप्रियवेत्तेव', 'रोदितीव'–इति सर्वं अवस्थादृष्टिभेदेन नेयम् । तस्मान्नाहमत्र स्वाप्नपुरुषे भोग्यं पश्यामि – इति निश्चिकाय मघवान् ॥ २ ॥

# १०. इन्द्रस्य पुनर्गुरूपसदनं ब्रह्मचर्यवासश्च

**स समित्पाणिः पुनरेयाय तं ह प्रजापतिरुवाच मघवन् यच्छान्तहृदयः प्राव्राजीः किमिच्छन् पुनरागम इति स होवाच तद्यद्यपीदं भगवः शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति ॥ ३ ॥**

**न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं**

त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणीति स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच ॥ ४ ॥

## प्रजापतिप्रतिवचनाभिप्रायः

६६. सुगममन्यत्–इन्द्रस्य पुनरागमनम्, गुरुशिष्यसंवादः, गुरोरादेशादिन्द्रस्य ब्रह्मचर्यवासश्चेति ॥

'एवमेवैषः' इत्यादिवचनस्य त्वयमभिप्रायः । सत्यं जागरितावस्थायां शरीराद्युपाधयः सन्त्यविद्याप्रत्युपस्थापिताः, न तु ते स्वप्ने ; न हि जागरितशरीराद्यन्वागतत्वं समस्त्यात्मनः स्वप्ने । तथा च स्वप्नान्तजागरितान्तयोरितरेतरव्यभिचारेऽपि, अक्षिपुरुषत्वेन योऽसौ निर्दिष्टो मया स एवायं स्वप्नद्रष्टा, तदेवात्मतत्त्वमुद्दिश्य च मयोक्तम् 'एष आत्मा' इति 'एतदमृतमभयमेतद् ब्रह्म' इति च । त्वं पुनः 'स्वप्ने महीयमानश्चरति ' इत्युक्तेरक्षरार्थमेव गृहीत्वा यत् स्वप्ने महिमानमनुभवति मनः, तद्विशिष्टरूपमेव स्वप्नात्मानं गृहीत्वा ब्रूषे 'घ्नन्ति त्वेनम्' इत्यादि ; न तु मयोक्ते सर्वसाक्षिणि कश्चन दोषोऽस्ति । अतः, एतं त्वेव मयाभिप्रेतं परमार्थात्मानं ते भूयोऽनुव्याख्यास्यामि यथा निरुपाधिक एवात्मा विजिज्ञासितः स्यात् । सूक्ष्मतत्त्वदर्शनयोग्यतासंपादनार्थं चित्तदोषं परिजिहीर्षुश्चेत् त्वं वसापराणि द्वात्रिंशतं वर्षाणि – इति ॥ ४ ॥

( इति दशमः खण्डः )

# ११. सुषुप्तात्मोपदेशः

तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥ १ ॥

स समित्पाणिः पुनरेयाय तं ह प्रजापतिरुवाच मघवन् यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच नाह खल्वयं भगव एवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥ २ ॥

६७. 'तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति' इत्येतदुक्तार्थं (८–६–३) वाक्यम् ॥

इन्द्रस्तु तुष्ट इव व्रजन् मध्येमार्गं वाक्यार्थमालोचयन् अत्रापि भयं ददर्श । कथम् ? नाह नैव खल्वयं सुषुप्तात्मा एवं यथा जाग्रत्स्वप्नयोस्तथा संप्रति सम्यग्विविक्तम् आत्मानं जानाति । 'अय-महमस्मि देवदत्तः' इति, नो एवेमानि भूतानि 'त इमे प्राणिनः' इति, 'इमानि दृश्यानि'—इति वा । अत एव 'विनाशमेवापीतो भवति' ।

विनाशमिव गतः । कुतः ? न किञ्चिदपि जानातीत्यतस्तदस्तित्वगमकमपि न किञ्चिद् दृश्यतेऽत्र । 'नाहमत्र भोग्यम्' इति व्याख्यातं वाक्यम् ॥ १ ॥

अथ च प्रजापतिरुवाच 'एष आत्मा एतदमृतमभयमेतद्ब्रह्म' इति । तस्मान्नूनमन्यमेव कञ्चिदत्रात्मानं मन्यते पिता । अतस्तमेवात्मानं पुनरप्यन्विष्य विजिज्ञासामि – इति श्रद्धायुक्तः पुनरपि स समित्पाणिः पितरमाजगाम । समानं प्रजापतिप्रश्नवाक्यम् इन्द्रस्य शङ्कोपस्थापनं च ॥ २ ॥

( इति एकादशः खण्डः )

# १२. इन्द्रस्य ब्रह्मचर्यवासः

**एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पञ्च वर्षाणीति स हापराणि पञ्च वर्षाण्युवास तान्येकशतं संपेदुरेतत्तद्यदाहुरेकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच ॥ ३ ॥**

## 'एवमेवैष'–इत्यादिवाक्याभिप्रायः

६८. 'एवमेवैष मघवन्' इति वाक्यं पूर्ववदेव व्याख्येयम् – त्वया सुषुप्तपुरुषत्वेन गृहीतः, एवमेव । यतो विशेषविज्ञानोपशमाद् विनाशमपिगच्छतीव सः । मया तूक्तो योऽयं दृष्टेर्द्रष्टा स स्वप्नेऽप्यव्यभिचरितस्वरूपः, स एव च सुषुप्ते समस्तः संप्रसन्नः । तस्य तु

स्वरूपभूतं विज्ञानं नैव विलुप्यते ' यद्वै तन्न विजानाति विजानन्वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ' (बृ. ४–३–३०), ' सलिल एको द्रष्टाऽद्वैतः ' (बृ. ४–३ ३२) इति च श्रुत्यन्तरात् । अतः, ' एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मात् ' इति तमेवाव्यभिचरितस्वरूपविज्ञानलक्षणं व्याख्यास्यन् पुनराह **'नसापराणि पञ्च वर्षाणि '** अवशिष्टस्याल्पस्य चित्तदोषस्य प्रमार्जनाय – इति ॥

## आत्मज्ञानप्रशंसा

६९. **' स हापराणि पञ्च वर्षाण्युवास '** इत्यादिश्रुतेर्वाक्यं ब्रह्मविज्ञानस्तुत्यर्थम् । एवमतिदीर्घकालब्रह्मचर्यवासेन महता यत्नेन प्राप्तवानिदं ब्रह्मविज्ञानं देवराजोऽपि सन्निन्द्रो यस्मात्, अत इन्द्रत्वादपि गुरुतरफलं ज्ञानम्, नातःपरं पुरुषार्थसाधनमस्ति ; न च गुरुनिकटब्रह्मचर्यवासात्परतरं ज्ञानसाधनं वेति वाक्याभिप्रायः ॥ ३ ॥

( इति द्वादशः खण्डः )

# १३. अशरीरत्वमेव परमपुरुषार्थः

**मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ॥ १ ॥**

७०. तस्मै एकशतं वर्षाणि ब्रह्मचर्यमुषितवते, विधूतकल्मषाय स होवाच प्रजापतिः । किम् ? **मघवन् मर्त्यं वा इदं शरीरम्** । इदं शरीरं यदुपहितं पुरुषं त्वम् आत्मानं मन्यसे, 'अस्य नाशमन्वेष नश्यति' (९–१), 'घ्नन्ति त्वेनम्' (१०–४), 'विनाशमेवापीतो भवति' (११–२) इति तस्मिन् भयं पश्यन्, यच्चाधिकृत्य ब्रवीषि 'नाहमत्र भोग्यं पश्यामि' इति च, तदिदं शरीरं मर्त्यं वै प्रसिद्धमेवैतल्लोके । न केवलं मर्त्यम्, कदाचिन्मरिष्यमाणम्, किं तर्हि '**आत्तं मृत्युना**' मृत्युना व्याप्तमेव । प्रतिक्षणं म्रियमाणं ह्येतत्, स्थूलं वा सूक्ष्मं वा शरीरं मृत्युना ग्रस्तमेव भवति सर्पमुखान्तःस्थितभेकवत् इत्यतः किं चित्रं शरीरोपहितस्य पुरुषस्यापि विनाशो भवितेति ? मया तूक्तः परमार्थात्मा न शरीरसंस्पृष्टो जातुचिदपि । कथम् ? इदं हि शरीरम् अस्यामृतस्याऽऽत्मनोऽधिष्ठानम् । अमृतत्वं सापेक्षमिति मा शङ्कीत्यतो विशिनष्टि 'अशरीरस्य' इति । एष ह्यात्मा देहेन्द्रियमनोधर्मैः सदा वर्जित इत्यत एवामरोऽमृतस्वभावश्च इति भावः ॥

तस्यैतस्याऽऽत्मनः इदं शरीरम् अधिष्ठानम् । शरीरमधिष्ठायैव ह्यात्मा भुङ्क्ते इन्द्रियार्थान्, कचिदिन्द्रियार्थानकामयमानः स्वप्नांश्चापश्यन्, विशेषज्ञानं परित्यज्य तमोभिभूतो विनाशमपिगच्छतीव च भवति सुषुप्ते । न हीन्द्रियाण्यनुपादायार्थोपलब्धिः स्वप्नदर्शनं वा भवेत्; न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः समस्तीत्यतः सशरीरस्यैव सर्वो भोगः सुखदुःखयोः, भयदर्शनं च । तदेवममृतस्याभयस्याशरीरस्यैव सत एतस्यात्मनोऽधिष्ठानत्वेन शरीरमभिमन्यमानस्य सर्वः संसारः

इत्याह – '**आत्तो वै सशरीरः प्रियाप्रियाभ्यां न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति**' इति । न चाविद्यानध्यस्तात्मभावेन शरीरेण कश्चिद्म्रियते इत्यतः 'अहमेव शरीरम्, शरीरमेव चाहम्' इति मिथ्याज्ञानकल्पितशरीरात्मभावस्यैवायम् अवस्थात्रयोपभोगः न त्वशरीरस्यामृतात्मनः । तदाह – '**अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः**' इति ॥

## आत्मनः सशरीरत्वं मिथ्याज्ञानकल्पितम्

७१. ननु सशरीरत्वे प्रत्यक्षसिद्धे कथम् 'अशरीरं वाव सन्तम्' इत्यवधारयति प्रजापतिः, कथं वा प्रमाणविरुद्धं प्रत्यभिजानीयात्तदिन्द्रः ? नैष दोषः, सशरीरत्वेनेन्द्राभिमतस्यात्मनः पारमार्थिकत्वाभावात् । न हि जागरिते शरीरसंहतत्वेन विभावित आत्मा स्वप्ने वीक्षितः केनापि, नतरां च सुषुप्ते । अथ चेन्द्रो बभ्राम स एव सशरीर आत्मा स्वप्ने 'हन्यते विच्छाययते च' इति, सुषुप्ते 'विनाशमेवापिगच्छति' इति च । न च जागरितेऽपि शरीराभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुमात्मनः । 'शरीरादिसंहतोऽहम्' इत्यभिमानवान् हि ज्ञानेन्द्रियैर्विषयानुपलभते, कर्मेन्द्रियैश्च कर्माणि करोति, तत्फलं चोपभुङ्क्ते इत्यतः स एवाहङ्कारः प्रत्ययी, अहंप्रत्ययविषयः, अविद्यया आत्मत्वेन परिगृहीतः कर्ता भोक्ता च ; 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (का. १-३-४) इति श्रुत्यन्तरात् । न च प्रजापत्यभिमतस्य दृष्टेर्द्रष्टुरक्षिपुरुषस्य, स्वप्नसुषुप्तयोरपि साक्षिणः सशरीरत्वं शक्यमुत्प्रेक्षितुं केनचित् । जाग्रन्मात्र-

लब्धजीविता हि शरीरादिप्रतीतिः । न च शरीराद्यभिमानिसाक्षिणः सशरीरत्वं शक्यं कल्पयितुं जागरितेऽपीत्यवोचाम । तस्मात्, साध्वेतदुक्तम् 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति ॥

न च, इन्द्रस्य मतेन एक आत्मा सशरीरः, प्रजापतिमतेन त्वन्योऽशरीर इति कथमिदं सङ्गच्छते ? न ह्येकस्मिन्नेव शरीरे द्वावात्मानौ संभवतः, एको हि सर्वान्तरः प्रत्यगात्मा स्यात् – इति शङ्कनीयम् । अविद्याप्रत्युपस्थापितशरीरादिसङ्घातनिमित्तत्वाद् भेदव्यवहारस्य । न च शरीरादेः प्रत्यक्षेणानुभूयमानत्वात् कथं तस्याविद्याप्रत्युपस्थापितत्वम्– इति चोदनीयम् । शरीराद्यभिमानस्य प्रत्यक्षादिप्रमाणाविषयत्वात् । न ह्यनध्यस्तशरीरात्मभावस्य प्रमातृत्वं भवति ; न चान्यः प्रमाता अस्ति, यस्यायं सङ्घातः प्रत्यक्षवेद्यः स्यात् । ननु देवदत्तस्य प्रत्यक्षवेद्यं स्याद् विष्णुमित्रस्य सशरीरत्वम् । न । सशरीरत्वस्यैतस्याप्यसिद्धत्वात् । सिद्धे हि देवदत्तस्य सशरीरत्वे अनध्यस्ते तत्प्रत्यक्षसिद्धं भवेत् सशरीरत्वमन्यस्य । तदभावे विष्णुमित्रस्य प्रत्यक्षसिद्धं देवदत्तसशरीरत्वम्, देवदत्तस्य प्रत्यक्षसिद्धं विष्णुमित्रसशरीरत्वम् इति सिद्धयोरन्योन्याश्रयत्वं स्यात् । सशरीरान्तरस्य प्रमातुः कल्पने वा अनवस्था दुर्वारा स्यात् । कस्यचिदप्यशरीरस्य प्रमातुरसंभवात्, सशरीरत्वस्य च पारमार्थिकस्याद्याप्यसिद्धत्वात् । तस्मात्, मिथ्याज्ञानकल्पितमेव सशरीरत्वमात्मनः इति यावन्मिथ्याज्ञानानुवृत्तिस्तावत् 'न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति'; निवृत्तमिथ्याज्ञानदशायां तु स्वाभाविकमेवाशरीरत्वमिति 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इत्युभयम् अविरुद्धम् । निर्धार्यते चेदं प्रजापतिना वाक्यशेषेणेत्यलमतिप्रपञ्चेन ॥ १ ॥

अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यन्ते ॥ २ ॥

एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तः ॥ ३ ॥

## अशरीरस्यैव सशरीरत्वेन भावने दृष्टान्तः

७२. कथं अशरीर एव सर्वदा अयमात्मा ? कुतो वा तमेवं-सन्तं न प्रियाप्रिये स्पृशतः ? कथंतरां सर्वलोकप्रसिद्धस्य सशरीरत्व-स्याभावम् अपलापमात्रेणावगच्छेयम् ? – इति शङ्कां संभाव्यमानां परिहरिष्यन् दृष्टान्तेनैवेदं सर्वमुपपादयिष्यामीत्याह – '**अशरीरो वायुः**' इत्यादि ॥

प्रसिद्धं लोके वायुरभ्रम् – इत्यादीनि वस्तुतोऽशरीराण्येवेति । कथम् ? '**तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुप-संपद्य स्वेन रूपेणाभिनिष्पद्यन्ते**' । तानीमान्याकाशरूपेण स्थितानि स्वेन प्रतीयमानरूपेण वाय्वभ्रविद्युत्स्तनयित्नुरूपेणाभिनिष्पद्यन्ते, 'अयं वायुः' 'इदमभ्रम्', 'अयं स्तनयित्नुः', 'इयं विद्युत्' – इत्येवं साकाररूपेण विशेषविज्ञानगोचरतामापद्यन्ते, पुनरपि वर्षाकालादनन्तरं

परं ज्योतिरुपसंपद्य पुरोवातादिरूपम्, हिमवृष्ट्यादिरूपेणावभासम्, ज्योतिर्लतादिरूपम्, गर्जितादिश्रवणगोचररूपं पृथग्भावं परित्यज्याऽऽकाशमेवापियन्ति, आकाशरूपेणैवावतिष्ठन्ते – इत्यतोऽवगम्यते वस्तुत आकाशादनतिरिक्तान्येव तानि मध्ये सविशेषाकाराणीवाऽऽभासन्ते इति ॥

## जीवस्य शरीरात्समुत्थानं स्वेन रूपेणाभिनिष्पत्तिश्च

७३. एवमेवायं जीवः सशरीर इति विभाव्यते अविद्यावस्थायां नित्याशरीरात्मनोऽव्यतिरिक्त एव सन्, प्रियाप्रियाभ्यामुपहत इव च लक्ष्यते ताभ्यां नित्यास्पृष्टस्वभावोऽपि सन् इत्याह – '**एवमेवैष संप्रसादः**' इति । अत्र 'संप्रसादः' इति जीव उच्यते । 'समस्तः संप्रसन्नः'(११-१) इति हि सुषुप्तावस्थायामप्यच्छस्वरूपं गच्छन् जीवः परामृष्टः । तत्रात्मनः सद्रूपतामज्ञात्वैव शरीरात्मभावं समुत्सृज्य सद्ब्रह्मणि संपन्नवान् सुषुप्ते ; 'सति संपद्य न विदुः' (६–९–२) इति श्रुतेः । दहराकाशोपासकस्तु भावनाप्रकर्षात् सेतुशब्दशब्दितं ब्रह्मैव संपद्यते नाडीद्वारा तदानीम् ; शरीरादुत्क्रममाणश्च नाडीरश्मिसंबन्धात् आदित्यद्वारेणामृतत्वमेतीति चोक्तम् (६–३, ५, ६) । अयं पुनर्विद्वान् वस्तुतन्त्रज्ञानबलान्मिथ्याज्ञानध्वान्तं विधूय **शरीरात् समुत्थाय, परंज्योतिरुपसंपद्य** कूटस्थचैतन्यज्योतिःस्वरूपं ज्ञानेनैवोपसंपद्य **स्वेन रूपेण** स्वाभाविकेनाशरीररूपेण **अभिनिष्पद्यते** जायते । यथा रोगेणास्वास्थ्यं गतो भैषज्येन रोगनिवृत्तौ स्वस्थो जायते, तद्वत् । श्रुतिनिदर्शितवाय्वादीनां प्रतीतरूपेण विशेषाकारवता-

मप्याकाशात् समुत्थानामपि वस्तुवृत्तेनाकाशानतिरिक्तस्वरूपेणैव स्थितिरिति दृष्ट्या, 'स्वेन रूपेणाभिनिष्पद्यन्ते' इत्युक्तम्, न तु जीवस्य सशरीरस्य सतो वाय्वादीनामिवाशरीरताभिनिष्पत्तिरित्यभिप्रायेण । न हि सशरीरत्वं कदापि पारमार्थिकमस्ति, मिथ्याज्ञानप्रत्युपस्थापितत्वादेव शरीरस्येत्यवोचाम ॥

## शरीरात्समुत्थाने स्वरूपेणाभिनिष्पत्तौ च शङ्का

७४. ननु यथा पूर्वं 'य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्म' (३–४) इत्युक्तम्, तथैवात्राप्युच्यते । अतोऽत्रापि शरीरात्समुत्थानमुत्क्रमणम्, 'परं ज्योतिरुपसंपद्य' इति च यथा तत्र, तथाऽत्रापि नाडीरश्मिसंबन्धादेव ब्रह्मलोकप्राप्तिः । एवं हि सति इन्द्रेण यदुक्तं छायापुरुषादीनां दोषग्रस्तत्वम्, तत्तथैवेति श्लिष्यते; 'एवमेवैष मघवन्निति होवाच' (९–३....) इति प्रतिपर्यायं प्रजापतिकर्तृकमिन्द्राभिप्रायानुमोदनं चाञ्जसं भवति । तथा च छायापुरुषादयः प्रजापतिनोपदिष्टाः अन्येऽन्ये एव प्रतिपर्यायम् । चतुर्थपर्याये त्विदानीमुच्यमानः परमात्मैव 'स उत्तमपुरुषः' इति वाक्यशेषात् । किञ्च 'यदि पितृलोककामो भवति' (२–१) इति यथा दहरविद्यायां वाञ्छितकामावाप्तिः फलत्वेनोल्लेखिता, एवमेवेहापि 'जक्षत् क्रीडन् रममाणः' इति वाक्यशेषे फलावाप्तिरुल्लिख्यैव श्राव्यते । एवं च सति पूर्वविद्याशेष एवायं पुरावृत्तरूपेणोच्यमानोऽर्थवादः – इति सर्वमुपपद्यते । आत्मस्वरूपमपीह 'य आत्माऽपहत-

पाप्मा' इत्युक्तधर्माष्टकयुक्तमेवान्वाख्यायत इति, 'तयोर्ध्वमायन्नमृतत्वमेति' (६–६) इत्युक्तरीत्यैवात्र मुमुक्षूणाम् उत्क्रान्त्यनन्तरं ब्रह्मलोके अमृताभयप्राप्तिरुच्यत इति युक्तमुत्पश्यामः। प्रजापतिकृतस्तु प्रतिपर्यायम् अन्यान्यात्मोपदेशः, परमार्थात्मानमन्ते समुपदेष्टुं शाखाचन्द्रन्यायेनेति नेतव्यः। 'एतं त्वेव भूयोऽनुव्याख्यास्यामि' इति च न जीवात्मोपदेशः, किं तु, वाक्योपक्रमसूचितापहतपाप्मत्वादिगुणकपरमात्मोपदेश एवेति न्याय्यम् ; प्रकरणसामर्थ्यात् इति चेत् –

७५. न। '**एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मात्**' इति सावधारणमुपक्रम्यैव 'मघवन्मर्त्यं वा इदं शरीरम्' (१२–१) इति शरीरसंबन्धनिन्दापूर्वकं 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इत्यशरीरात्मप्रशंसाया जीवादन्यस्य विवक्षितत्वे अनाञ्जस्यापत्तेः। आत्मनो हि परस्य सर्वथा अप्राप्तं सशरीरत्वमित्यस्थाने एव स्यात् 'मघवन्मर्त्यं वा इदं शरीरम्' इति शरीरनिन्दा तेषां ये सर्वेष्वपि पर्यायेषु परमात्मानमेव परामृष्टं मन्यन्ते। 'एतं त्वेव' इति संनिहितवाची सर्वनामशब्दो विप्रकृष्य परमात्मपरामर्शकः कल्प्येत। शाखाचन्द्रन्यायानुसरणस्य तु नैवावसरोऽत्र, यतः सशरीरत्वस्याशरीरत्वे न कथमपि संबन्धोऽवकल्पते यथा शाखायाश्चन्द्रदिशा। अपि च दहरविद्यायां 'अनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्'(१-६) इति गतिपूर्वकमेव 'सर्वेषु लोकेषु कामचारो भवति' – इति फलप्राप्तिरुक्तेति युक्तं तत्रात्मनः सर्वेषां कामानां च ध्यायिनां साक्षात्कारपूर्वकं नाडीरश्मिद्वारेण ब्रह्मलोकं गतानामेव यथावर्णितैश्वर्यप्राप्तिरिति ; अत्र पुनः

प्रजापतिवाक्ये ‘सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमनुविद्य विजानाति’ (७-१) इति विज्ञानमात्रेण सर्वलोकसर्वकामावाप्ति-र्विज्ञायते। न चात्र पूर्वत्रेव नाडीरश्मिप्रशंसा ब्रह्मलोकप्राप्तौ काल-प्रतीक्षावचनं वा अस्तीति वैषम्यम्। यत्पुनः, ‘जक्षत्क्रीडन्नममाणः’ इति वाक्यशेषे ऐश्वर्यप्राप्तिवर्णनमिव, तदनुपदमेव वाक्यार्थविवरणावसरे निपुणतरम् उपपादयिष्याम—इत्यास्तां तावत्। तस्मात्, ‘एतं त्वेव’ इति जीवरूपान्वाख्यानमेवैतत्। तच्च जीवस्य व्यवहारदृष्ट्या प्राप्तं सशरीरत्वम् अवस्थाकृतसंसारधर्मवत्त्वं चान्वयव्यतिरेकलक्षणतर्केण प्रत्याख्याय तस्यैवाशरीरत्वं स्वाभाविकमिति दर्शयितुमेव तस्यावस्था-त्रयेऽप्यनुगतिज्ञापनार्थम् इति बोध्यम्। शरीरात् समुत्थानं च नास-नादिवोत्थानमिहावकल्पत इत्यतः शरीरेन्द्रियमनोबुद्धिविषयवेदनाभि-रविविक्तमिव जीवस्य स्वरूपं संसारावस्थायामित्यतो गुरूपदेशानु-सारेण श्रुतिकृतं विवेकविज्ञानमेवेह समुत्थानम्, स्वाभाविकविशुद्ध-स्वरूपावगतिरेव च स्वरूपेणाभिनिष्पत्तिः – इति च॥

## उत्तमपुरुषत्वमात्मस्वरूपस्य

७६. येनैष संप्रसादो ज्ञानेन परंज्योतिरुपसंपद्य स्वेन पारमार्थिकेन रूपेणाऽऽविर्भवति स उत्तमपुरुषः उत्तमश्चासौ पुरुषश्च। योऽसौ प्रथमे पर्याये ‘अक्षिणि पुरुषो दृश्यते’ इत्युक्तः पुरुषः, यश्च ‘स्वप्ने महीयमानश्चरति’ (१०-१) इत्युक्तः, तौ व्याकृतौ; यस्त्वसौ सुषुप्तः संप्रसन्नः (११-१) सोऽव्याकृतः। व्याकृताव्याकृत-पुरुषौ यद्यप्यात्मरूपावेव, ‘एष आत्मेति होवाच’ इति प्रतिपर्यायम्

आत्मत्वेनोल्लिख्योपदेशात्, तथापि तदपेक्षया स उत्तमपुरुषः ; निरुपाधि-केन स्वेनैव रूपेणावस्थानात् । उक्तं हि भगवता 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्य-व्यय ईश्वरः ॥ यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥' (गी. १५–१६, १७, १८) इति ॥

इदं त्वत्रावधेयम्– पूर्वत्र 'अन्धो भवत्यपि', 'रोदितीव', 'विनाशमेवापीतो भवति'– इति च सशरीरत्वाभिमानात् अवस्थात्रय-कलुषितेन रूपेणावभासात् स्वरूपेणापहतपाप्मत्वादिगुणत्वेनावस्थितोऽपि न तथा प्रत्यभिज्ञातः । इदानीं तु केवलं शुद्धेनैव रूपेण 'अयमहमस्मि नित्यदेव परमात्मा अमृतमभयं ब्रह्म' इति विज्ञातः, इत्यतः 'स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः' इत्युच्यते, न पुनः अक्षिपुरुषस्वाप्नपुरुषसंप्रसादेभ्योऽन्य एवायम् इत्यभिप्रायेण । यथा हि सर्पभूच्छिद्रजलधाराभिर्विकल्पितापि रज्जू रज्जुरेव सर्वदा न विकल्पकाले स्वरूपेण निश्चयकाले वा तस्या वस्तुतोऽन्यान्यत्वम् , एवं व्याकृताव्याकृतरूपेण विकल्पितोऽपि परमार्थतः परमात्मैव नान्योऽ-न्योऽवस्थाविकल्पनैः । स एव ह्येक आत्मा अवस्थात्रयमाविश्य सर्वा अवस्था बिभर्तीव मूढदृष्ट्या । यथाहुरभियुक्ताः–' अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता । सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥ निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते । रज्जुरेवेति चाद्वैतं

तद्वदात्मविनिश्चयः ॥ ' (गौ.का. २–१७, १८) इति । एतदभिप्रायेणैव प्रजापतिना ' एष आत्मा, एतदमृतमभयमेतद्ब्रह्म ' इति प्रतिपर्यायं स्वरूपदृष्ट्या आत्मानमुपवर्णितवतापि चरमे पर्याये अशरीरत्वेन यः प्रत्यभिज्ञातः, स एव स्वरूपेणाभिनिष्पन्नः स उत्तमपुरुष इत्युक्तमिति ॥

## जीवन्मुक्तस्य विभूतिः

७७. ' स तत्र पर्येति ' इत्यादि ज्ञानस्तुत्यर्थं वचनम् । स य एवं स्वेन रूपेणाभिनिष्पन्नः स तत्र स्वे आत्मनि जक्षत् हसन् भक्षयन् वा विविधानीप्सितान् भक्ष्यान्, स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा यथेष्टं क्रीडन् रममाणः पर्येति सञ्चरति ॥

नन्विदं स्वं रूपमद्वयम्, कथं तत्र जक्षणादयः स्त्रीयानादयो वा स्युः ? अतो हार्दविद्याशेषत्वेनैवेयं मुक्तावस्था नेया इति भाति, गतिपूर्वकं प्राप्येति च इति चेत् । शृणु, अत्र गत्यश्रवणात्, जाग्रदाद्यवस्थासु स एवासावेकोऽपहतपाप्मत्वादिगुणक आत्मा, 'एतदमृतमभयमेतद्ब्रह्म ' इत्यविशेषेण सर्वत्र वर्णनाच्च नैतत् सङ्कल्पमात्रेणावाप्य विविधकामावाप्तिवर्णनमित्यवगम्यते । अशरीरस्यात्मनः सङ्कल्पाद्यसंभवाच्च । कथं तर्हि स्त्रीयानादिभिः क्रीडासम्भवोऽशरीरस्यावकल्पत इति ? अत्र ब्रूमः – ' अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः ' इति तावद्वर्णनम् अशरीरेऽप्यात्मनि नानुपपन्नम् । अविद्याप्रत्युपस्थापिताध्यासनिवृत्तिमात्रपरत्वात् । सत्यकामत्वसत्यसङ्कल्पत्वे अपि अविद्याकल्पितनामरूपोपाधिवशेनापि सङ्गच्छेते । ज्ञानी हि जीवन्मुक्तावस्थायां स्वदृष्ट्या अशरीरोऽपि सन् पराध्यारोपितशरीराद्युपाधिमान्

भवति, तद्दृष्ट्यैव च सत्यकामः सत्यसङ्कल्पश्च भवेत् । विशुद्धसत्त्वोपाधित्वात् । 'यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् । तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥' (मुं. ३-१-१०) इति श्रुत्यन्तरात् । 'जक्षत् क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा' इत्यादयस्तु विभूतयः, तस्य सर्वात्मत्वात् । यत्र यत्र योगिषु वा विद्यामहिम्ना ब्रह्मलोकं प्राप्तेषु वा यद्यत्प्राप्तमैश्वर्यं सङ्कल्पमात्रात्, तत्सर्वमेतस्यैव, सर्वस्याप्यात्मत्वादेतस्येत्युच्यते ज्ञानस्तुत्यर्थमित्यविरोधः । न चैवम् इतरेषां दुःखमपि तस्य स्यादिति शङ्क्यम् । विकल्पमात्रत्वात् तेषां सुखदुःखादीनां सर्वथापि तस्मिन् स्वदृष्ट्या अनाशङ्क्यत्वात्, सर्वसंसारधर्मराहित्येन नित्यतृप्तस्थितिमात्रस्यैव विवक्षितत्वात् स्तुतिवचनेनेत्यनवद्यम् ॥

## जीवन्मुक्तस्य सशरीरत्वमिव

७८. अत एव स्वदृष्ट्या शरीरमेवास्य नास्तीत्याह – '**नोपजनं स्मरन्निदं शरीरम्**' इत्यादि । इदं शरीरम् उपजनम् उप समीपे जन्यते अविद्यया इत्युपजनम् । 'अहमेवेदं शरीरम्, इदमेव शरीरमहम्' इति हि नैसर्गिकाध्यासेन व्यवहरति सर्वो लोक इति । अयं तु मुक्तः शरीरात्मभावेन सर्वथा विमुक्त इति तस्य शरीरस्मरणं नैव विद्यते क्वचित् इत्यर्थः । यद्यपि व्यावहारिकदृष्ट्या शरीरप्रत्ययभासोऽस्त्येव, तथापि तत्रात्मभावस्तु अशरीरात्मप्रतिपत्त्या सर्वथा बाधित इति न शरीरप्रतिभानं तस्य किञ्चित्करं भवति [illegible] इत्यभिप्रायः । तथा हि श्रुत्यन्तरम् 'तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीत

मेनेदं शरीरं शेते । अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृ.४–४–७) इति । इहाप्युक्तम् 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभि निष्पद्यते' इति ॥

## विदुषः सर्वप्रवृत्त्यसंबन्धः

७९. एतदेव स्फुटयति '**स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तः**' इति । प्रयुज्यत इति प्रयोग्यः, अश्वादिः ; स यथा आचरणे रथादौ आचरन्ति सञ्चरन्ति अनेनेति ; तस्मिन् युक्तः, तदाकर्षणाय ; एवम् अस्मिन् शरीरे रथादिस्थानीये प्राणः, ज्ञानक्रियाशक्तिमान् युक्तः । तत्प्रयुक्त एवायं शरीरव्यापारः स्वात्मन्यध्यस्यते अविवेकिभिः 'पश्यामि, शृणोमि, गच्छामि, तिष्ठामि, जीवामि, मरिष्ये' इत्येवम् । तथा हि श्रुत्यन्तरम् – 'कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि, कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति । स प्राणमसृजत' (प्र. ६–३, ४) इति प्राणोपाधिनिमित्तैव सर्वा क्रिया शरीरे समुपलभ्यत इत्याह । एतेन इदं मिथ्याज्ञानप्रत्युपस्थापितं शरीरं ज्ञानक्रियादिमदिव प्रतिभासमानं यावत्प्रारब्धकर्मफलोपभोगशेषं यद्यपि ज्ञानिन्यपि संबद्धमिव प्रतिभाति लोकदृष्ट्या, तथापि स्वरूपेणाभिनिष्पन्नज्ञानिनः स्वदृष्ट्या तस्य स्मरणमपि नावशिष्यते । विस्मृतस्वाप्नव्यवहार इवैवायं स्वेनैव नित्याशरीरभावेन स्वाभाविकेनावतिष्ठत इत्यभिप्रायः ॥

## प्राणव्यापारान्वाख्याननिर्गलितार्थः

८०. तदेवं स्वाभाविकेनैवाशरीरत्वेन स्थितत्वात्, नास्य हार्दविद्यावत इव प्राणोत्क्रमणं नाडीरश्मिमार्गानुसरणम्, देवयानेन

गतिः, आदित्यद्वारेण ब्रह्मलोकप्राप्तिर्वा समपेक्ष्यते स्वरूपभूतं ब्रह्मलोकं तद्व्यतिरिक्तान् कामान् वा प्राप्तुम् । तस्मात्, स्वात्मान्वेषणाय हृदयादिस्थानम्, भावनाप्रकर्षात् साक्षात्काररलक्षणविज्ञानप्राप्तिर्वा नाकाङ्क्ष्यते । यस्त्वत्र 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इत्युपदेशः प्रजापतेः, स स्थानत्रयपरीक्षणलक्षणमन्वेषणम्, अवस्थात्रयानुगत स्वात्मनोऽशरीरत्वापहतपाप्मत्वादिधर्मकत्वविनिश्चयलक्षणं विज्ञानं चाभिप्रेत्य इति भावनाप्रकर्षादवगम्यते । तच्च विज्ञानं न स्वाप्नसौषुप्तपुरुषोपदेशं [illegible] वा नियमेनापेक्षते । यतो 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्येतद्वाक्यार्थश्रवणसमसमये एव ये द्रष्टुर्द्रष्टारं प्रत्यगात्मानं जानन्ति सर्वथाप्यपनीतनिखिलकल्मषाः, तेषां निपुणमतीनां स एव साक्षी द्रष्टा मिथ्याकल्पितशरीराक्ष्यादिसङ्घातं सर्वं स्वचैतन्यप्रकाशेन संव्याप्य वर्तत इत्यपि सुसंवेद्यो भवेदेव; तत एव च स एव परमार्थात्मा अपहतपाप्मत्वादिलक्षण इत्यनुभवो जायेत । येषां तु न तथा अनुभवो द्रागिव जायते, तेषामेव स्वप्नसुषुप्त्यन्तानुधावनम् । भवतु चैवं यथा तथा; यो जिज्ञासुः परं ज्योतिःस्वरूपमात्मानं संपद्य स्वेन रूपेणाभिनिष्पद्यते, स सर्वबन्धविनिर्मुक्तः परिशुद्धेनैवात्मना अवतिष्ठते, स एव चोत्तमः पुरुषोऽशरीरः सर्वसंसारधर्मवर्जितः । स एव च सर्वस्याप्यात्मत्वात् स्वस्मिन् ब्रह्मस्वरूपेण स्थितान् सर्वान् ब्राह्मलौकिकान् कामान् अविद्याव्यवधानपरिहारमात्रेण समश्नुत इति सर्वमनवद्यम् ॥ ३ ॥

# १४. कूटस्थचैतन्यरूपता आत्मनः

अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माऽभिव्याहाराय वागथ यो वेदेद१ँ शृणवानीति स आत्मा श्रवणाय श्रोत्रम् ॥ ४ ॥

अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः स वा एष एतेन दैवेन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके ॥ ५ ॥

## आत्मनश्चक्षुरादिसंबन्धः कीदृशः ?

८१. अथ कथमस्याशरीरस्यात्मनः 'चक्षुषि दृश्यते' इत्युक्तिः सङ्गच्छते ? – इत्येतदुपपादयन्नाह **'अथ यत्रेत्यादि'**। यद्यपि चैतन्यमात्रस्वरूप आत्मा अशरीरोऽप्राणश्च, तथापि तस्य व्यवहार-दृष्ट्या सशरीरत्वं सप्राणत्वं चेत्युक्तम्। यदापि सशरीरः सप्राणश्च, तदापि शरीरैकदेशे चक्षुषि स एव द्रष्टा। कथम् ? **यत्रैतदाकाश-मनुविषण्णं चक्षुः**। यत्र यस्मिन् प्रदेशे यदा वा चक्षुरिन्द्रियम् अनुविषण्णं चक्षुर्गोलके देहच्छिद्रे अनुषक्तम्, जीवत्वाभिमानेन, यदा 'इदं पश्यानि' इति सङ्कल्पयति जीवः। स जीवो 'द्रष्टा' इति व्यपदिश्यते यदा इत्यर्थः। तदा स एवायमात्मा अशरीरः सशरीरत्व-

मिव प्राप्य चाक्षुषः पुरुषो भवति—इत्यभिप्रायः । अथवा यत्र यदा, 'एतत्' इति क्रियाविशेषणम् । एवं यथा लोके प्रसिद्धम् इत्यर्थः । आकाशम् आकाशकल्पम् इममात्मानं चक्षुरनुविषण्णम्, आकाशवदसङ्गेनापि आध्यासिकसंबन्धात् तच्छेषभूतं भवति, तदा अयमेवाऽऽत्मा चाक्षुषः पुरुषो भवति। आकाशकल्पोऽपि चक्षुषा संबद्ध इव भवति । तस्यैव चैतन्यज्योतिषा दीप्तं सत् तच्चक्षुः दर्शनाय करणं भवति । चैतन्यं तस्यैव ; दर्शनलक्षणं विशेषज्ञानं तु चक्षुषः । अतो दर्शनं यच्चैतन्यानुविद्धं भवति स आत्मा – इति दर्शनेन लिङ्गेन चैतन्यस्वरूपं बोधयन् उवाच प्रजापतिः 'य एषोऽक्षिणि पुरुषो दृश्यते' इति ॥

एवं सर्वत्राप्यशरीरस्य चिन्मात्रस्वरूपस्याऽऽत्मनः शरीरेणेन्द्रियेण च संहतस्येव भवतः, घ्रातृत्वादिव्यपदेशः । 'चक्षुषि दृश्यते' इति तु प्रदर्शनार्थम् । तदेव दर्शयति श्रुतिः **'अथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम्'** इत्यादि । योऽयं घ्राणसंहत इव भवन् घ्राता इति व्यपदिश्यते, स परमार्थत आत्मैव कूटस्थचैतन्यस्वरूपः, तच्चैतन्यलब्धसामर्थ्यमेव तु घ्राणेन्द्रियं गन्धाय, गन्धलक्षणविशेषपरिच्छित्तये करणं भवति । **यो वेदेदमभिव्याहराणीति स आत्माऽभिव्याहाराय वाक्** । वक्तृत्वमाध्यासिकम् आत्मनः, वागिन्द्रियं तु वचनरूपविशेषपरिच्छित्तये भवति । **अथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रम्** पूर्ववत् । श्रोतृत्वमात्मनः, श्रवणं तु श्रोत्रस्येति ॥ ४ ॥

## आत्मनो मनःसंबन्धः

८२. यथा 'पश्यानि', 'शृणवानि' – इत्यादिभिः प्रकारैर्वेदिता आत्मा नित्यचैतन्यस्वरूपः, इन्द्रियव्यापारस्तु तत्तद्विशेषविज्ञानार्थम्, एवं यो वेद 'इदं मन्वानि' इति, केवलं मनोव्यापारं बाह्येन्द्रियनिरपेक्षं करवाणि – इति स आत्मा। 'श्रोत्रस्य श्रोत्रं चक्षुषश्चक्षुः' इत्यादिवत् 'मनसो मनः' (के. १–२) इति हि विज्ञायते। सर्वत्र दर्शनश्रवणादिकर्मसु 'इदं वेद', 'इदं वेद' इति वेदनमात्रस्वरूपेणावस्थानात्, तदेवास्यात्मनः स्वाभाविकं रूपमित्यवगम्यते। द्रष्टृत्वश्रोतृत्वादिविशेषविज्ञानं तु तत्तदिन्द्रियतादात्म्यताद्धर्म्याध्यासकृतम् इत्यवोचाम। एवम् इहापि मन्वानीति यो वेद तस्य वेदनं स्वरूपम्, मननकर्तृत्वं तु मनस्तादात्म्यताद्धर्म्याध्यासकृतम् इति श्लिष्यते॥

इयांस्त्वत्र विशेषः। '**मनोऽस्य दैवं चक्षुः**' इति। चक्षुरादीनि हि स्वस्वासाधारणवर्तमानकालिकविषयमात्रद्योतकानि करणानि; तदपि प्रातिस्विकार्थप्रकाशनं मनस्साहाय्येनैव भवति, न स्वातन्त्र्येण। 'अन्यत्र मना अभूवं मादर्शम्' (बृ. १–५–३) इत्यादिमनःसद्भावप्रतिपादकन्यायोपबृंहितश्रुत्यन्तरात्। मनस्तु न केवलं वार्तमानिकवस्तुविज्ञाने करणम्, अपि तु, अतीन्द्रियार्थानां कालत्रयवर्तिविषयाणामप्युपलब्धौ करणमितीत्याह '**स वा एतेन दैवेन चक्षुषा मनसा एतान्कामान्पश्यन्रमते य एते ब्रह्मलोके।**' इति॥

चष्टे पश्यत्यनेनेति चक्षुः। दैवम् अतीन्द्रियम्, अलौकिकमपि पश्यत्यनेनेति दैवं चक्षुः। स वै शरीरात् समुत्थितः

परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पन्नः, एतेन दैवेन चक्षुषा मनसा स्वात्माऽव्यतिरिक्तानेवैतान् कामान् हार्दविद्यादिनिष्णातैर्ब्रह्मलोके सङ्कल्पमात्रेणासञ्यान् । सत्यान् बाह्यविषयविषयकतृष्णालक्षणानृतापिहितान्, इहैव ब्रह्मणि लोके स्वात्मभूते ब्रह्मविद्याप्रभावेण युगपदेव पश्यन् रमते, नानुक्रमेण, 'सोऽश्नुते सर्वान् कामान् सह' (तै. २-१) इति श्रुत्यन्तरात् । तदेतदाह – 'पश्यन्रमते य एते ब्रह्मलोके' इति । अत्र चाखण्डचिन्मात्रस्वरूपत्वाद् पारमार्थिकब्रह्मलोकस्य 'पश्यन् रमते' इति सर्वसंसारधर्माभावमात्राभिप्रायेणोच्यते ज्ञानस्तुत्यर्थम् । 'आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः' (७-२५-२) इतिवत् । न हि द्वितीयविषया रत्यादयोऽञ्जसैव कल्पयितुं शक्यन्ते अशरीराद्वयात्मनीति ॥ ५ ॥

## १५. ब्रह्मात्मविद्यास्तुतिः

तं वा एतं देवा आत्मानमुपासते तस्मात्तेषाꣳ सर्वे च लोका आत्ताः सर्वे च कामाः स सर्वाꣳश्च लोकानाप्नोति सर्वाꣳश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ॥ ६ ॥

### आत्मोपासनेन देवानां सर्वलोककामावाप्तिः

८३. विपरीतबोधलक्षणाविद्याकुत्सनम् आदावेव कृतम् 'तस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुरासुरो बतेत्याहुरसुराणां ह्येषोपनिषत्' (८-८-५) इति, कथं नाम जिज्ञासवो देहात्माभिमानपरिहारे

प्रयतेरन्निति । ईश्वरगीतासु चैवमेव निन्दितमासुरं ज्ञानम् – 'तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥' (गी. १६–१९, २०) इति । अथेह विद्यां सप्रपञ्चं सफलं परिसमाप्य, एतत्प्राजापत्यसंप्रदायानुसारिणो देवान् स्तौति विद्यायां रुच्युत्पादनार्थम् । 'तं वै एतम्' इत्यादिना ॥

तं वै प्रजापतिना इन्द्रायोपदिष्टम् एतम् अपहतपाप्मत्वादिगुणकमात्मानं देवा इन्द्राच्छ्रुत्वा उपासते, हित्वा असुराणामुपनिषदं तन्निष्ठा भवन्ति यस्मात्, तस्मात् तेषां सर्वे च लोका आप्ताः, सर्वे च कामाः । तदर्थं हि देवानामसुराणां च स्पर्धा अभूत् । तत्र विरोचनस्य सिद्धान्तमनुसन्दधाना असुरा पराबभूवुः, देवास्तु आत्मानमेवोपासांचक्रिरे इति त एव तत्फलमवाप्तवन्तः इत्यभिप्रायः ॥

स्यादपि देवानाम् आजानसिद्धानां महानुभावानां ब्रह्मविद्यालाभात् सर्वलोकसर्वकामावाप्तिः, न तु मनुष्याणाम् अल्पवीर्याणामल्पायुषां च इति मा भूत् कस्यचिदपि शङ्का इत्यत आह – 'स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्' इति । यो योऽल्पवीर्योऽपीदानीमपि मनुष्यः, तमात्मानम् अनुविद्य विजानाति शास्त्राचार्योपदेशमनुसृत्य विदित्वा विजानाति स्वानुभवगोचरतां करोति स सर्वोऽपि यथाश्रुतं ब्रह्मविद्याफलं प्राप्नोत्येव । न विशेषस्तत्र देवानाम् । तथा च श्रुत्यन्तरम् 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां

तथा मनुष्याणाम्' (बृ. १ ४ १०) इति विद्यया सर्वात्मभावो ब्रह्मविद्याफलं मनुष्याणामपि देवैस्तुल्यमेवेत्याह । सर्वात्मभाव एव चात्र सर्वलोकसर्वकामावाप्तिरभिप्रेता ब्रह्मविदः । सर्वात्मत्वादेव च तस्य सर्वलोकावाप्तिः सर्वकामावाप्तिश्च स्याद् व्यवहारदृष्ट्यापि सत्यसङ्कल्पत्वात्, यथोक्तं श्रुत्यन्तरे – 'यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् । तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥' (मुं. ३–१–१०) इति ॥

'इति प्रजापतिरुवाच' इत्युक्त्वा, एवं सामान्येन सर्वेषामपि आत्मविद्याफलं ध्रुवं यस्मात् प्रजापतिरुवाच, तस्मात् सर्वेषामप्यात्मज्ञाने अधिकारः, न तु देवानामेवेति गम्यते । वेदानधिकारिणामपि 'श्रावयेच्चतुरो वर्णान्' (मो. ध. ३२७–४९) इतीतिहासपुराणश्रवणे सर्वेषामप्यधिकारस्मरणात् । विज्ञानफलं च दृष्टमेवात्र विवक्षितं पूर्वत्रेवात्र 'व्रजन्ति' इत्यनुक्त्वा 'यस्तमात्मानमनुविद्य विजानाति' इति विज्ञानमात्रेण फलावाप्त्युक्तेरिति ज्ञेयम् । तस्मात्, प्राजापत्योपदेशे श्रद्धावद्भिरवश्यमात्मा विजिज्ञास्यः – इत्युक्तं भवति ॥

'प्रजापतिरुवाच' द्विर्वचनं विद्यायामादरजननार्थम् उपदेशप्रकरणसमाप्तिद्योतनार्थं च ॥ ६ ॥

( इति त्रयोदशः खण्डः )

## १६. आत्मोपासकस्य जप्यो मन्त्रः

**श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य**

**धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामी-त्यभिसंभवामीति ॥ १ ॥**

### ग्रन्थसंबन्धः

८४. अथ हार्दविद्याशेषभूतोऽयं मन्त्रः समाम्नायते । षष्ठ-सप्तमयोर्निर्विशेषब्रह्मविद्यैव प्रतिपादिता । प्रजापतिवाक्ये च सैवानुवृत्ता इति विज्ञानमात्रेण सद्यः सर्वलोकसर्वकामावाप्तिफलसङ्कीर्तनलिङ्गादव-गम्यत इत्यत्रोचाम । एतत्तु प्रजापत्युपदेशप्रकरणम् उपास्यदहराकाश-स्तुत्यर्थमपि भवति इत्थं महाभागोऽयमाकाशः, यदस्य सतत्त्वविज्ञाना-दिन्द्रादिदेवाः इहैव सर्वलोकसर्वकामावाप्तिभाजोऽभूवन् । तस्मात्, हार्दाकाशोऽन्वेष्टव्यो विजिज्ञासितव्यश्च ब्रह्मलोकप्रेप्सुभिः—इति । अथेदानीमुपासनाप्रकरणं समापिपयिषुरुपासनाशेषभूतं मन्त्रमुपन्यस्यति । ‘श्यामाच्छबलम्’ इत्यादिकम् । कथं पुनरिदमवगम्यते, दहरविद्या-शेषभूतोऽयं मन्त्रः, न तु समनन्तरपूर्वनिर्गुणविद्याशेषभूत इति ? वाक्यशेषादिति ब्रूमः । मन्त्रार्थालोचनादेवं ह्यवसीयते । कथम् ?

**श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्ये** — इति प्रति-पत्त्यभिसन्धिर्हि दृश्यतेऽत्र । न चाशरीरः सर्वगतः सर्वात्मा कदाचित् प्रणाड्या प्रतिपत्तव्यो भवेत्, प्राप्तुरप्यात्मत्वात् । ‘**ब्रह्मलोक-मभिसम्भवामि**’ इति च ब्रह्मलोकः प्राप्तव्यत्वेन निर्दिश्यतेऽत्र । तेनासौ न स्वात्मभूतो ब्रह्मलोकः, किं तर्हि सूर्यादिद्वारेण प्राप्तव्य एवेति गम्यते । श्यामात् अतिगम्भीरवर्णात्, सूक्ष्मात्, ध्यायिभिरेव गम्यात्, हार्दब्रह्मणः, तद्विज्ञानबलाद् देवयानमार्गम् अनुसृत्य शबलं प्रपद्ये

... विज्ञायते । शबल इव शबलः, अनेककामभिश्रत्वात् ब्रह्म लोकः । तं प्रपद्ये गच्छेयम् इत्यर्थः ॥

तथा ‘**शबलात् श्यामं प्रपद्ये**’ नात्र ‘प्रपद्ये’ इति साक्षाद्गमनं गम्यते । न हि ‘ब्रह्मलोकात् प्रच्युतः श्यामं गच्छेयम्’ इति कोऽप्यभिसंदध्यात् । अतः ‘प्रपद्ये’ इति अधिगच्छेयम् इत्यर्थः । यद् हि हार्दं ब्रह्म, आकाशाख्यं पुण्डरीकवेश्मन्यन्तःस्थितम् अतिसूक्ष्मम्, प्राकृतानामगम्यम्, यस्मिन् द्यावापृथिवी, अग्निश्च वायुश्च, सूर्याचन्द्रमसौ, विद्युन्नक्षत्राणि – इत्यादि सर्वं समाहितम्, यद् ब्रह्मपुरे शरीरे तिष्ठदपि जरामरणादिभिर्न संश्लिश्यते, यच्च प्रजा अहरहर्गच्छन्त्योऽपि न विन्दन्त्यनृतेन प्रत्यूढत्वात्, यस्य च सत्यमित्येव नाम, यच्च सेत्वाख्यं प्राप्य संप्रसादावस्थायां सुकृतदुष्कृतादिभिर्न संस्पृश्यते, आन्ध्यव्याधिशोकसन्तापादिभिर्दोषैः सर्वथा प्रमुच्यते, यत्र नक्तमप्यहरेव निष्पद्यते, स श्यामो ब्रह्मलोकः । तस्मात् अतिसूक्ष्मात् इहैव शबलं ब्रह्मलोकं यस्मिन्नरश्च ण्यश्च, अश्वत्थः सोमसवनः, ऐरंमदीयं सरश्चेत्येवमादयोऽप्राकृताः विचित्राः कामाः प्राचुर्येण सन्ति, तच्छबलं प्रपद्ये, प्राकृतानां श्याममपि विद्याबलेन शबलमेव विजानीयाम् । एवं शबलादपि श्यामं गच्छेयम् । विविधैः कामैः सङ्कल्पमात्रादुपतिष्ठद्भिश्चित्रीकृतमपि शबलं तदेव हृदि स्थितम् सूक्ष्मेण रूपेण – इत्यधिगच्छेयम् इत्यर्थः ॥

तदेवं श्यामशबलयोरेकत्वभावनाभाविततया स्थितस्य किं भवेत् ? – तत्राऽऽद्य मन्त्रः । ‘**अश्व इव रोमाणि विधूय पापम्, चन्द्र इव राहोर्मुखात्प्रमुच्य**’ यथा अश्वो रोमाणि विधून्वानो सहैव

रजसा रोमाणि शातयति, एवं अहमपि पापं धर्माधर्मलक्षणं ब्रह्मज्ञानबलात् प्रजह्याम् । यथा च राहुग्रस्तश्चन्द्रस्तन्मुखात् प्रमुच्य भास्वरो भवति, एवमहमपि सर्वथा पाप्मसंपर्करहितो निर्मलो भवेयम् । तदेवं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा **शरीरम्** सर्वधर्माधर्माश्रयभूतं जरामृत्य्वादिसर्वसंसारधर्मयुक्तं परित्यज्य तस्मात् समुत्थाय कृतात्मा कृतकृत्यः सन्, साक्षात्कारेण निष्पन्नात्मभावः सन् इत्यर्थः । अकृतं नित्यं ब्रह्मलोकम् अभिसंभवामि प्राप्स्ये–इति शब्दो मन्त्रसमाप्त्यर्थः । इत्याध्यानं कार्यम् इत्यभिप्रायः ॥

## उपासनेतिकर्तव्यता मन्त्रसूचिता

८५. अयं मन्त्रः जपार्थ इहोदाहृतः, उपासनेतिकर्तव्यतासूचनार्थोऽपि भवति । कथम् ? इदं हि परमात्मोपासनं **शारीरकमीमांसानिर्णीतप्रकारेणा**नुष्ठातव्यं यथावर्णितापहतपाप्मत्वादिगुणके समानप्रकरणप्रदेशश्रुतगुणानामुपसंहारपूर्वकम् । **वाजसनेयके** हि 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते सर्वस्य वशी '(बृ. ४–४–२२) इत्यत्र हृदयायतनत्वसेतुत्वादिसमानधर्मप्रत्यभिज्ञानात् तत्रत्येश्वरगुणानपीहोपसंहृत्य अहरहः समानप्रत्ययप्रवाहो विजातीयप्रत्ययानन्तरितः करणीयः । आप्रायणाच्चैवं प्रत्ययावृत्तिः कर्तव्या, अन्त्यप्रत्ययवशादेव अदृष्टफलप्राप्तेः। य एवासौ ब्रह्मलोकः शरीरपातादूर्ध्वं प्राप्तव्यः, तमेव हार्दं ब्रह्मेदानीमप्यहरहः सुषुप्तिकाले प्रपद्ये–इति भावनादार्ढ्यं संपादयेत् ; 'श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्ये ' इति मन्त्रवर्णात् । भावनाबलाच्च जरामृत्युसुकृतदुष्कृतादिसंसारधर्मवर्जितं ब्रह्मलोकं गन्तास्मि इति क्रतुं कुर्वीत ; 'न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतम् ' (४–१)

इतिवर्णितसेत्वात्मवर्णनात्; 'विधूय पापम्' इति मन्त्रवर्णाच्च। एवं सर्वसंसारधर्माश्रयशरीरसंबन्धमुत्सृज्यैव ब्रह्मलोकं गमिष्यामीति दृढप्रत्यय आसादयितव्यः 'शरीरात्समुत्थाय....स्वेन रूपेणाभिनिष्पद्यते' (३·४) इति श्रुतिवचनात्, 'धूत्वा शरीरम्' इति मन्त्रवर्णाच्च। भावनाप्रकर्षलक्षणः साक्षात्कारश्च संपादनीय उपासनेन; 'ब्रह्मलोकमभिसंभवागीत्यभिसंभवामीति' इत्यादरदर्शनाल्लिङ्गात्। 'देवो भूत्वा देवानप्येति' (बृ. ४-१-२), 'यस्य स्यादद्धा न विचिकित्साऽस्ति' (छा. ३-१४-४) इत्यादिभिः साक्षात्कारसाध्यं विद्याफलं दर्शयन्तीभ्यः श्रुतिभ्यश्च। तदेवं यथोपासनं फलं भवतीति मन्त्रे सूचितमिति॥

( इति त्रयोदशः खण्डः )

# १७. ब्रह्मणो लक्षणम्

आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म तदमृतꣳ स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽहमनुप्रापत्सि स हाहं यशसां यशः श्येतमदत्कꣳ श्येतं लिन्दु माभिगां लिन्दु माभिगाम्॥ १॥

## ब्रह्मणो नामरूपव्याकर्तृत्वम्

८६. 'आकाशो वै नाम'। आकाश इति परमात्मा निर्दिश्यते। आकाशवत्सूक्ष्मत्वात्, सर्वगतत्वाच्च। तथा हि विधिवाक्ये

निर्दिष्टम् 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः' (१–१) इति। स एष आकाशनाम्ना प्रसिद्धः परमात्मा नामरूपयोः स्वात्मस्थयोः स्वात्मभूतयोरिवाविद्याकल्पितयोः, तत्त्वान्यत्वाभ्यामनिर्वचनीययोः, जगद्बीजभूतयोः, प्रकृति-मायाशक्ति-बीजादिशब्दैर्व्यवह्रियमाणयोः, निर्वहिता व्याकर्ता। यद्यपि श्रुत्यन्तरे 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत' (बृ. १–४–७) इत्यव्याकृतं स्वयमेव व्याक्रियत इत्युक्तम्, तथापि तत्र ब्रह्मण एवाऽव्याकृतजगदात्मना स्थितस्य तथा व्याकरणं विवक्षितमित्यविरोधः। श्रूयते ह्यन्यत्र ब्रह्मण एव व्याकृतजगदात्मना परिणामः 'तदात्मानं स्वयमकुरुत' (तै. २–७), 'तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजत' (छां. ६–२–३)–इत्यादिस्थलेषु। ब्रह्मण एव हि रूपभेदोऽयं यद् व्याकृताव्याकृतजगन्नाम। इह तु व्यवहारदृष्ट्या विषयविषयिभावेन विभागं परिकल्प्योच्यते, **'नामरूपयोर्निर्वहिता'** इति। तदिदं प्राक्सृष्टेरपि कर्मैव भवति ब्रह्मस्वभावभूतस्य नित्यज्ञानस्येति 'तदैक्षत बहु स्यां प्रजायेयेति', 'आकाशो वै नाम नामरूपयोर्निर्वहिता' इत्युभयथापि श्रौतव्यवहार उपपद्यते॥

## नामरूपाभ्यां विलक्षणं ब्रह्म

८७. अत एव च स्वेन कूटस्थचैतन्यरूपेण ताभ्यां नामरूपाभ्याम् अविद्याकल्पिताभ्याम् अन्योऽयं सर्वज्ञः परमेश्वरः, तदाह **'ते यदन्तरा तद् ब्रह्म'** इति। ते नामरूपे यदन्तरा यस्यान्तरेव तदाश्रित्य वर्तेते, तद् ब्रह्म; अथवा तयोरन्तरम्, परमार्थात्मभूतं यत्

तद् ब्रह्म ; तद्धि नामरूपबीजमव्याकृतं तत्कार्यभूतं व्याकृतं च जगद् बिभर्ति रज्जुरिव सर्पादिविकल्पजातमिति । तदेवं नामरूपयोर्यन्निर्वोढृ तदमृतम्, 'यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्' (७-२४-१) इति हि विज्ञायते। अल्पम्, अविद्याकालमात्रभावित्वात् । नामरूप-बीजतत्कार्यलक्षणं यत् तन्मर्त्यं तस्मिन्नेवाकाशाख्ये ब्रह्मणि विकल्पित-त्वात्, व्यभिचरत्स्वरूपं विनाशीत्यर्थः। स एव त्वाकाश आत्मा सर्वस्यास्य नामरूपात्मकस्य जगतः, तेन विरहितं हि शून्यकल्पमेव स्यादिदं सर्वमिति । उक्तं च षष्ठे 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' (६-८-७....) इति ॥

## उपासकस्य प्रार्थनामन्त्रः

८८. अथास्यैव ब्रह्मणो यो व्याकृतरूपविशेषः प्रजापति-लोकः, तं गत्वा यान् ब्राह्मलौकिकान् ऐश्वर्यविशेषान् अनुभविताऽयं हार्दाकाशोपासकः, तच्चिन्तनार्थं प्रार्थना आविष्क्रियते '**प्रजापतेः सभां वेश्म प्रपद्ये**' इत्यादि । तदर्थमेव हि 'आकाशो वै नाम' इत्यादि ब्रह्मलक्षणवाक्यमुपक्रान्तम् ॥

तदेतदाकाशाख्यं ब्रह्म पुण्डरीकवेश्मनि नित्यमादरसत्कार-पूर्वकम् उपासीनोऽहं प्रजापतेर्ब्रह्मणः सभां वेश्म प्रभुविमितं प्रपद्ये गच्छेयम् । तत्र च '**यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशाम्**' । यशः इति परमात्मनो नाम ; 'यस्य नाम महद्यशः' (श्वे. ४-१९) इति श्रुतेः । अहम् उपासने अधिकृतानां ब्राह्मणानां

विशां च सर्वेषामपि आत्मा भवेयम्, ब्रह्मवदेव, तत्सायुज्यं प्राप्तः। ‘यशोऽहमनुप्रापत्सि’। तदेतद् यशो नाम ब्रह्म अहम् उपासनेन साक्षात्कारमनु प्राप्नुयाम्। ‘स हाहं यशसां यशः’। सर्वेषामपि यशसाम् आत्मनां यशो भवेयं सर्वात्मभावापत्त्या। तेन च यशोभावेन प्राप्तेन किं स्यादिति? उच्यते ‘श्येतमदत्कं श्येतं लिन्दु माभिगाम्’। श्येतं रोहितम्। अदत्कं दन्तरहितमपि भक्षयितृ स्त्रीव्यञ्जनम्, तत्सेविनां तेजोबलवीर्यविज्ञानधर्माणाम् अपहन्तृत्वात्। तदेतदनन्तानर्थप्रवाहे पातयितृ श्येतं लिन्दु रोहितं पिच्छलं च माभिगाम् माऽभिगच्छेयम्; पुनर्गर्भवासादिदुःखं मा प्राप्नुयाम् इत्यर्थः। द्विर्वचनमत्यन्तानर्थहेतुत्वदर्शनार्थं हार्दविद्याप्रकरणपरिसमाप्तिसूचनार्थं च ॥

(इति चतुर्दशः खण्डः)

## १८. उपसंहारः

तद्धैतद् ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यः आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते ॥ १ ॥

## ग्रन्थसंबन्धः

८९. अथेदानीं सर्वस्यैवोपनिषदर्थस्य सोपकरणस्य समुपसंहारार्थं गुरुवंशं कथयति – तद्धैतदित्यादिना ॥

तदेतद् ब्रह्मात्मज्ञानम् उद्गीथविद्याद्युपासनैः सह, तदर्थत्वादुपनिषत्संज्ञकं ग्रन्थं च, ब्रह्मा हिरण्यगर्भः प्रजापतये उवाच । ब्रह्मणे ह सर्वे वेदाः परमेश्वरेणैवाऽऽदिकर्त्रा सत्यसङ्कल्पेन प्रेष्य तद्धृदये स्फोरिता इति श्रुत्यन्तराद् विज्ञायते । 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।' (श्वे. ६–१८) इति । ब्रह्मणः सकाशादधिगतामेतां विद्यां प्रजापतिर्मनवे स्वपुत्राय उवाच । स च मनुः प्रजाभ्य उवाच । एवमियं गुरुशिष्यसंप्रदायपरम्परया प्रवर्तिता अद्यापि विद्वत्सु प्रतिष्ठिता विद्या ॥

## ज्ञानसाधनानि

९०. अस्यां च विद्यायां यद्यपि सर्वेषामप्याश्रमिणामस्त्येव यथायथम् अधिकारः, तथापि यज्ञदानतपआदीनि यथासंभवम् अतीन्द्रियसंयमादीन्याश्रमान्तरकर्माणि च गृहस्थस्यैवैकस्य विहितानीति साधनकात्स्र्न्यमस्मिन् आलक्ष्य सर्वमपि साधनं ज्ञाने विनियुज्यत इत्युपदिदिक्षु शास्त्रम् आह – '**आचार्यकुलात् वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य**' इत्यादि । गुरुशुश्रूषायाः प्राधान्यात् गुरोः कर्मातिशेषेण कालेन वेदमधीत्य नियमेन साङ्गाध्ययनं कृत्वा धर्मजिज्ञासां च समाप्य, गुरुकुलान्निवृत्य – इत्यर्थः । एतेन सर्वाश्रमकर्मणां ज्ञाने विनियोगः सूचितः । **कुटुम्बे शुचौ देशे**

स्वाध्यायमधीयानो धार्मिकान्विदधत् ' इति गार्हस्थ्यधर्मस्य विनियोगः । 'शुचौ देशे स्वाध्यायमधीयानः' इति स्वाध्यायस्य प्रामुख्यं दर्शितम् । ' धार्मिकान् विदधत् ' इति पुत्रान् शिष्यांश्च धर्मयुक्तान् कुर्वन् इति प्रवचनं कर्तव्यतया विशिष्य दर्शितम् । स्वाध्यायप्रवचनयो रितरसाधनैः समुच्चित्यानुष्ठानं तु विवक्षितम् ' ऋतं च स्वाध्यायप्रवचने च । .... अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचने च ' (तै. १–९), ' सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्' (तै. १–११) इति च श्रुत्यन्तरात् । 'आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्य ' इति वानप्रस्थसंन्यासिनोर्धर्मस्यापि कुटुम्बे यथासम्भवमनुष्ठानम् अनुमोदितम् । ' अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः ' इति च शास्त्रानुज्ञातविषयाद् यज्ञादेरन्यत्र प्राणिपीडनमकुर्वन् इति यथासंभवम् अहिंसाद्याश्रमान्तरे कर्तव्यमपि गृहस्थस्य विधीयते ॥

' स खल्वेवं वर्तयन् ' कुटुम्बे एवैतत् सर्वं कुर्वन्, यावदायुषं यावज्जीवं गार्हस्थ्यधर्मान्, यथासम्भवम् इतराश्रमधर्मांश्च एवं यथोक्तरीत्या वर्तयन् कर्मोपासनेन्द्रियसंयमाद्यनुष्ठानेन ब्रह्मलोकं देवयानेन पथा गतो ब्राह्मलौकिकान् कामान् यावद्ब्रह्मलोकस्थितिस्तावत् उपभुङ्क्ते । न च पुनरावर्तते शरीरग्रहणाय यावद् ब्रह्मलोकस्थितिस्तावत् । ' एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते ' (४–१५–५), ' तेषां न पुनरावृत्तिः' (बृ. ६–२–१५) इति 'इमम्', 'इह' इति विशेषण-

दर्शनात् कालान्तरे पुनरावृत्तिरप्यस्ति । तत्रैव लब्धसम्यग्ज्ञानश्चेत् परब्रह्मप्राप्त्या सर्वथाप्यपवृज्यते । इहैव लब्धविज्ञानश्चेत् प्राणोत्क्रमणं विनैव स्वरूपभूतमेव ब्रह्मलोकं गच्छति । नैव च पुनरावर्तते 'अत्र ब्रह्म समश्नुते' (का. २-३-१४) इति श्रुतेः । 'कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः' (गी. ४-२०), 'यज्ञायाचरतः कर्म समग्रं प्रविलीयते' (गी. ४-२३) इति स्मृतिप्रामाण्यात् कुटुम्बिनामपि ज्ञानिनां ब्रह्मबुद्ध्युपमृदितसर्वकर्मत्वात् – इति सर्वं शिवम् ॥

**इति श्रीपरब्रह्मविद्यारहस्यविवृतिः समाप्ता**

---

# अथ परिशिष्टचिन्ता

## परापरब्रह्मविद्याविभागस्य सतत्त्वं विचारणीयम्

९१. अथेदानीं चिन्त्यमिदं शास्त्रार्थनिर्मलत्वाय – किं यान्येव हार्दविद्याविधिगतानि ब्रह्मविशेषणानि 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः' (८-१-५) इत्यादीनि, तान्येव यानि प्रजापतिना समुपदिष्टानि 'य आत्मा अपहत-पाप्मा विजरो विमृत्युः' (८–७–१) इति, उत तद्विलक्षणानि ? यदि तान्येव, किमिति पुनरपि श्रुत्या विज्ञाप्यन्ते प्रजापतिमुखेन ? (२) किमिमे अष्टौ गुणाः ब्रह्मणः स्वरूपभूताः, आहोस्वित् ब्रह्मसमवेता गुणगुणिभावेनैव तत्संबद्धाः ? यदि गुणा एवैते ब्रह्मणः, तर्हि मुक्तः किमेतैर्गुणैः सगुणमेव ब्रह्म स्वात्मत्वेन प्रत्येति, किं वा निर्गुणमेव ? यदा च सगुणमेव ब्रह्म प्रतिपद्यते, तदा कथं 'स्वेन रूपेणाभि-निष्पद्यते' (८–१२–३) इति श्रुतिराञ्जसी स्यात् ? यदि पुनर्निर्गुण-मेव स्वात्मत्वेन प्रतिपद्यते, कथं 'स सर्वांश्च लोकानाप्नोति, सर्वांश्च कामान्' (८–७–१) इति ? तदेतत् सर्वं निरूप्य निर्धारणीयम् । यतोऽत्र बहवो वादिनो विप्रतिपन्नाः श्रुतियुक्तितदाभाससमाश्रयाः सन्तः । तस्मात् विस्तीर्णतरं विचार्य निर्धारणीया एते विषयाः ; अनिर्धार्य यत्किञ्चित्प्रतिपत्तौ हि निःश्रेयसात् प्रच्युतिः स्यात्, अनर्थ-प्राप्तिश्च जिज्ञासूनाम् इति ॥

## निर्गुणवस्तुप्रतिपादकवाक्यान्येव न सन्तीति मतम्

९२. अत्र केचिदाधुनिकवेदान्तिनो ब्रुवते – निर्विशेषचिन्मात्रवस्तुप्रतिपादकानि वेदान्तवाक्यान्येव तावन्न सन्ति, येनेयं चिन्ता सप्रयोजना स्यात् इति। सर्वत्र किल वेदान्तेषु ब्रह्मणो जगदुपादानत्वम्, जगन्निमित्तकारणत्वम्, सर्वज्ञता, सर्वशक्तियोगः, सत्यसङ्कल्पत्वम्, सर्वान्तरत्वम्, सर्वाधारत्वम्, सर्वनियामकत्वम् – इत्याद्यनेककल्याणगुणविशिष्टताम् कृत्स्नस्य जगतस्तदात्मकतां च प्रतिपाद्य 'एवंभूतब्रह्मात्मकस्त्वमसि' इति जीवं प्रत्युपदेशो लक्ष्यते। यत्रापि निर्गुणवाक्याभासा दृश्यन्ते, ते सर्वे प्राकृतहेयगुणापह्नवपराः। तत्रैव वाक्यशेषे नित्यत्वविभुत्वसाक्षित्वादिकल्याणगुणयोगस्य प्रतिपाद्यमानत्वात्। ज्ञानमात्रस्वरूपात्मवादिनां च पक्षे ज्ञातुरेव ज्ञानस्वरूपत्वाभिधानात्; विशिष्य च प्रकृतप्रजापतिवाक्ये अपहतपाप्मेत्यादिना 'अपिपास' इत्यन्तेन हेयगुणान् प्रतिषिद्ध्य 'सत्यकामः, सत्यसङ्कल्पः' इति ब्रह्मणः कल्याणगुणत्वस्यैव प्रतिपादनात्। तदेवं सगुणनिर्गुणवाक्ययोर्विरोधाभावात्, अन्यतरस्य मिथ्यात्वमपि नाश्रयणीयम्। यथा शब्दस्य पदवाक्यरूपेण प्रवर्तमानस्य सविशेष एव वस्तुन्यभिधानसामर्थ्यम्, तथा प्रत्यक्षस्य तदुपजीविनां चानुमानादीनां सविशेष एव प्रमाणभाव इत्यतो निर्गुणनिर्विशेषब्रह्मणः सर्वथा प्रमाणशून्यत्वात्, श्रुतियुक्त्यनुभवबाह्य एव निर्गुणब्रह्मवादः। तस्मात्, निष्फलैवैषा सगुणनिर्गुणविद्याविभागचिन्ता इति॥

## सगुणब्रह्मैकवादिनां वाक्यव्याख्यानम्

९३. इत्थं तु तेषां दहरवाक्यप्रजापतिवाक्ययोर्व्याख्यानम्। दहराकाशशब्दनिर्दिष्टमात्मानं तदन्तर्वर्तिनश्च काम्यभूतान् अपहतपाप्मत्वादिकान् गुणान् विजानताम् उदारगुणसागरस्य परमपुरुषस्य प्रसादादेव सर्वकामावाप्तिः सत्यसङ्कल्पता चोपपद्यते। 'तेषां सर्वेषु लोकेषु कामचारो भवति' इति प्रतिज्ञावाक्यात्। अतस्तदुभयम् अन्वेष्टव्यं विजिज्ञासितव्यं चेति विधीयते दहरवाक्यजातेन। प्रजापतिवाक्ये पुनः, जागरितस्वप्नसुषुप्तावस्थं जीवात्मानं क्रमेणोपदिश्य तत्र तत्र भोग्यमपश्यते मघवते शरीरस्याधिष्ठानतां आत्मनश्चाधिष्ठातृताम् अशरीरस्य तस्यामृतस्वरूपतां चोक्त्वा जीवात्मनः स्वरूपमेव शरीरवियुक्तम् उपदिश्यते 'स्वेन रूपेणाभिनिष्पद्यते' इति। 'स तत्र पर्येति जक्षत्क्रीडन्रममाणः' इति निवृत्ततिरोधानस्य परं ज्योतिरुपसंपन्नस्य प्रत्यगात्मनो ब्रह्मलोके यथेष्टभोगावाप्तिं प्रियाप्रियावियुक्तकर्मनिमित्तशरीराद्यपुरुषार्थाननुसन्धानं चाभिधत्ते प्रजापतिरित्यतो जीवस्याप्यपहतपाप्मत्वादयः सम्भवन्तीति स एव दहराकाश इति प्राप्ते **बादरायणः** सूत्रयामास 'आविर्भूतस्वरूपस्तु' (वे.सू. १-३-१९) इति। पूर्वमनृततिरोहितापहतपाप्मत्वादिगुणकस्वरूपः पश्चाद् विमुक्तकर्मबन्धः शरीरात्समुत्थितः परं ज्योतिरुपसंपन्न आविर्भूतस्वरूपः सन् अपहतपाप्मत्वादिगुणविशिष्टस्तत्र प्रजापतिवाक्ये अभिधीयते ; दहरवाक्ये तु अतिरोहितस्वभावापहतपाप्मत्वादिविशिष्ट एव दहराकाशः प्रतीयते। आविर्भूतस्वरूपस्यापि जीवस्यासम्भावनीयाः सेतुत्वसर्वलोकविधरणत्वादयः, सत्यशब्दनिर्वच-

नावगतं चेतनाचेतनयोर्नियन्तृत्वं च दहराकाशस्य परब्रह्मतां साधयन्ति । सेतुत्वसर्वलोकविधरणत्वादयः, आविर्भूतस्वरूपस्यापि न संभवन्तीति 'जगद्व्यापारवर्जम्' (वे. सू. ४-४-१७) इत्यत्रोपपादयिष्यते । प्रजापतिवाक्ये च मुक्तात्मस्वरूपयाथात्म्यविज्ञानं दहरविद्योपयोगितया उक्तम् । ब्रह्मप्रेप्सोर्हि जीवात्मनः स्वस्वरूपमपि ज्ञातव्यमेव, स्वयमपि कल्याणगुण एव सन्ननवधिकातिशयासङ्ख्येयकल्याणगुणगणं स्वात्मभूतं परं ब्रह्मानुभविष्यतीति ब्रह्मोपासनाफलान्तर्गतत्वात् स्वस्वरूपयाथात्म्य-ज्ञानस्य । तत्र कीर्त्यमानं फलमपि 'जक्षत्क्रीडन्' इत्यादिकं दहरविद्या-फलमेव इति ॥

# सगुणेश्वरैकान्त्यवादनिराकरणम्

## (१) ब्रह्मणि प्रमाणाप्रवृत्तिः प्रमातृत्वस्याविद्याकृतत्वात्

९४. तदिदमभिनववेदान्तिमतं प्रदर्शनार्थमत्र संगृहीतम् । एवमेवापरेऽपि तटस्थेश्वरवादिनो निर्गुणब्रह्मवादम् उत्सृज्य स्वस्वप्रक्रि-यानुसारेण केवलपरिणामिकारणं केवलनिमित्तकारणं वा, अभिन्न-निमित्तोपादानकारणं वा ब्रह्म-इत्यास्थाय सर्वत्रापि स्वमते श्रुतियुक्ति-तदाभासान् उदाहरन्ति । अतो यथोदाहृतमतनिराकरणेनैवावशिष्टा निराकृता भवन्तीति कृत्वा संग्रहेण तद्दूषणमभिधीयते ॥

यत्तावत् प्रतिज्ञायते सर्वैरेतैः सगुणेश्वरैकान्त्यवादिभिः, निर्गुण निर्विशेषब्रह्मणि न किञ्चित् प्रमाणमस्तीति, तत् सिद्धमेव साधयितुं

वृथाप्रयतनम् । प्रमाणानि हि प्रमेयेष्वेव प्रवर्तन्ते प्रमातारमाश्रित्य — इति वस्तुस्थितिः । प्रमातृत्वमेव तावदविद्याऽव्यवहारक्षेत्रे अभ्युपगम्यते लौकिकैः, देहेन्द्रियादिष्वहंममाभिमानरहितस्य स्वतःप्रमातृत्वानुपपत्तेः । न चात्मनो मिथ्याभिमानं मुक्त्वा देहेन्द्रियादिमत्त्वे किञ्चित् प्रमाणमस्ति । तस्मात्, अशरीरस्वभावस्यासङ्गस्यात्मनः शरीरादिमत्त्वमेवाविद्याकृतमिति स्थिते, कथङ्कारमुपपाद्येत केनचित् तादृशात्मनि प्रमाणव्यापारः ? तस्मात्, सिद्धमेवेदं यन्निर्विशेषात्मनि न किञ्चित् प्रमाणं समस्तीति ॥

## (२) प्रमेयानामाविद्यकत्वादपि ब्रह्मणि प्रमाणाप्रवृत्तिः

९५. तदेवं प्रमातृत्वस्यैवाविद्याकृतत्वात् तदाश्रितत्वस्वाभाव्यानामप्रवृत्तिः प्रमाणानामद्वितीये ब्रह्मणीत्यधिगतम् । एवं प्रमेयानामप्यविद्याप्रत्युपस्थापितस्वरूपत्वात्, अप्रमेयाद्वितीयस्वभावे ब्रह्मणि परमार्थरूपे प्रमाणाप्रवृत्तिः, न तु निर्गुणब्रह्मणो नास्तित्वादिति ज्ञेयम् । तथा हि श्रुतिराह 'एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् । विरजः पर आकाशादज आत्मा महान् ध्रुवः ॥' (बृ. ४–४–२०) इति । अद्वितीये हि ब्रह्मणि न प्रमाणप्रमेयव्यवहारस्य कथञ्चिदवकाशोऽस्ति व्यावहारिकद्वैतक्षेत्रमात्रे लब्धप्रसरत्वात् तस्य । तथा हि श्रुतिः 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं रसयते तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतरं स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् .... तत्केन कं विजानीयात् ।' (बृ. ४–५–१५) इति ॥

## (३) ब्रह्मणः श्रुतिप्रमाणकत्वं कथम् ?

९६. यत्पुनरुच्यते पदवाक्यरूपेण प्रवर्तमानस्य शब्दस्य सविशेष एव वस्तुन्यभिधानसामर्थ्यम् इति, अभिधेयभूतप्रमेयेषु तथैवेति सर्वसंप्रतिपन्नत्वात् तत्र नैव विवादः । यथोक्तनीत्या प्रमाण-प्रमेयव्यवहारातीते कूटस्थचैतन्यस्वरूपे अद्वितीये ब्रह्मण्यप्रमेये तु नैवाभिधानाभिधेयलक्षणविभागोऽस्तीति शब्दोऽपि वाक्यधर्माङ्गीकारेण तद् विज्ञापयितुं न प्रवर्तते, किं तर्हि सर्वप्रमाणप्रमेयव्यवहार-प्रतिषेधेनैव तत्स्वरूपं समर्पयति । तथा हि श्रुतिः 'अथात आदेशो नेति नेति' (बृ. २–३–६) इति ॥

## श्रुतियुक्त्यनुभवसिद्धत्वं निर्गुणब्रह्मवादस्य

९७. एतेन श्रुतियुक्त्यनुभवबाह्य एव निर्गुणब्रह्मवाद इति परोक्तिरपि दूरनिरस्ता भवति । तत्रापि हि शङ्कितुरेवानवधानापराधः । कथम् ? श्रुतिस्तावत् 'एको देवः सर्वभूतेषु गूढः, सर्वव्यापी सर्व-भूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥' (श्वे. ६–११) इति कूटस्थचैतन्यस्वरूपं सर्वभूतान्त-रात्मानं निर्गुणमेव स्फुटं निर्दिशति । सर्वसाक्षित्वादेव च तस्य निर्विशेषत्वं युक्त्यापि सेत्स्यति । यो यो हि विशेषो जातिद्रव्यगुण-क्रियासंबन्धद्वारेणाभिधीयते शब्देन, चिन्त्यते वा मनसा, तस्य सर्वस्यापि साक्ष्यत्वेनैवोपक्षयाद् यथोक्तसाक्षिणो ब्रह्मणो निर्विशेषत्व-मेवेत्यवसीयते । न च साक्षित्वादेव तस्य दृश्यसंबन्धो दुर्निवारणः स्यात्, ततश्च तस्य नाद्वैतत्वमिति शङ्क्यम् । 'केवलो निर्गुणश्च'

— इति वाक्यशेषेणाद्वैतत्वस्यापि श्रुत्यैवोद्घोषणात् । कथं तर्हि तस्य साक्षित्वम् ? साक्षी हि नाम साक्षाद्द्रष्टा । 'साक्षाद्द्रष्टरि संज्ञायाम्' (पा. ५–२–९१) इति स्मृतेः । न च दृश्यमन्तरेण द्रष्टृत्वमस्ति, दृष्टिकर्तृत्वमन्तरेण वा इति चेत् ? नैष दोषः । अविद्याकल्पितशरीरादिदृश्यापेक्षयाऽपि द्रष्टृत्वोपचारसंभवात्, उष्णस्वभावस्यैव वह्नेर्दग्धृत्वोपचारवत् । अनुभूयते खलु सुषुप्ताद्यवस्थासु दृश्याभावेऽपि चैतन्यस्वभावेनैव द्रष्टृत्वमस्य । श्रुतिरप्येतदन्वाचष्टे 'यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' (बृ. ४–३–२३), 'सलिल एको द्रष्टाऽद्वैतो भवति' (बृ. ४–३–३२) इति च दृश्याभावेऽपि द्रष्टृत्वमद्वैतत्वं च । तदेवं श्रुतियुक्त्यनुभवसिद्धमेव निर्गुणनिर्विशेषब्रह्मवादं विद्विषन्ति वेदान्तार्थनिर्धारणापेक्षितां सूक्ष्मेक्षिकामलब्ध्वा, अद्वैतेऽभयेऽप्यात्मनाशभयदर्शनाद् वा — इति स्थितम् ॥

## शङ्कावादिकृतश्रुतिव्याख्यादूषणम्

९८. यत्तु व्याख्यानम्, प्रजापतिवाक्यप्रतिपादिताविर्भूतस्वरूपस्यापि जीवस्यासम्भावनीयाः, सेतुत्वसर्वलोकविधरणत्वादयः, सत्यशब्दनिर्वचनावगतं चेतनाचेतनयोर्नियन्तृत्वं च — इत्येते गुणा दहराकाशस्य परब्रह्मतां साधयन्तीति, तद् ब्रह्मस्वरूपनिर्धारणप्रक्रियानभिज्ञतानिमित्तम् । तथा हि—'अस्थूलमनण्वह्रस्वमदीर्घम्' (बृ. ३-८-८), 'अशब्दमस्पर्शमरूपमव्ययम्' (का. ३–१५), 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः'(बृ. २–५–१९)—इत्येवमादीनि

वाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि, नोपासनाविधायीनि नियो-
गोपदेशीनि वा ; न हि तत्प्रकरणे वाक्यशेषे सगुणब्रह्मोपासनाविधि-
गन्धोऽप्यस्ति । तानि च वाक्यानि ब्रह्मवस्तुस्वरूपप्रतिपादनेनैवोपक्षीणा-
नीति उपक्रमोपसंहारादितात्पर्यलिङ्गैरवसीयते । तत्तद्ब्रह्मवाक्यगतपदाना-
मपि ब्रह्मस्वरूपविषये एव समन्वयो निश्चितो दृश्यते । इतराणि तु
'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः'
(छां. ३–१४–४) इत्येवमादीनि 'तज्जलानिति शान्त उपासीत ....
स क्रतुं कुर्वीत' (छां. ३–१४–१) इत्यादिप्रकारेणोपासनाविधिप्रधाना-
न्युपलभ्यन्ते । तदत्र 'यत्परः शब्दः स शब्दार्थः' इति न्यायमनुसृत्य
तत्पराणि वाक्यान्यतत्परेभ्यो बलीयांसीत्यभ्युपगन्तव्यम् । अतः,
उपासनाविधिपरेषु यानि ब्रह्मविशेषणानि, न तानि सर्वाण्यपि तत्स्वरूप-
प्रतिपादकानि, अन्यार्थत्वात् ; तत्र यानि निर्विशेषब्रह्मस्वरूपसमर्पकाणि,
तानि यथाश्रुतमेवाऽऽश्रयितव्यानि ; यानि तु तद्विपरीतानि, तानि
ब्रह्मस्वरूपनिर्धारणावसरे न तद्विशेषणतया आश्रयितव्यानि इत्येव
[illegible]म् । तदेवं स्थिते, ब्रह्मस्वरूपनिर्धारणपरेषु वाक्येषु 'अस्थूल-
[illegible]' (बृ.) इत्यादिषु प्राकृतहेयगुणप्रतिषेध एव वाक्यार्थः, न तु
[illegible]ा निर्गुणत्वमेव इति केन सचेतसा अवगन्तुं शक्येत ? केन वा
'स एष नेतिनेत्यात्मा' (बृ. ३–९–२६) इत्यवधारितेऽप्यौपनिषद-
पुरुषाख्याऽऽत्मस्वरूपे निर्विशेषे सविशेषः सगुण एव च परमात्मा
तत्रापि विवक्षित इति दुराग्रहेण सगुणवाक्यस्थानि विशेषणानि तत्रापि
[illegible]म् अनुपलभ्यमानेऽपि कुत्रचिद् वेदान्तवाक्ये 'अनन्त-
कल्याणगुणगणो हेयगुणरहितः' इत्येवंरूपे विशेषणे ?

यच्चोन्नीयते प्रजापतिवाक्ये परं ज्योतिरुपसंपन्न आविर्भूतस्वरूपो जीवोऽभिधीयते; मुक्तजीवस्याप्यसम्भावनीयानि विशेषणानि दहराकाशस्य सन्तीति प्रतिपादयितुं दहरविद्योपयोगितयैव तत्र मुक्तात्मस्वरूपमुक्तम् इति; तत्र ब्रूमः। सिद्धे ह्युपासनाविधिशेषत्वे आत्मविशेषणानामन्यत्रोक्तानामपि दहरविद्याविध्युपयोगित्वं शक्यमभ्यूहितुम्; न तु तदस्ति। भिन्नवाक्यतैव हि ब्रह्मवाक्यानाम् उपासनाविधिवाक्यानां च दरीदृश्यते सर्वत्र वेदान्तेष्विति ॥

किञ्च, उपक्रमोपसंहारादिलिङ्गैर्वाक्यगतिपर्यालोचनयापीदमवगम्यते यत् प्रजापतिवाक्यं वस्तुमात्रप्रतिपादनपरमेव, न तूपासनाविधिशेषभूतार्थसमर्पकमिति। कथम्? उपक्रमे तावत् प्रजापतिरुवाच— 'योऽयमपहतपाप्मत्वादिधर्मक आत्मा, सोऽन्वेष्टव्यः, स एव च विजिज्ञासितव्यः' (७–१) इति। फलं चाह विज्ञानमात्रेण 'स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमनुविद्य विजानाति' (७-१) इति। न तु दहरवाक्ये इव 'य इहात्मानमनुविद्य व्रजन्त्येतांश्च कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति' (१–६) इति गतिपूर्वकं फलावाप्तिम्। फलसङ्कीर्तनमप्यत्र न नाडीरश्मिद्वारेण ब्रह्मलोकं गतस्येति वर्ण्यते, नापि तत्तद्विषयसङ्कल्पपूर्वकम्, यथा दहरवाक्ये। अन्वेषणप्रकारश्च भिन्नभिन्न एव। हृदयशब्दनिर्वचनभावनाज्ञानम्, सत्यशब्दनिर्वचनज्ञानम्, सेतुधर्मज्ञानं चाहरहः स्वर्गलोकगमने प्रयोजकमिति दहरवाक्ये; 'य एषोऽक्षिणि पुरुषो दृश्यते', 'य एष स्वप्ने महीयमानश्चरति', 'यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति' इति चावस्थात्रय-

साक्षिभूतात्मानुसन्धानं च प्रजापतिवाक्ये – इति । तत्तदवस्थोपहित-आत्मनश्च ब्रह्मणा एकीभावं प्रतिजानीते प्रजापतिः, 'एतदमृतमभयमेतद् ब्रह्म' (७–४, १०–१, ११–२) इति, न तु दहरवाक्ये इव शरीरात्प्रेतस्यैव गतिमाह नाडीद्वारा निर्गतस्य 'तयोर्ध्वमायन्नमृतत्वमेति' (५–६) इति । किञ्च प्रतिपर्यायं मघवान्, श्रुतार्थस्य मननं कृत्वा 'नाहमत्र भोग्यं पश्यामि' (९–२, १०–४, ११–२) इति विद्याया दृष्टार्थत्वं सूचयति; न त्वेवं दहरवाक्ये अन्तेवासिनां मननरूपं कृत्यं प्रदर्श्यते, भावनाप्रकर्षाल्लोकान्तरे एव फलप्राप्तेरिष्टत्वात् तत्र । तदेवं प्रजापतिवाक्ये आत्मानात्मविवेकादाविर्भूतस्वरूपस्य जीवस्येहैव ब्रह्मप्राप्तिः, सर्वलोकसर्वकामावाप्तिश्चाभिप्रेता श्रुतेरित्यवसीयते ॥

यदपि चोत्प्रेक्ष्यते – प्रजापतिवाक्ये दहरविद्योपयोगितया मुक्तजीवात्मस्वरूपमपि ज्ञातव्यमेव । स्वयमपि कल्याणगुण एव सन्ननवधिकातिशयासङ्ख्येयकल्याणगुणगणं स्वात्मानं परं ब्रह्मानुभविष्यतीति उपासनाफलान्तर्गतत्वात् स्वरूपविज्ञानस्य इति, तदसत्; न हि प्रजापतिवाक्ये केवलं मुक्तात्मस्वरूपं प्रतिपिपादयिषितं न तु ब्रह्मात्मत्वमपि इत्यत्र किञ्चिद् गमकमस्ति । प्रत्युत 'एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म' इति ब्रह्मात्मनोरैक्यमेव श्रूयते भूयो भूयः; 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः' इत्यत्र यः परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः – इति श्रुतं विज्ञाय, तदात्मानमेव परं ज्योतिरुपसम्पन्नमात्मानम् इति वैयधिकरण्येन

व्याख्याने अश्रुतविरुद्धकल्पनादोषप्रसङ्गात्, सर्वप्रत्यगात्मनाव्यतिरिक्तस्यात्मनो मनसा कल्पयितुमप्यशक्यत्वादसम्भावितकल्पनाप्रसङ्गश्च। किञ्चैवं 'सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानाति' इति वाक्यस्य 'एवंविधमात्मानं विदितवान् सर्वलोककामावाप्त्युपलक्षितं ब्रह्मानुभवतीत्यर्थकत्वेन व्याख्याने, अन्यद् विजानाति अन्यदेव च फलमनुभवति – इति निर्युक्तिकम् अक्षरबाह्यं च विनाकारणं कल्पितं स्यात्। अथोच्येत – 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो 'यमयति' (बृ. मा. ३–८–३०) इत्यन्तर्यामिब्राह्मणे प्रत्यगात्मनोऽन्यस्याप्यन्तर्यामिणः परमात्मनोऽवगमात्, सर्वमेतदवकल्पत इति। नैष समीचीनोऽभिप्रायः, श्रुत्याप्यत्यन्तासम्भावनीयस्य युक्त्यनुभवविरुद्धस्य चार्थस्य प्रत्याययितुमशक्यत्वात्। न हि सर्वान्तरादपि प्रत्यगात्मनोऽन्य आत्मा अस्तीति सम्भावयितुं शक्यते; न च परमात्मा प्रत्यगात्मनो व्यतिरिक्तस्तन्नियामकः, तदात्मा च – इति विरुद्धोऽर्थः शक्यकल्पनः केनचिदपि। यदि ह्यात्मा सः, न तर्हि स्वस्मादन्यः, अथान्य एव, न तर्हि स्वात्मा। श्रूयते तु 'स त आत्माऽन्तर्याम्यमृतः' (बृ.मा. ३–८–३०) इति। न चैकस्मिन् शरीरे द्वौ प्रत्यगात्मानावुपपद्येते, येनान्तर्यामी एकः, नियम्यश्चान्यो विज्ञानात्मा इति कल्प्येत। 'नान्योऽतोऽस्ति द्रष्टा ....' (बृ. ३–८–३१) इत्यादि श्रुतिनिषिद्धश्च प्रत्यगात्मनः सकाशादन्यस्यात्मनोऽभ्युपगमः। न च नियन्त्रन्तरप्रतिषेध एषः, नियन्त्रन्तरस्याप्रस्तुतत्वात्, सर्वत्राप्येकस्यैवान्तर्यामिणः पृष्टत्वात्, प्रत्युक्तत्वाच्च। प्रत्याख्यातश्चायं चिदचिच्छ-

रीरकसगुणान्तर्यामिब्रह्मवादो विस्तरेण जन्माद्यधिकरणभाष्यार्थतत्त्वविवेचन्याम् (परिशिष्टे पा. ६०–६१) इत्यवशिष्टं तत एवाधिगन्तव्यम् । तस्मान्नैष श्रुत्यर्थः ॥

## अन्तर्यामिब्राह्मणोक्त एव परमात्मा प्रजापतिनोक्तः

९९. कथं तर्हि 'य आत्मनि तिष्ठन्' इत्यादिवचनम् ? तदुच्यते । 'यो विज्ञाने तिष्ठन्' इति समानप्रकरणे काण्वा अधीयते । तत्स्थाने चायं माध्यन्दिनानां पाठः । अत एव चायमन्तर्याम्याख्यः प्रत्यगात्मा सर्वस्य ; सर्वान्तरस्यैव हि प्रत्यगात्मेत्याख्या अन्वर्था । स एव चायमपहतपाप्मत्वादिगुणकत्वेनात्र वर्णितः प्रजापतिना । एकस्यैव त्वस्य 'विज्ञानात्मा', 'परमात्मा' इति– इति च भेदव्यवहारः, 'घटाकाशः', 'महाकाशः' इति चोपाधिवशाद् यद्वत् । विज्ञानगुणसारत्वात्, संसारदशायां विज्ञानात्मा जिज्ञासुर्भवति । परमात्मा च जिज्ञास्यः ; अतः 'स विजिज्ञासितव्यः' इत्येष उपदेश उपपद्यते । अत एव च विज्ञानात्मनः श्रोतुरर्थाय जाग्रत्स्वप्नसुषुप्तेषु साक्षितयाऽवस्थितपरमार्थस्वरूपविषये 'एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म' इत्यवधारणपूर्वकं निर्देश उपपद्यते । अत एव चोपाध्यपेक्षया सशरीरत्वं मिथ्याकल्पितं लोकेन, परमार्थतस्तु सर्वस्याप्यात्मा अशरीर एवेति कृत्वा 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति च मिथ्याज्ञानसम्यग्ज्ञानलक्षणदृष्टिभेदमाश्रित्य सशरीरस्यैव सतोऽशरीरत्वं परमार्थतो नित्यदा इति ब्रह्मत्वोपदेशः ; 'जक्षत्क्रीडन्रममाणः' इति तु सर्वात्मत्वमाश्रित्य विद्यास्तुत्यर्थम्

इति व्याख्यातमस्माभिः । तदेवं सर्वथापि प्रजापतिवाक्यं दहरवाक्यतो भिन्नविषयमेवेति स्थितम् ॥

## मुक्तस्य सगुणेश्वरभावापत्तिरिति व्याख्यानप्रस्थानम्, तद्दूषणं च

१००. **अत्रास्मदीयाश्च केचिद्** भाष्यव्याख्यानप्रस्थानविशेषावलम्बिनः सगुणनिर्गुणब्रह्मविवेकं भाष्याभिमतम् अनुमोदमाना अप्याहुः – मुक्तस्य सर्वज्ञत्वसर्वकर्तृत्वसर्वेश्वरत्वसत्यकामत्वादिगुणकपरमेश्वरभाव एव यावत् सर्वेषां मुक्तिर्भवित्री, न निर्गुणब्रह्मसायुज्यम् ; सर्वजीवमुक्त्यनन्तरमेव तु शुद्धचित्स्वभावे समवस्थानम् इति । अत्र च व्याख्यानप्रस्थानीयानां 'एकजीववादः', 'अनेकजीववादः', 'प्रतिबिम्बजीववादः' इति प्रक्रियाभेदा बहवः सन्ति । तत्र बिम्बेश्वरवादिनामेव यथावर्णिता मुक्तस्येश्वरभावापत्तिप्रक्रिया । तथा हि ते वदन्ति–'तस्मान्मुक्तानामीश्वरभावापत्तेरवश्याभ्युपेयत्वात्, एतदसम्भव एव प्रतिबिम्बेश्वरवादे दोषः । एतदसम्भवश्च, एकजीववादपारमार्थिकजीवभेदवादयोरपि दोषः ' इति । एतत्सर्वं **सिद्धान्तलेशसंग्रहे** विस्तीर्णतरं वर्णितम् । तद्व्याख्यातारश्च **कृष्णालङ्कारकाराः**, जीवेश्वरब्रह्मविभागं व्याख्यानप्रस्थानविशेषसम्मतम् अङ्गीकृत्यैवैतन्मतमपि प्रत्याचख्युः (सि. ले. पा. ५३४–५३५) । परिशुद्धशाङ्करप्रस्थानमात्रं विवरीतुं प्रवृत्तैरस्माभिस्तु यथोक्तवादविशेषाणां जीवेश्वरब्रह्मविभागप्रकारस्य च व्याख्यानप्रस्थानीयसम्मतस्य श्रुतिसूत्रभाष्याधारराहित्यं प्रदर्श्य **जन्माद्यधिकरणसूत्रभाष्यार्थतत्त्वविवेचन्यां** मुक्तस्य

सगुणेश्वरभावापत्तिवादो निराकृतः (सू. भा. त., पा. १२४–१२५, १२५–१२८)। प्रजापतिवाक्यैदंपर्यं च तत्रैव (१२८–१३१) सूत्रभाष्यानुसारेण वितत्य दर्शितमिति तत एवाधिगन्तव्यम् ॥

## मुक्तस्य सगुणेश्वरमात्रप्राप्तिरिति मतस्य भाष्यबाह्यत्वम्

१०१. इह तु सङ्क्षेपेणैतावदुच्यते – अपहतपाप्मत्वादिगुणकत्वं न कुत्रापि सगुणेश्वरस्वरूपपरतया उपस्थापितं भाष्ये, प्रत्युत तदेव पारमार्थिकं ब्रह्मस्वरूपम् ; तत्र च जीवत्वम् अविद्यया कल्पितम् इति पदे पदे उद्घोष्यते । तद्यथा –

(१) यत्परं ज्योतिरुपसंपत्तव्यं श्रुतम्, तत् परं ब्रह्म ; तच्चापहतपाप्मत्वादिधर्मकम् ; तदेव च जीवस्य पारमार्थिकं स्वरूपम्, 'तत्त्वमसी'त्यादिशास्त्रेभ्यः, नेतरदुपाधिकल्पितम् ॥

सू. भा. १–३–१९, पा. ११२.

(२) तस्मात्, यदविद्याप्रत्युपस्थापितम्, अपारमार्थिकं जैवं रूपम्, कर्तृभोक्तृरागद्वेषादिदोषकलुषितम्, अनेकानर्थयोगि, तद्विलयनेन, तद्विपरीतम् अपहतपाप्मत्वादिगुणकं पारमेश्वरं स्वरूपं विद्यया प्रतिपद्यते, सर्पादिविलयनेनेव रज्ज्वादि ॥

सू. भा. १–३–१९, पा. ११५.

(३) एवं च सत्या अद्वैतेश्वरस्य अपहतपाप्मत्वादिगुणता, विपरीतगुणता त्वितरस्य मिथ्या – इति व्यवतिष्ठते ॥

सू. भा. ४–१–३, पा. ४६५.

[ अत्रेदमवधेयम् – 'अद्वैतेश्वरस्य' इति व्यपदेशात्, नेदं सगुणेश्वराभिधानम् इति स्पष्टम् । अपि च न कुत्रचिदपि मुक्तजीवस्य अपहतपाप्मत्वादिगुणकेश्वरत्वम् अपबाध्य, शुद्धचिन्मात्रतापत्तिः प्रख्याप्यते वेदान्तेषु सूत्रे तद्भाष्ये वा – इत्येतदपि मुक्तस्य सगुणेश्वरभावताम् आतस्थुषां वादिनां मुखपिधायकम् अलमतिविस्तरेण ॥ ]

## हार्दविद्याप्रजापत्युपदिष्टविद्ययोर्विषये साम्यवैषम्ये

१०२. एवं तावद् ब्रह्मप्रतिपादकवाक्यानां ब्रह्मोपासनाविधिवाक्यानां च पार्थगर्थ्येन उपासनावाक्येषु यदाकारवत्त्वं विविधगुणवत्त्वं च वर्ण्यते ब्रह्मणः, तदुपासनाविधिशेषत्वात्, न ब्रह्मस्वरूपनिर्धारणेऽप्यादेयम् ; निराकारनिर्गुणब्रह्मस्वरूपसमर्पकैर्वाक्यैस्तत्परैर्विरुद्धत्वात् इति निर्णीतम् । अथेदमिदानीं चिन्त्यते – दहरवाक्ये यथा विधीयते 'तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' (१–१) इति ब्रह्मान्वेषणं विजिज्ञासा च, तथैव प्रजापतिवाक्येऽपि 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (७–१) इति विहितं लक्ष्यते । फलं च 'सर्वेषु लोकेषु कामचारो भवति' (१–६), 'स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्' (७–१) इति समानं लक्ष्यते । संप्रसादशब्दोदितस्य जीवस्य ब्रह्मप्राप्तिप्रकारोऽपि समान एव भाति 'अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म' (३–४) इत्येकत्र ; 'एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' (१२-३) इत्यपरत्र । ऐश्वर्यं च मुक्तस्य 'स तत्र पर्येति जक्षत्क्रीडन्रममाण स्त्रीभिर्वा यानैर्वा' (१२–७) इति प्रजापतिवाक्ये संग्रहेणोक्तम्, 'पितृलोकेन संपन्नो महीयते' (२–१) इत्यादि, 'तेन स्त्रीलोकेन संपन्नो महीयते' (२–१०) इत्यन्तं विस्तरेण प्रदर्शितमिव भाति पूर्वत्र । तदेवमन्वेषणविज्ञानरूपे साधने, तत्फलादौ च समाने सत्यपि दहरविद्या सगुणापरविद्या, प्रजापतिवाक्यस्था तु निर्गुणपरब्रह्मविद्या–

[illegible] किं समकमिति ? अत्र, एकत्र वर्णितस्य ब्रह्मस्वरूपस्यापरत्र वर्णितेन समानत्वे प्रतीयमाने किमन्यत्र श्रूयमाणानां विद्यागुणाना-[illegible]त्रोपसंहारः कर्तव्यः, उत नेति ? – इतीदमपि निरूपणीयम् ॥

अत्रेदमवधेयम् । यद्यपि समानावेवान्वेषणविज्ञानशब्दौ [illegible]पि, तथापि न साधनफलयोरेकत्वमस्ति । कथमेतत् ? दृष्टादृष्ट-[illegible]र्तनात्, साधनप्रकारयोर्वैलक्षण्यदर्शनाच्च । दर्शितं चैतदस्माभि-[illegible]व्याख्यानावसरे, तदेव च पुनरिह सङ्क्षिप्य स्फुटतरं [illegible]मो जिज्ञासुजनमतिवैशद्यार्थम् ॥

## परापरब्रह्मविद्याविभागः कथमवधारणीयः ?

१०३. द्विरूपं हि ब्रह्मावगम्यते वेदान्तेषु, परं चापरं चेति । तत्र [illegible] 'निर्विशेषम्', 'निरुपाधिकम्', 'निर्गुणम्', 'कारणम्', 'मुख्यम्' [illegible]पदिश्यते ; अपरं तु 'सविशेषम्', 'सोपाधिकम्', 'सगुणम्', '[illegible]', 'अमुख्यम्' इति च । अत्रैवं परापरविभागे 'एतद्वै सत्यकाम [illegible] च ब्रह्म यदोङ्कारः' (प्र. ५–२) इत्यादिश्रुतयः प्रमाणम् । तत्र [illegible]कृतनामरूपादिविशेषप्रतिषेधमात्रेणोपदिश्यते अशब्दास्पर्शादि-[illegible], सर्वस्यात्मभूतत्वात् स्वतःसिद्धम्, तत् परम् ; तदेव च यत्र [illegible]दिविशेषेण केनचिद् विशिष्टम् उपासनायोपदिश्यते कालान्तरे [illegible], तदपरम् । न चैवं द्वित्वमेव वास्तवं ब्रह्मणः ; अविद्या-[illegible]कल्पितत्वादपरस्य ब्रह्मणः, समस्ताविद्याकामनिवर्तनेनैवात्मत्वेन [illegible] परस्य ब्रह्मणः । तथा हि काठके परब्रह्मविषया

श्रुतिः – 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः। अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम् ॥' (का. ६–१४, १५) इति च। एवमपरब्रह्मविषया च श्रुतिरस्ति छान्दोग्ये 'मनोमयः प्राणशरीरो भारूपः .... सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः .... अवाक्यनादरः' (छां. ३–१४–२) – इत्येवम् उपास्यगुणविशिष्टमामनन्ती। तत्र तु फलम् 'एष म आत्माऽन्तर्हृदये एतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मि' (छां. ३–१४–४) इति शरीरपातानन्तरमेव प्राप्यमाणं पठितम् ॥

## प्रकृतविद्ययोरन्वेषणविजिज्ञासातत्त्वविवेकः

१०४. अत्र च इन्द्रप्रजापतिसंवादे 'नाहमत्र भोग्यं पश्यामि' (९–१, २; १०–१, २; ११–१, २) इति पदे पदे वस्तुतन्त्रज्ञानमेव प्रमाणीकृत्य तथैव मननं कृत्वा पुनः पुनराचार्यसमीपं गत्वा स्वमतं प्रकटीकरोतीन्द्रः, सर्वदोषविमुक्तम् आत्मतत्त्वं विजिज्ञासुः। प्रजापतिरपि मघवता यद् यद् यथा दृष्टं तत्तत्तथैवेत्यनुमोदते 'एवमेवैष मघवन्' (९–३, १०–४, ११–३) इति। विपरीतप्रतिपत्त्यपनयाय स्वाभिप्रेतमेव तु प्रतिपर्यायममृतमभयं नित्यशुद्धबुद्धमुक्तमेव पुनः पुनर्ज्ञपयिष्यामीति प्रतिजानीते 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' (९–३, १०–४, ११–३) इति तत्तत्स्थानपरिच्छिन्नात्मदृष्टेर्व्युत्थाप्य तमेव सर्वदोषासंस्पृष्टम् – इत्यतो यथादृष्टं मननमेवात्र 'अन्वेषणशब्दार्थः' इत्यवसीयते। 'पण्डितो मेधावी गन्धारानेवोपसंपद्येतैव-

[illegible]ार्यवान् पुरुषो वेद ' (६-१४-२) इति तत्त्वदर्श्याचार्योपदिष्ट-[illegible]श्रवणव्यतिरेकेण तदर्थनिर्धारणपर्याप्तमननसामर्थ्यमपेक्ष्यते [illegible]गमे इति हि विज्ञातं षष्ठे — इति ॥

दहरविद्यायां तु नैवम् अन्तेवासिनो दृष्टानुसारेण किञ्चि-[illegible]नं कृत्वा शङ्कन्ते । ' किं तदत्र विद्यते यदन्वेष्टव्यम् ' (८-१-२) इति तु, अन्वेष्टव्यसद्भावसम्भावनार्थं परिप्रश्नमात्रम्, अल्पतरे प्रदेशे किं विद्येत यदन्वेष्टव्यं स्यादिति—इति द्यावापृथिव्यादिसद्भावप्रतिज्ञारूप-प्रतिवचनादवगम्यते । एवं ' किं ततोऽतिशिष्यते ' (१-४) इत्यपि प्रश्नो व्याख्यातव्यः । न हि वाक्यशेषे ' नास्य जरयैतज्जीर्यति ' (१-५) इत्यादिप्रतिवचने काचिदुपपत्तिर्यथोपदिष्टार्थे प्रदर्श्यते । प्रजापतिवाक्ये तु प्रतिपर्यायमिन्द्रोत्थापितशङ्कायाः परिहारार्थम् उत्तरोत्तरावस्थायां यथा-शङ्कितदोषाभावः प्रदर्श्यते इति वैषम्यम् । तस्मात्, दहरवाक्ये यथोप[illegible]ष्टार्थभावनामात्रमन्वेषणम्, न प्रजापतिवाक्यार्थनिर्धारणे इव श्रुतार्थमननमपीति गम्यते । एवं हृदयशब्दनिर्वचनविदः, सत्यशब्द-निर्वचनविदश्च तल्लक्षणात्मोपासनामाहात्म्यादहरहः स्वर्गलोकप्राप्तावपि न काचिदुपपत्तिः प्रदर्शिता, किं तर्हि बाह्यानृतविषयतृष्णावर्जनपूर्वक-मुपासीनस्य यथोक्तं फलं भवतीति प्रतिज्ञामात्रेणोक्तम् । तस्मात्तत्र विज्ञानमपि भावनाप्रकर्षसञ्जातः साक्षात्कार एव, 'अयमस्त्यपहत-पाप्मत्वादिधर्मक आत्मा, हृदयपुण्डरीके स्थितः, सत्यकामः, सेतुः सर्वेषां लोकानाम्, अहरहः सुषुप्तेऽपि प्राप्यः ' इत्यभिमानाभिव्यक्तिरेव, न तु वस्तुतन्त्रा अवगतिः, यां प्रजापत्युपदेशेनेन्द्रः प्राप, जाग्रत्स्वप्न-

सुषुप्तात्मस्वरूपविमर्शनेन 'अहमस्मि यथोपदिष्टापहतपाप्मत्वादि-धर्मकोऽशरीर आत्मा प्रियाप्रियादिसर्वसंसारधर्मसंस्पर्शरहितः' इति ॥

## उभयविद्याफलयोर्लोककामावाप्तेः स्वरूपम्

१०५. **सर्वलोकसर्वकामावाप्तिः** खल्वपि **दहरविद्यायाः**, हृदयान्निर्गतमोक्षनाडीद्वारैव देवयानेन पथा ब्रह्मलोकगमनम्, तत्र च कार्यब्रह्मसमानैश्वर्यप्राप्त्या पितापुत्रस्त्रीगन्धमाल्यादिलोकप्राप्तिर्यथाकामम्, यथासङ्कल्पं च – इत्येवंक्रमेण **कालान्तरे देशान्तरे भाविनी ;** न त्वेवं किञ्चित् प्राप्यं कालान्तरे प्रजापत्युपदिष्टरीत्या विज्ञानं प्राप्तवतः ; **विज्ञानसमकालमेव मिथ्याज्ञानव्यवधाननिवृत्त्या प्राप्यः** परमात्मा परमार्थतोऽद्वितीयः सर्वस्यैवाऽऽत्मेति न तत्प्राप्तिर्गति पूर्वकं कालान्तरे देशान्तरे वा भवित्री, नित्यप्राप्तत्वात् तस्यात्मनः । न हि तत्र प्राप्तृप्राप्तव्यप्राप्तिविभागः कश्चन विद्यत इति । तत्रोक्ता अपहतपाप्मत्वादिधर्माः केवलं शब्दविकल्पजा एव, स्वरूपभूतत्वात् । सर्वलोकावाप्तिः सर्वकामावाप्तिश्च तत्र श्रूयमाणा लोकानां कामानां च स्वात्माव्यतिरिक्तत्वेन दर्शनमेव ; 'योऽकामो निष्काम आप्तकाम आत्मकामः' (बृ. ४–४–६) इति श्रुत्यन्तरात् । न च तस्य देशान्तरकालान्तरप्रतीक्षा कस्यचित् फलस्य प्राप्तये, यथेतरस्य । अशरीरात्मविज्ञानमात्रेण निरस्तसमस्तक्रियाकारकफलविभागब्रह्मात्म-नैवावस्थानात् । 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४–४–६), 'अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृ. ४–४–७) इति च श्रुत्यन्तरात् इति सर्वं शिवम् ॥

———

# अथ छान्दोग्याष्टमप्रपाठार्थसारः

## तत्र हार्दविद्या

( आदितः खण्डषट्के प्रतिपादिता )

अस्मिन् ब्रह्मपुरभूते शरीरे यद्दहरं हृदयपुण्डरीकम्, तत्र, अतिसूक्ष्ममाकाशाख्यं ब्रह्म तत्स्थैः कामैः सह शास्त्राचार्योपदेशानुसारेणोपास्य साक्षात्कर्तव्यम्। तस्मिन् ब्रह्मणि द्यावापृथिवी अग्निर्वायुः सूर्याचन्द्रमसौ विद्युन्नक्षत्राणि, किं बहुना, लोके यद्यदस्तीति व्यपदिश्यते, यच्च नास्तीति – तत्सर्वं कामजातम् अस्तीति भावनाप्रकर्षः सम्पादनीयः। नैवैतद् ब्रह्म शरीरधर्मैर्जरादिभिः संबध्यते, एष एवाऽऽत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पश्च। एतदेव तु सत्यं ब्रह्मपुरम्॥ प्र. ५

अविज्ञातात्मतत्त्वा जनाः स्वस्वकर्मानुगुणम् ऐहिकं पारत्रिकं वा फलं परिच्छिन्नं क्षयिष्णु च प्राप्नुवन्ति परमेश्वरायत्तम्। ये तु यथोक्तमपहतपाप्मत्वादिगुणकं ब्रह्म यथोपदेशमुपास्य साक्षात्कृत्यैव अस्माल्लोकात् प्रयन्ति, तेषां सर्वेषु लोकेषु कामचारो भवति। ते हि ब्रह्मलोकं गताः पितृमातृभ्रातास्वसृसखिगन्धमाल्यान्नपानगीतवादित्रस्त्रीजनादिभोग्यपदार्थैः यथाकामं सङ्कल्पमात्रेण समुत्तिष्ठद्भिः संपन्ना महीयन्ते॥ द्वि. १०

त इमे सत्याः कामाः स्वात्मभूते ब्रह्मण्येव स्थिता अपि अनृतेन बाह्यविषयविषयकतृष्णारूपेणापिहिताः; अत एवैतं ब्रह्मलोकं प्रत्यहं

सुषुप्ते गच्छन्तोऽपि प्राकृता जना न विन्दन्ति यथोक्तानृतेन बहिरपकृष्टत्वात् निधिशास्त्रानभिज्ञा इव जनाः प्रतिदिनं तदुपर्युपरि सञ्चरन्तोऽपि हिरण्यनिधिम् ॥ तृ. ४

स एष आत्मा हृद्येव वर्तत इति हृदयशब्दनिर्वचनज्ञानेन, सच्छब्दवाच्यममृतम्, तकारवाच्यं मर्त्यं च यच्छति वशीकरोतीति सत्यनामाक्षरार्थज्ञानेन चायम् उपासकः, प्रत्यहं स्वर्गलोकाख्यं ब्रह्म गच्छति सुषुप्ते ॥ तृ. ५

यथोक्तगुणकोऽयमात्मा सेतुशब्देन व्यपदिश्यते सेतुरिव सर्वस्यापि जगतो वर्णाश्रमक्रियाकारकफलविभागस्य च विधारणात् । एनं हि सेतुम् अहोरात्रे न प्राप्नुतः, जरामृत्युशोकसुकृतदुष्कृतादयोऽपि संसारिणां धर्मा नैवेनं प्राप्नुवन्ति अपहतपाप्मत्वादिगुणकत्वादेवास्य शरीरात्समुत्थायैव सुषुप्ते प्राप्यमाणत्वात् । अन्ध्यादिशरीरधर्मा अत्र नैवावकाशं भजन्ते । कूटस्थनित्यचैतन्यस्वरूपत्वात् अस्य, एतस्मिन् नक्तमप्यहरेव भवति ॥ च. २

अस्य ब्रह्मलोकाख्यस्यात्मनोऽहरहः प्राप्तौ, शरीरपातानन्तरं लोकान्तरे प्राप्तौ च ब्रह्मचर्यमेकं परमं सहकारिसाधनम् । तदिदं ब्रह्मचर्यं **'यज्ञः'** (ब्रह्मचर्ये यो ज्ञाता स एव विन्दते इति), **'इष्टम्'** (ब्रह्मचर्येण इष्ट्वैव विन्दते इति), **सत्रायणम्** (ब्रह्मचर्येणैवात्मनस्त्राणं करोतीति), **मौनम्** (ब्रह्मचर्येणैव हि द्वारेणात्मानं मनुते इति), **'अनाशकायनम्'** (ब्रह्मचर्येणैव हि न नाशयत्यात्मानमिति),

'अरण्यायनम्' (अरश्च ण्यश्चेत्येतौ अर्णवौ ब्रह्मचर्यद्वारेणैव हि लोकान्तरे विन्दत इति) – इति यज्ञाद्यैररण्यायनान्तैः साधनान्तरैरपि प्राप्यते, सर्वेषामपि साधनगुणानामस्मिन्नन्तर्भावात्। तस्मात्, ब्रह्मचर्याख्यं सहकारिसाधनमपि हार्दविद्याभ्यासिना अनुष्ठातव्यम्। तेनैव यथोक्तसर्वलोकसर्वकामावाप्तिलक्षणं फलं सेत्स्यति ॥ पं. ५

अथैतस्य विदुषो गत्युत्क्रान्तिचिन्ता – हृदयादपसृप्यन्त्यो नाड्यः सूर्यरश्मिसंबद्धाः पिङ्गलशुक्लनीलपीतवर्णरसेन पूर्णास्तिष्ठन्ति। आदित्यस्य रश्मयः तस्मान्निर्गत्य आसु नाडीषु सृप्ता भवन्ति। आभ्यो नाडीभ्यश्च प्रतानिता अमुष्मिन्नादित्ये सृप्ता भवन्ति। यदा ह्ययं जीव उपसंहृतसर्वकरणो भवति तदा सौरेण तेजसा अभिभूतः सुषुप्ताद् बहिर्निर्गमनासम्भवात् यद्यप्यस्पृष्टपाप्मानं परमात्मानमेवाभिसंविशति, तथापि तन्न जानाति 'ब्रह्मण्येकीभूतो भवामि सुषुप्ते' इति; विद्वांस्तु विद्याप्रकर्षात् अहरहर्ब्रह्मलोकमेव विन्दामीति दृढप्रत्ययो भवति। एवम् उत्क्रान्तिसमये ब्रह्मानुपासका स्वस्वकर्मानुसारम् तत्तन्नाडीभ्यः उत्क्रामन्ति स्वस्वकर्मानुगुणफलप्राप्त्यै। हार्दब्रह्मवित्तु शरीरादुत्क्रामन् एतैरेव रश्मिभिर्नाडीभिर्हृदयादित्योभयसंबद्धैरूर्ध्वमुत्क्रमिष्यति। ओंकारेणात्मवाचकेनात्मानं ध्यायन्, शीघ्रमेवादित्यं गच्छति। आदित्य एव खलु ब्रह्मलोकद्वारं विदुषाम्। तदेवमहरहर्हार्दं ब्रह्मोपासीनो यथोक्तसहकारिसाधनसंपन्नो मूर्धन्यया नाड्या गत्वा ब्रह्मलोकाख्यस्वाभिसंहितममृतं पदं गच्छति, नेतर इवान्यां गतिं गच्छतीति शम् ॥ प. ६

---

# अथेन्द्रप्रजापतिसंवादग्रन्थसारः

अथ कदाचित् प्रजापतिरुवाच – 'अपहतपाप्मत्वाद्यष्टगुणकम् आत्मानं यः श्रवणमननाभ्याम् अन्विष्य विजानाति स सर्वांश्च लोकान् सर्वांश्च कामानाप्नोति' इति। तदेतद् वचनम् उपश्रुत्य देवासुरा उभयेऽपि तमात्मानम् अन्विष्य यथासङ्कीर्तितं फलमवाप्स्याम इत्यूचुः। देवानां राजा इन्द्रः, असुराणां च राजा विरोचनः परस्परमकृतसंविदावेव प्रजापतिसकाशमुपाजग्मतुः। द्वात्रिंशद्वर्षकालं कृतब्रह्मचर्यौ तौ प्रजापतिः पप्रच्छ–' किं प्रयोजनमिच्छन्तौ युवां ब्रह्मचर्यमुषितवन्तौ ?' इति। तौ च स्वागमनकारणमूचतुः; 'यो भवता प्रोक्तोऽपहतपाप्मत्वादिगुणक आत्मा तं ज्ञातुमिच्छन्तौ एवं ब्रह्मचर्यमुषितवन्तौ' इति॥ स. ३

अथ प्रजापतिरुपदिदेश 'य एषोऽक्षिणि पुरुषो दृश्यते एष एवात्मा अमृताभयब्रह्मस्वरूपः' इति। तौ पप्रच्छतुः 'अक्षिणीव अप्सु आदर्शे च प्रकाशते पुरुषः। एषां कतम आत्मा भवदुक्त इति। प्रजापतिस्तु प्रत्यूचिवान् 'मयोक्त आत्मा सर्वेष्वप्यन्तेषु परिख्यायते' इति। पुनस्तौ प्रोवाच 'उदशरावे स्वात्मानमवेक्ष्य यन्न विजानीथः– तन्मां पृच्छतम्' इति। तौ तथा कृत्वा ऊचतुः– 'सर्वमेव स्वात्मानं पश्याव' इति। पुनरपि प्रजापतिरुवाच। साध्वलङ्कृतौ सुवसनौ परिष्कृतौ पुनरप्युदशरावे अवेक्षेथामिति। तथा कृत्वापि तौ प्रजापत्युपदेशरहस्यं न गृहीतवन्तौ। प्रजापतिस्तु स्वहृदयस्थमेव सर्वसाक्षिणमात्मानमव्यभिचरितस्वरूपमुद्दिश्योवाच 'एष आत्मा, एतदेव चामृतमभयं ब्रह्म' इति॥ अष्टमः ३

[illegible] तौ यथागतं प्रतिजग्मतुः । प्रजापतिस्तु तौ [illegible] प्रोवाच 'तत्त्वमननुविद्यैव व्रजत [illegible] यतरे एतज्ज्ञानेनैव परितुष्टा भवन्ति देवा असुरा वा, [illegible]ष्यन्ति ' इति । तत्र तयोर्विरोचनस्य मतिरासीत् 'देहात्मैव [illegible], तदुपासनेनैव सर्वेष्टार्थप्राप्तिः स्यात् ' इति । तेनासुरा दुष्टोप-[illegible] बभूवुः । इन्द्रस्तु देवानप्राप्यैव मध्येमार्गम् एवं विचारयामास '[illegible]च्छायापुरुषः कथमपहतपाप्मत्वादिगुणकः स्यात् ? तन्नूनमन्य [illegible] पित्रा विवक्षित ' इति । तदेवं यथाविज्ञातात्मन आत्म-[illegible]परितुष्यन् स पुनरपि प्रजापतिमागच्छत् । तेनागमनकारणं [illegible] 'हे भगवन्, शरीराकारानुकारी अयं छायापुरुषः शरीरस्य [illegible] नश्यति । तत्र नाहं किमपि भोग्यं पश्यामि ? तत्कृपया [illegible]विवक्षितं परमार्थात्मानम् ' इति ॥ नवमः २

[illegible]: प्रजापतिरब्रवीत्, 'एवमेव भवदभिप्रेत आत्मा ; एतं [illegible] विवक्षितमात्मानं भूयोऽप्यनुव्याख्यास्यामि, तदर्थं पुनरपि [illegible] वर्षाणि ब्रह्मचर्यं वस ' इति । द्वात्रिंशद्वत्सरान्ते च तमुवाच '[illegible] स्वप्ने महीयते, एष स आत्मा मया विवक्षितः ' इति । [illegible] 'अत्र स्वप्नपुरुषे छायापुरुषगता दोषा यद्यपि न सन्ति, तथापि स्वयं [illegible] हत इव, अप्रियं वेत्तीव, रोदितीव च भासते ; [illegible] अपहतपाप्मत्वादिगुणकः स्यात् ? ' इति चिन्तयमानः, [illegible] देवानप्राप्यैव [illegible] पित्रे स्वसंशयं निवेदयामास । [illegible] परमार्थात्मानमेव [illegible], 'एवमेवैष मघवन्,

भवदभिप्रेतः स्वाप्नपुरुषः । मया तु तद्व्यतिरिक्त एव विवक्षितः । अतस्तद्विज्ञानार्थं वसापराणि द्वात्रिंशत वर्षाणि – इत्याज्ञापयामास । तथा कृतवते मघवते उपदिदेश 'यस्तु सुप्तः स्वप्नं न विजानाति, एष आत्मा' इति । इन्द्रः सुषुप्तात्मनि यथोक्तं दोषमपश्यन् परितुष्टः प्रतिजगाम ॥　　दशमः २

पुनः मध्येमार्गं चिन्तयानः सुषुप्तेऽपि पुरुषे दोषं ददर्श मघवान् । कथम् ? "यद्यप्ययं स्वप्नपुरुषवद् वधभयादिमान् न भवति, तथाप्यज्ञानपरिभूतस्त्वेषः । न हि 'अयमहम्' इति वा, 'इमानि भूतानि' इत्यन्यानि वा भूतानि सम्यग्जानात्येषः । तस्मात् सर्वथा विशेषविज्ञाना भावात्, विनाशं गत इव भवति । किमत्र भोग्यमेतेन ज्ञातेन ?" इत्यालोच्य पुनरपि प्रजापतिं समागत्य स्वसंशयं निवेदयामास । तदापि प्रजापतिः स्वोपदिष्टं परमात्मानम् उपदिदिक्षुः, 'वसापराणि पञ्च वर्षाणि' इत्यादिदेश ॥　　एकादशः खण्डः ३

इदानीं प्रजापतिः, शरीरसंस्पर्शरहितं परमार्थात्मानमेव तस्मै उपदिदेश । 'हे मघवन्, इदं शरीरं मर्त्यम्, शरीराभिमानिनः प्रियाप्रिययोरपहतिः कदापि न विद्यते । अयं तु मयोच्यमान आत्मा अशरीरः । आत्मनोऽधिष्ठानं हि शरीरं व्यवहारे । 'तत्साक्ष्यहम् अशरीरः' इति विजानन्तं न कदापि प्रियाप्रिये स्पृशतः । यथा वाय्वादयः परमार्थतोऽशरीरा एव सन्तो मिथ्याज्ञानकृतशरीरसंबन्धेन विविधविक्रियां भजन्ते, स्वरूपेण त्वाकाशानन्येन नित्यनिर्विकाराः, एवमेवायं सुषुप्तात्मा अस्माच्छरीराद् विविच्यमानः परं ज्योतीरूपं परमात्मानं

उपसंपद्य स्वेनैवापहतपाप्मत्वादिरूपेणाभिनिष्पद्यते। स एव तु 'उत्तम-पुरुष' इत्युच्यते व्याकृताव्याकृतरूपाद् विलक्षणत्वात्, नित्यनिर्मल-स्वरूपत्वाच्च। एवं विजानन् तस्मात्पुरुषादनन्यान् सर्वान् कामान् समश्नुते जीवन्नेव नित्याशरीरात्मविज्ञानबलात् इति॥ द्वादशः ३

सोऽसावात्मा चक्षुर्घ्राणवागादीन्द्रियसंबन्धाद् द्रष्ट्रादिरूपविशेष-विज्ञानवानिवावभासमानोऽपि स्वरूपेण नित्यविज्ञानस्वरूप एव। य एवं वेदैवमात्मानं स विशुद्धमनसा एतान् ब्राह्मलौकिकान् कामान् पश्यन् रमते। एवमात्मानमुपासीना देवा अद्यापि सर्वलोकसर्वकामा-वाप्त्या महीयन्ते। तस्मादद्यापि य एवमात्मानं वेद स एव सर्वांल्लोका-नाप्नोति सर्वांश्च कामानिति प्रजापतिरुवाच॥ द्वादशः ६

# अथोपनिषदुपसंहारः

अथ 'श्यामाच्छबलं प्रपद्ये' इत्यादिर्मन्त्रो जपार्थः, ध्यानार्थश्च। सार्वात्म्यलोकान्तरप्राप्यब्रह्मणोरेकत्वभावनाभावितया ब्रह्मसाक्षात्कार-बलेन ब्रह्मलोकं प्रतिपद्यते निस्संशयं साधकः– इति मन्त्राशयः॥

त्रयोदशः १

'आकाशो वै नाम' इति ब्रह्मणो लक्षणसमर्पकं वाक्यम्। [illegible] तत्त्वान्यत्वाभ्यामनिर्वचनीये नामरूपे अविद्याकल्पिते; ततो विलक्षणं तु नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्म सर्वस्यात्मभूतम्– इति भावार्थः। 'प्रजापतेः सभां वेश्म प्रपद्ये' इत्यादि तु तस्यैव ब्रह्मणो

व्याकृतरूपविशेषं प्रजापतिलोकं जिगमिषोर्हार्दाकाशोपासकस्य ध्यानार्थो मन्त्रः ॥ चतुर्दशः १

तद्धैतद्ब्रह्मा – इति तु सर्वस्यैवोपनिषदर्थस्य सोपकरणस्य समुपसंहारार्थं गुरुवंशकथनेन ब्रह्मज्ञानसाधनज्ञानफलयोः सङ्कीर्तनेन चेति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवत्पादचरणस्मरण-
परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्य-
सच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीता
श्रीपरब्रह्मविद्यारहस्यविवृतिः

समाप्ता च परापरब्रह्मविद्यारहस्यविवृतिः

ओं तत्सत्

# विवृतिसहितानां उपनिषद्विभागानामनुक्रमणिका


| प्रतीकम् | खं-संख्या | पं-पा- |
|---|---|---|
| अथ य आत्मा | ४–१ | ३१ |
| अथ य एष संप्रसादः | ३–४ | २७ |
| अथ यत्सत्रायणमित्याचक्षते | ५–२ | ३७ |
| अथ यत्रैतदबलिमानं | ६–४ | ४७ |
| अथ यत्रैतदस्माच्छारीरात् | ६–५ | ४८ |
| अथ यत्रैतदाकाशमनु... | १२–४ | ९० |
| अथ यद्यज्ञ इत्याचक्षते | ५–१ | ३७ |
| अथ यदनाशकायनमित्याचक्षते | ५–३ | ३७ |
| अथ यद्यन्नपानलोककामः ... | २–७ | २० |
| अथ यदि गन्धमाल्यलोककामो | २–६ | २० |
| अथ यदि गीतवादित्रलोककामो | २–८ | २० |
| अथ यदिदमस्मिन् ब्रह्मपुरे | १–१ | ७ |
| अथ यदि भ्रातृलोककामः | २–३ | २० |
| अथ यदि मातृलोककामः | २–२ | १९ |
| अथ यदि सखिलोककामः | २–५ | २० |
| अथ यदि स्वसृलोककामः | २–४ | २० |
| अथ यदि स्त्रीलोककामः | २–९ | २० |
| अथ या एता हृदयस्य | ६–१ | ४१ |
| अथ ये चास्येह जीवाः | ३–२ | २३ |
| अथ यो वेदेदं मन्वानीति | १२–५ | ९० |
| अथ हेन्द्रोऽप्राप्यैव | ९–१ | ६६ |
| अशरीरो वायुरभ्रं | १२–२ | ८० |
| आकाशो वै नाम नामरूपयोः | १४–१ | ९९ |
| उदशराव आत्मानमवेक्ष्य | ८–१ | ६० |
| एवमेवैष मघवन् | ९–३ | ६९ |
| एवमेवैष मघवन् | ११–३ | ७५ |
| एवमेवैष संप्रसादो | १२–३ | ८० |
| त इमे सत्याः कामाः | ३–१ | २२ |
| तदेष श्लोकः । शतं चैका च | ६–६ | [illegible] |
| तत्र एवैतावरं च | ५–४ | ४० |
| तद्य एवैतं ब्रह्मलोकं | ४–३ | ३२ |
| तद्यत्रैतत्सुप्तः | ६–३ | ४४ |
| तद्यत्रैतत्सुप्तः | ११–१ | ७४ |
| तद्यथा महापथः | ६–२ | ४२ |
| तद्यथेह कर्मजितो लोकः | १–६ | १८ |
| तद्धैतत् ब्रह्मा प्रजापतये ... | १५–१ | १०२ |
| तद्धोभये देवासुरा | ७–२ | ५६ |
| तस्मादप्यद्येहाददानम् | ८–५ | ६३ |
| तस्माद्वा एतं सेतुं तीर्त्वा | ४–२ | ३१ |
| तानि ह वा एतानि त्रीण्यक्षराणि | ३–५ | २९ |
| तौ ह द्वात्रिंशतं वर्षाणि | ७–३ | ५७ |
| तौ ह प्रजापतिरुवाच | ७–४ | ५८ |
| तौ ह प्रजापतिरुवाच | ८–२ | ६० |
| तौ हान्वीक्ष्य प्रजापतिरुवाच | ८–४ | ६३ |
| तौ होचतुर्यथैवेदमावाम् | ८–३ | ६१ |
| तं चेद् ब्रूयुः | १–२ | ११ |

| प्रतीकम् | खं·संख्या | प·पा· | प्रतीकम् | खं·संख्या | प·पा· |
|---|---|---|---|---|---|
| तं चेद् ब्रूयुः | १–४ | १३ | यं यमन्तमभिकामो | २–१० | २२ |
| तं वा एतं देवा | १२–६ | ९३ | श्यामाच्छबलं प्रपद्ये | १३–१ | ९५ |
| न वधेनास्य हन्यते | १०–२ | ७१ | स ब्रूयात् नास्य जरया | १–५ | १४ |
| न वधेनास्य हन्यते | १०–४ | ७२ | स यदि पितृलोककामो भवति | २–१ | १९ |
| मघवन् मर्त्यं वा इदं शरीरम् | १२–१ | ७६ | स वा एष आत्मा हृदि | ३–३ | २५ |
| य आत्माऽपहतपाप्मा | ७–१ | ५३ | स समित्पाणिः पुनरेयाय | ९–२ | ६६ |
| य एष स्वप्ने महीयमानः | १०–१ | ७१ | स समित्पाणिः पुनरेयाय | १०–३ | ७२ |
| यावान् वा अयमाकाशः | १–३ | ११ | स समित्पाणिः पुनरेयाय | ११–२ | ७४ |


---

1000 — 10-6-69 The Adhyatma Prakasha Press, Holenarsipur

# विक्रेयाः कतिचन वेदान्तग्रन्थाः

—:~:—

**गीताशास्त्रार्थविवेकः** – श्रीसच्चिदानन्देन्द्रसरस्वतीनिर्मितः स्वतन्त्रो ग्रन्थः । अत्र प्रकरणे प्रप्रथमं साङ्ख्य-योग-कर्म-ध्यानादिपदार्थानां विवेकः कृतः । तदनु कर्मयोगध्यानयोगादीनां संबन्धो निरूपितः । साङ्ख्ययोगदर्शनाभ्यां वैलक्षण्यं च गीताशास्त्रस्य स्फुटीकृतम् । शाङ्करभाष्यानुसारेण शास्त्रार्थ-विवेचनं नूत्नया सरण्या कृतमत्र ॥

**वेदान्तडिण्डिमः** – भावबोधिनीव्याख्यासहितः । प्रतिश्लोकं वेदान्तवाक्योदाहरणेन वेदान्तप्रमेयाणि सुललितशैल्या विशदीकृतान्यत्र ॥

**विशुद्धवेदान्तसारः** – अनुभवप्रधानदृष्टिः, मनःप्रधानदृष्टिः, इन्द्रियप्रधानदृष्टिः– इति ज्ञानसाधनविशेषविभागानुसारेण विभक्तम् उपदेशत्रयं गुरुशिष्यसंवाद-रूपेण संगृहीतमत्र प्रकरणे । अशाङ्करप्रस्थानप्रक्रियासंमिश्रणरहितं श्रीशङ्कर-भगवत्पादसम्मतवेदान्तार्थसारं जिघृक्षूणामत्यन्तोपकारकम् ॥

**विशुद्धवेदान्तपरिभाषा** – वेदान्तवाक्यार्थाध्यवसानेनैव ब्रह्मात्मावगतिर्भवित्री – इत्येतत् स्फुटीकृतमत्र ॥ (१) ब्रह्म, जगत्, जीवश्च - इत्येतेषां सतत्त्वम् ; (२) जगद्ब्रह्मणोः, जीवब्रह्मणोश्च संबन्धाः साम्प्रदायिकपरिभाषाजात-मवलम्ब्य निरूपिताः ॥

**वेदान्तबालबोधिनी** – प्रातःस्मरणस्तोत्रस्य भगवत्पादीयविरचितस्य प्रश्नोत्तररूपं व्याख्यानम् । अस्मिन् प्रकरणे ब्रह्मविद्याया अनुभवावसानत्वं पदे पदे स्मारयन्तीनां भाष्यकारोक्तीनां सरणिमेवानुसृत्य शास्त्रार्थः सुविशदीकृतः ॥

विस्तृतग्रन्थसूचीप्राप्तये अधिकविषयाधिगमार्थं
चाभ्यर्थनीयाः अध्यक्षाः

## अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

( हासनजिल्ला, मैसूरुप्रान्तः, दक्षिणरेल्वे )

# THE

# ADHYATMA PRAKASHA KARYALAYA,

( ESTABLISHED 1920 )

HOLENARSIPUR. (Hassan District, Mysore State, India)

An Institution to help the interpretation of Indian Culture by stimulating the study and practice of the Adhyatma Vidya — Philosophy and Religion in its universal aspect — especially as revealed in the Upanishads and allied literature.

1. Has so far published more than ONE HUNDRED AND FORTY BOOKS in Kannada, English and Sanskrit.

2. Arranges for frequent DISCUSSIONS, DISCOURSES, and PUBLIC LECTURES; VEDANTA CLASSES in the morning form a regular feature.

3. Has a free-lending LIBRARY and a READING ROOM for the public.

4. Conducts a Kannada Monthly Magazine called the "ADHYATMA PRAKASHA", devoted to Jñāna, Bhakti and Vairāgya.

5. Maintains a VEDANTIC COLLEGE for training up model students for the dissemination of Vedantic ideas.

6. Has a TEMPLE dedicated to the service of Sri Digvijaya Rāma.

Please apply to the Manager
for fuller information